कातन्त्रच्छन्दःप्रक्रिया

राजकीयसंस्कृतविद्यालयाध्यापकमहामहोपाध्याय-

श्रीचन्द्रकान्ततर्कालङ्कारेण

विरचिता।

शेरपुरनगरस्थान्यतमभूस्वामिना विद्याविनोदेन

श्रीहरचन्द्रचतुर्धुरीणेन

प्रकाशिता।

KĀTANTRA CCHANDAH PRAKRIYĀ.

BY

MAHĀMAHOPĀDHYAYĀ CANDRA-KĀNTA TARKĀLANKĀRA

Professor of Hindu Law, Samskrta College;

PUBLISHED BY

ÇRIYUKTA HARACANDRA CAUDHURĪ VIDYĀVINODA,

One of the Zemindars of Town Sherpur.

1896.

PRINTED BY CANDRANATHA GUHA, AT THE PEOPLE'S PRESS,

80, Muktaram Babu's Street, Calcutta.

अनुक्रमणिका ।

संक्षेपेण लौकिकानि पदानि व्युत्पिपादयिषुणा सर्व्ववर्म्मणाऽऽचार्य्येण कलापापरनामधेयं कातन्त्रं नाम व्याकरणं प्रणीतम् । आख्यातान्तं विरच्य प्रसिद्धत्वादाचार्य्येणोपेक्षितं छादन्तशब्दजातं कात्यायनो व्युत्पादितवान् । भगवता दुर्गसिंहेनाचार्य्यसूत्राणां कात्यायनसूत्राणां चोपरि समीचीना हृत्तिर्व्यरचि । सैवेदानीं पठनपाठनयोः प्रचरति । कात्यायनः किल कतिचित् छान्दसानि छादन्तपदान्यपि व्युत्पादितवान् ।

छादन्तभिन्नानां छान्दसानां पदानां छादन्तानामपि सर्व्वेषां छान्दसपदानां व्युत्पादनं कातन्त्रव्याकरणे नास्ति । कात्यायनोहि लोके यानि प्रयुज्यन्ते तान्येव छान्दसानि पदानि व्युत्पादयामास न सर्व्वाणि ।

तदेवं कातन्त्रे छान्दसप्रक्रियाया उपेक्षितत्वात् कातन्त्रानुसारिणी कातन्त्रच्छन्दःप्रक्रियेयमस्माभिर्विरचिता । औणादिका अपि च्छान्दसाः शब्दा व्युत्पादिताः । दिङ्मात्रप्रदर्शनार्थं नैघण्टुकसमाम्नायपठितानामपि कतिपयेषां पदानां व्युत्पत्तिः प्रदर्शिता । सूत्रं हृत्तिश्चोभयमपि मयैव व्यरचि । भगवतो दुर्गसिंहस्यैव रीत्या हृत्तिरत्र निर्म्मिता । क्वचित् क्वचित् तदीयपंक्तिरप्युद्धृता । एवं काशिकादितोऽपि कुत्र-

चित् किञ्चिदुद्धृतमस्ति। पाणिनिसूत्रं पातञ्जलमहाभाष्यं कात्यायनवार्त्तिकं काशिकां सिद्धान्तकौमुदीञ्च प्रधानतोऽनुसृत्य विनिर्मितेयं मया। भाष्यप्रदीपोद्योत-लघुशब्देन्दुशेखरमनोरमादिकं च क्वचित् क्वचित् दृष्टम्। सन्दिग्धेषु स्थलेषु संस्कृतविद्यालयस्यान्यतमाध्यापकैर्बन्धुवरैर्भारद्वाजगोविन्दशास्त्रिभिः समं परामर्शः कृतः। प्रूफपत्रञ्च तैः प्रायशो दृष्टम्। किं बहुना, तैरत्र बहूपकृतोऽहम्। कुत्रचित् कुत्रचित् काशीस्थानां प्रख्यातनाम्नां पण्डितानामपि मतमधिगतम्। वाराणसीस्थेभ्यः परमसुहृद्यो ऽग्निहोत्रिभ्यः सुब्रह्मण्यशास्त्रिभ्यः कतिचित् श्रुतोदाहरणानि समासादितानि। तत्रैव बङ्गसामगेभ्यः सुहृदयेभ्यः सत्यव्रतसामश्रमिभ्योऽपि कियानुपकारः प्राप्तः। पाणिनयादिभिरननुशिष्टान्यपि कतिचित् पदानि प्रयोगदर्शनादिह व्युत्पादितानि। प्रयोगदर्शनादेव क्वचित् क्वचित् पाणिनितन्त्ररीतिमननुसृत्य प्रयोगानुसारिणी रीतिरनुसृता। इयञ्च कातन्त्रस्य परिशिष्टतया व्यवहरिष्यते इत्याशास्महे। अस्याः परिशुद्धौ यथामति कृतः प्रयत्नः। तथापि भ्रान्तेः पुरुषधर्मत्वाद्वा मदीयाद्बुद्धिदौर्बल्याद्वा या या भ्रान्तिरत्र विद्वद्भिरुपलप्स्यते, तैः कृपया तत्सर्व्वमहं बोधयितव्य इति कृतोऽयमञ्जलिः। यैर्विंपश्चिद्भिरत्रोपकृतोऽहं, तेभ्यः कृतघ्नता-परिवर्त्तमुपढौकयते प्रणामाञ्जलिरिति शिवम्।

कलिकातामङ्कानगर्य्यां
राजकीयसंस्कृतविद्यालयः

श्रीचन्द्रकान्तदेवशर्म्मणः


शुद्धिपत्रम् ।

पृष्ठे	पंक्तौ	अशुद्धम् ।	शुद्धम् ।
७	१२	घृतैर्ल	घृतैर्गं
१०	६	कथं	तथा,
१४	१	कार	कारः
१४	८	धेधा	धिधा
१५	११	सिद्धान्तकौमुद्यां	काशिकायां
१५	१२	इत्यधीध	इत्यधीष्
१५	२१	ऽध्यर्थां३ङ	ऽध्यर्थां३ङ ।
२६	५	आवस्तृत्	आवस्तृत्
२८	१६	आगम	अगम
३१	८	ऋदन्यत्रापि	ऋतीऽन्यत्रापि
३५	९	विड़ाट्	विराट्
३६	१५	नौं	नौं
५४	२	प्राप्त	प्राप्तै
६४	७	तिसणां	तिसृणां
६४	१८	ते	त्रे
६४	१९	परतस्ति	परतस्त्रि
६६	१	नदीकारात् सेः	स्त्रीपीनदीकारात् सेः
७१	७	स्वर्थे र्थं	स्वार्थे यं
७२	१	वीत	र्वीत
७२	१५	ततस्ति	तस्ति
७३	१३	आम्बार्या	अम्बार्या

७६	१	तानि धर्म्माणि प्रथमा ग्यासन्। ऋ० १० ९०।१६ ॥	श्लोकं देवः कणुते खाव धर्मणे। ऋ० ४।५२।२ ॥
७८	१०	वोमन्तो	वोमस्य मन्तो
७८	१५	अंवसि	अवसि
८२	२०	जुहीती	जुंहोती
८४	८	ऋत्र	ऋवः
८५	१	यामरण्य	यामरण्ये
९२	५	१०।	ऋ० १०।
१०७	८	अष्टा	अष्टा
११५	१७	वत्ये	वेत्ये
१२२	९	षष्ठाच्चाद	षष्ठात्तात्
१२८	२	रूप	रूपं
१३९	१२	विम्बारं	विम्बावं
१३७	३	अ क्षा	अक्षा
१४०	७	दृयनसु	दृयन्सु
१५०	१३	२१।५	२१।६
१५८	१	सोम्य	सोम्ये
१६०	३	घ्ययो	घयो
१८१	१९	। गुण	गुण
१९४	१५	प्रत्यधेम	प्रत्यये न
२००	४	नाम्नुपथ	नासुपथ
२०२	१	म्नय	म्नूय
२०४	२	युंदृंवते	युदृंम्नते
२२०	१	ऊषिनः	ऊणिणः
२२५	१६	तनि	तन्नि
२२६	१३	अनेधां	अनेधांतो
२२०	७	अम्न	अम्न

२२८	२०	हंस	क्रंस
२३०	१८	विहे	विंहे
२३३	१५	पद्माम्म कारागमः	पद्माम्मकारागमः
२३५	२	स्तुत्वया	स्तूत्वर्या
२३५	१४	विडवा	विडतां
२३६	२	निपात्यते	निपात्येते
२३७	७	गंत्वयः	गंत्वर्थः
२३८	१	समदि	समुदि
२३८	१२	प्राकस्त्रात्रेयो	प्राकल्यात्रेयो
२४०	७	स्विम	सिम

सुद्रायन्त्रदोषात् क्वचित् क्वचित् वयोर्विपर्ययो जातः तत्पर्य्यावर्त्तनं विपश्चिद्भिः करणीयं ।



ओं

कातन्त्रच्छन्दःप्रक्रिया

सन्धौ प्रथमः पादः

शब्दब्रह्म नमस्कृत्य पितरौ च गुरूंस्तथा ।
छान्दसी चन्द्रकान्तेन कातन्त्रप्रक्रियोच्यते ॥

छन्दसि प्रोपसमुदां हिः पादपूरणे बहुलम् ॥ १

छन्दसि प्र उप सम् उत् इत्येतेषां बहुलं हिर्वचनं भवति । पादपूरणे विषये । हिर्वचनेन चेत् पादः पूर्यते इत्यर्थः । वचनमिति गम्यते ।

प्रप्रायमग्निर्भरतस्य शृण्वे । ऋ० ७।८।४ ॥ उपोप मे परा मृश । ऋ० ८।७४।८ ॥ संसमिद्युवसे वृषन् । ऋ० १०।१९१।१ ॥ सिं गोभुरु सर्पसे दातवा उ । ऋ० ४।२१।८ ॥ न च भवति । त्वामग्ने प्रयतिषु । ऋ० १।१।२ ॥ वृषभस्य हरय उप गुः । ऋ० ४।१४।१ ॥ सं सूर्येण रोचते । ऋ० ८।२।४ ॥ वेषा अवांसुदिर । ऋ० १।१।७ ॥

पादपूरणे इति किम् । प्र च आयूंषि तारिषत् ।

ऋ० १०।१८६।१ ॥ उप त्वाग्ने दिवे दिवे । ऋ० १।१।७ ॥ समुषद्भिरजायथाः । ऋ० १।६।२ ॥ प्रति त्वासुदहासत । ऋ० १।८।४ ॥

छन्दसीत्येतदा शास्त्रपरिसमाप्तेरधिकृतं वेदितव्यम् । सर्व्व-एवामी विधयश्छन्दसि प्रवर्त्तन्ते । केचित्तु छान्दसाः प्रयोगा-भाषायामपि प्रयुज्यन्ते ।

प्रप्रपूज्य महादेवं संसंयम्य मनः सदा ।
उपोपहाय संसर्गमुदुद्गतः स तापसः ॥

इतीयवमादेः प्रामाणिकत्वे तत्राप्युक्तैव गतिरनुसरणीया । जयादित्यो ह्यप्रयोगममीषां भाषायामाह । प्राक् छन्दोग्रहणं मङ्गलार्थम् ।

दीर्घस्तुनुघमत्वकुत्वोरुषाणामृचि ॥ २

तु नु घ मत्तु कु त्व उरुष्य इतीयतेषां बहुलं दीर्घो भवति । ऋग्विषये प्रयोगे ।

तु । आ तू न इंद्र हवनश्रुत् । ऋ० ४।३२।१ ॥ आ तू षिंच हरिमीं द्रोरुपस्थे । ऋ० १०।१०१।१० ॥ नु । प्र नू स मर्तः शवसा जनाँ अति । ऋ० १।६४।१३ ॥ नू रोदसी अभिष्टुते वसिष्ठैः । ऋ० ७।३८।७ ॥ नू मर्तोदयते सनिष्यन् यः । तै० ब्रा० २।४।३ । इति च । घ । यद्वा घा सत्यमुत यत्र विश्व । ऋ० ५।८५।८ ॥ वयं घा ते अपूर्व्या । ऋ० ८।६६।११ ॥ मत्तु । प्रातर्मंत्तू धियावसुर्जगम्यात् । ऋ० १।६२।८ ॥ मत्तू समुद्रादुत वा पुरीषात् । ऋ० ४।२१।३ ॥ कु । दीध्यानाः कूचक्रेषिव

सिंचन् । ऋ० १०।१०२।११ ॥ कूष्ठोदेवावधिना । ऋ० ५।७४।१ ॥ चत्रा ते भद्रा रथना अपश्यं । ऋ० १।१६३।५ ॥ यत्रा नः पूर्वे पितरः परेयुः । ऋ० १०।१४।७ ॥ उरुष्य । उरुष्या णो अभिशस्तेः । ऋ० १।९१।१५ ॥ उरुष्या णो अघायतः समस्मात् । वा० मा० ३।२६ ॥ उरुष्येत्येतद्रक्षणार्थं कण्डूयादौ पठति ।

न च भवति । मायामू तु यज्ञियानामेतां । ऋ० १०।८८।६ ॥ कोनु वां मित्रावरुणाहुतायन् । ऋ० ५।४१।१ ॥ वयं घ त्वा सुतावन्तः । सा० उ० २।२।१२।१ ॥ मक्षुंगमाभिरूतिभिः । ऋ० ८।२२।१६ ॥ यः कुक्षिः सोमपातमः । ऋ० १।८।७ ॥ अनूनोदत्र हस्तयतो अद्रिः । ऋ० ५।४५।७ ॥ उरुष्य राय एषोयजस्व । वा० मा० ७।४ ॥ विश्वस्मात्सीमघायत उरुष्य । ऋ० ४।२।६ ॥

ऋचीति किम् । अत्र पितरो मादयध्वं । वा० मा० २।३१ ॥ सम्भृत्या एव सम्भाराः । यत्र यत्रैवास्य न्यक्तं तत एवैनमवरुन्धे । तै० स० १।५।२ ॥ इति तु पञ्चम्यामाहुतावापः पुरुषवचसो-भवन्ति । छा० उ० ५।८।१ ॥ कथं नु भगवः स आदेशो भवति । छा० उ० ६।१।३ ॥

निपाते नामिनः सौ ॥ ३

निपाते सुशब्दे परतो नामिनो बहुलं दीर्घो भवति । ऋग्विषये प्रयोगे ।

अभी षु णः सखीनां । ऋ० ४।३१।३ ॥ अर्ध ज षु ण जतये । ऋ० १।३६।१३ ॥ न च भवति । इमा उ षु श्रुधी गिरः । ऋ० १।२६।५ ॥

निपाते इति किम् । प्रेषो यंधि सुतपावन् वाजान् । ऋ० ६।२४।९ ॥ नामिन इति किम् । भराय सु भरत भांगमृत्वियं । ऋ० १०।१००।२ ॥ साविति किम् । इन्द्रमभि प्रगायत । ऋ० १।५।१ ॥ ऋचीत्येव । सिंह्यसि सुप्रजावनी रायस्पोषवनिः । वा० मा० ५।१२ ॥

निपातस्य च ॥ ४

साविति न स्मर्य्यते । निपातस्य च बहुलं दीर्घो भवति । ऋग्विषये प्रयोगे । अर्थादन्तस्य स्वरस्य ।

एवा पित्रे विश्वदेवाय हृषे । ऋ० ४।५०।६ ॥ अच्छा वो देवीमुषसं विभातीं । ऋ० ३।६१।५ ॥ अया दूतं हृणीमहे । ऋ० १।४४।३ ॥

कथम् । कदू महीरधृष्टाः । ऋ० ८।६६।१० ॥ अमुं च लोकमिदमू च सर्व्वम् । त० ब्रा० ३।१।२ ॥ आद्यन्तवद्भावात् । न च भवति । पोषमेव दिवे दिवे । ऋ० १।१।२ ॥ अस्मा उ ते महि महे विधेम । ऋ० ६।१।१० ॥

ऋचीत्येव । अद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः । वा० मा० २१।४३ ॥ तथा । एतएव देवताः स्वेन भाग-धेयेनोपधावति । तै० स० २।३।७ ॥ प्रजाएव तद्यजमानः पोषयति । तै० ब्रा० १।६।२ ॥ अन्तस्य स्वरस्येत्येव । नमोभरंत एमसि । ऋ० १।१।७ ॥ निपातविशेषाणामेवायं दीर्घोऽभ्यते ।

ऋचि लोपस्त्वेरनादेः ॥ ५

ऋचीति निवृत्तम् । ऋक्शब्दे परतस्त्विशब्दसम्बन्धादिवर्णमात्रस्य लोपो भवति ।

तिस्रऋचोयत्र तत् त्रृचं सूक्तम् । अथो यदेतं त्रृचमन्वाह । तै० सं० १।५।८ ॥ त्रृच उत्तमो भवति । ता० ब्रा० १३।१।१२ ॥ त्रृचमित्यादिं भाषायाम् ।

ऋचीति किम् । त्वग्नीकः पत्यते माहिनावान् । ऋ० ३।५६।३ ॥ त्वीडं भवति चिरातस्य धृतैव । ता० ब्रा० १३।६।१४ ॥ त्वेरिति किम् । चतुर्ऋचोभवति प्रतिष्ठायै । ता० ब्रा० १३।१।११ ॥ यत्रृचा पुनरायन्त्यस्मिन् लोके प्रतितिष्ठन्ति । ता० ब्रा० ४।५।५ ॥

आदेरेमन्नादिषु ॥ ६

एमन् इतेरवमादिषु परत आदेर्लोपो भवति । अर्थाद् स्वरस्य ।

अपां त्वेमन् सादयामि । अपां त्वोद्यन् सादयामि । वा० मा० १३।५३ ॥ एमन्नादिराकृतिगणः ।

आत्मनस्त्वाकारे मन्वे ॥ ७

आकारे परे आत्मन् इत्येतस्यादेर्लोपो भवति । मन्व-विषये प्रयोगे ।

अव त्मना भरते केतवेदा अव त्मना भरते फेनमुद्दन् । ऋ०

१।१०४।३ ॥ अव त्मना धृषता शंबरं भिनत् । ऋ० १।५४।४ ॥ विश्वं तोकमुत त्मना । ऋ० १।४१।६ ॥

आत्मन इति किम् । सं प्रजया समायुषा । ऋ० १।२३।२४ ॥ आकारे इति किम् । बलं दधान आत्मनि । ऋ० ८।११३।१ ॥ यक्ष्मं सर्वस्मादात्मनः । ऋ० १०।१६३।५ ॥ आत्मन्वन्तं पक्षिणं तीव्रगाय कं । ऋ० १।१८२।५ ॥ मन्त्रे इति किम् । ब्राह्मणे मा भूत् । प्राज्ञेनात्मना संपरिष्वक्तः । बृ० उ० ४।३।२१ ॥ भवत्यात्मना प्र प्रजया पशुभिर्जायते य एवं वेद । ऐ० ब्रा० ४।२३ ॥

अन्यस्मिन्नपि दृश्यते ॥ ८

आकारादन्यस्मिन्नपि परत आत्मन्इतेरतस्यादिलोपो दृश्यते ।

प्र यद्वां बद्वस्त्मनि खादति च्यां । ऋ० १।१५८।४ ॥ त्मने तोकाय तनयाय मृड़ । ऋ० १।११४।६ ॥ उप त्मन्या वनस्पते । ऋ० १।१८८।१० ॥ उपावसृज त्मन्या समंजन् । ऋ० १०।११०।१० ॥ दृश्ग्रहणं प्रयोगानुसारार्थम् ।

यवौ प्लुतविकारयोः स्वरे ॥ ९

प्लुतविकारो वक्ष्यते । प्लुतविकारयोर्यथासंख्यं यकारवकारौ भवतः । स्वरे परे । अर्थादिप्लुतोः ।

अग्ना३इ इन्द्रं, अग्ना३यिन्द्रम् । पटा३उ उदकं, पटा३ वुदकम् । भा० । अग्ना३याग्ना । पटा३वाग्ना । का०, सि० ।

प्लुतविकारयोरिति किम् । आयुष्मतीदं परिधत्स्व वासः ।

म० ब्रा० १।१।५ ॥ क्षीरं सर्पिर्मधूदकं । सा० उ० ५।२।८।२ ॥ कथन्तर्हि, भोऽइ इन्द्र, भोऽयिन्द्र । होऽइ इन्द्र, होऽयिन्द्र । भा० । सर्व्वोऽयं छान्दसोव्यत्यय इति । भोऽयिन्द्रं साम गायति । इत्ययमपि छन्दसि दृष्टस्यानुप्रयोग इति भाष्यम् ।

स्वरे इति किम् । अग्नाऽइ । पटाऽउ । का० । ज्येष्ठश्च मन्त्रो विश्वचर्षणाऽइ । ऋ० १०।५०।४ ॥ कविः कविमियक्षसि प्रयज्याऽउ । ऋ० ६।४८।४ ॥ सवर्णे प्रयोजनम् । प्लुतविकारत्वात् सन्धिर्मा भूदित्याशङ्कानिरासार्थं स्वरग्रहणम् । कथं, अमीध्व-माधिगाऽउ इति ब्रिर्ब्रूयात् । ऐ० ब्रा० २।७ ॥ वसतीवरीष्वे कधानासु चावेरपोऽध्वर्य्याऽउ इति होता अध्वर्य्युं पृच्छति । ऐ० ब्रा० २।२० ॥ संहितायामेव सन्धयोभवन्ति । सा तु पदयोर्व्विभाषितैव । कथं, घृतैर्लव्यूतिमुक्षतं । ऋ० ३।६२।१६ ॥ अग्नेर्गव्यूतिर्घृत आ निषत्ता । ऋ० १०।८०।६ ॥ नजा निर्दिष्ट-स्यानित्यत्वात् ।

लोपस्तयोः शाकल्यस्य ॥ १०

तयोर्यकारवकारयोर्लोपो भवति । शाकल्यस्य मतेन । शाकल्यग्रहणं विकल्पार्थम् ।

आत्मन् हाऽइ इत्यध्ययत् । तै० ब्रा० २।३।६ ॥ दूराह्वानार्था श्रुतिः । तस्मै जातायामीमांसन्त गार्हपत्य प्रहरामाऽइ आग्नीध्राऽइ आहवनीयाऽइ इति । ता० ब्रा० १२।१० ॥ विचारणार्था श्रुतिः । एवम् । आग्नीध्राऽइयाहवनीयाऽइयिति ।

आङनुनासिकः प्रकृत्या ॥ ११

शाकल्यस्येति न स्मर्य्यते । आङ् अनुनासिको भवति । स च प्रकृत्या तिष्ठति । स्वरे परे ।

आमेन्यस्य रजसो यदभ्र आँ अपो हृणाना वितनोति मायिनो । ऋ० ५।४८।१ ॥ पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः । ऋ० ८।६७।११ ॥

कथं, इन्द्रो बाहुभ्यामातरत् । भा० । आगन्म हवनहंतमं । ऋ० ८।७४।४ ॥ हृषदं जिह्वयावधीत् । ऋ० ८।७२।४ ॥ वत्सं नस्त्रिभ्य आनयत् । ऋ० ८।७०।१५ ॥ आयं जना अभिचक्षे जगाम । ऋ० ५।३१।१२ ॥ सर्व्वत्र ह्याकारमवगृह्य पठन्ति । बहुलाधिकारादियमिष्टसिद्धिरिति भाष्यम् । आङोऽनर्थकस्येति तु वार्त्तिककाराः पठन्ति । विभक्त्यर्थावद्योतको ह्यनर्थकः । अन्यच्च त्वर्थवानेवासाविति । ङानुबन्धग्रहणान्निरनुबन्धस्य न स्यात् ।

अन्यत्रापि दृश्यते ॥ १२

अन्यत्राप्यनुनासिकोदृश्यते, स च प्रकृत्या तिष्ठति ।

सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे । ऋ० ८।१५।११ ॥ त्वं न इंद्रा भरँ ओजः । ऋ० ८।९८।१० ॥ विश्वेदहामि तविषीव उग्रँ ओकः क्षणुष्व हरिवो न मर्धीः । ऋ० ७।२५।४ ॥ यथाँ एष वेद निधीनां । ऋ० ८।२९।६ ॥

प्रायेण सन्ध्यक्षरेष्वेवायमनुनासिकोदृश्यते । विसर्गलोपे तु

म भवति । वराहमिंद्र एमुषं । ऋ० ८।७७।१० ॥ इन्द्रः एमुष-मिति ह्यवग्रह्णन्ति । य ओजोदातमो मदः । ऋ० ८।९२।१७ ॥ इयमिग्रहणं प्रयोगानुसारार्थम् ।

एदोतावन्तःपादमय्यवपरे ॥ १३

यश्च वश्च यवौ । यवौ परौ यस्मादसौ यवपरः । न यवपरो-ऽयवपरः । तस्मिन्नयवपरे । अयकारवकारपरे अकारे परतः पदान्ते वर्त्तमानावेकारौकारौ प्रकृत्या तिष्ठतः । तौ चेन्निमित्त-कार्य्यिणौ ऋचः पादमध्ये भवतः । ऋचामेव हि पादव्यवस्था ।

सुजाते अश्वसूनृते । ऋ० ५।७९।१ ॥ ते अग्नेऽश्वमयुक्षंस्ते अस्मिन् जवमादधुः । मा० ९।७ ॥ अध्वर्यो अद्रिभिः सुतं । ऋ० ९।५१।१ ॥ शिरो अपश्यं पथिभिः सुगेभिः । ऋ० १।१६३।६ ॥ तस्य भ्राता मध्यमो अस्त्यश्नः । ऋ० १।१६४।१ ॥ प्रकृतिभावादेदोत्परः पदान्ते लोपमकारो न प्राप्नोति । निमित्तभावोऽपि विकार एव । कथं, अयं सो अग्निर्यस्मिन्-सोममिन्द्रः । मा० १२।४७ ॥ इति वाजसनेयिनां प्रकृति-भावः । स्यादेव । त्रिष्टुप् खल्वेषा ।

एदोताविति किम् । उच्चा व्यख्यद्युवतिः पुनर्भूः । ऋ० १।१२३।२ ॥ आपो अद्यान्वचारिषं । ऋ० १।२३।२३ ॥ अन्तः-पादमिति किम् । कया मती कुत एतास एतेऽर्चंति शुष्मं हषणो वसूया । ऋ० १।१६५।१ ॥ अत्र खल्वेते इत्येकार-एकस्य पादस्यान्तः अर्चन्तीत्यकारश्चापरस्य पादस्यादिः ।

अतीति किम् । अग्न इत्येतरा गिरः । ऋ० ८।८६।२७ ॥ अयवपरे इति किम् । हिरण्यशृंगोऽयो अस्य पादाः । ऋ० १।१६३।८ ॥ हरिं नवंतेऽव ता उदन्युवः । ऋ० ८।८६।२७ ॥ यवयोः प्रत्येकं प्रतिषेधो न मिलितयोः । तेन, परिष्ठ सुवानो अव्ययं । ऋ० ९।९८।२ ॥ इत्यादयोऽप्यनुसर्त्तव्याः । व्यत्ययाद्वा । कथं, यद्वा दक्षस्य बिभ्युषो अबिभ्यत् । ऋ० ६।२३।२ ॥ आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् । ऋ० १।१६१।९ ॥ ओष्ठयोऽयं बकार इति ।

अयमव्रतावक्रमुरव्यादवद्यादवन्त्ववस्युषु च ॥ १४

अयम् अव्रत अवक्रमुः अव्यात् अवद्यात् अवन्तु अवस्यु इत्येतेषु योऽकारस्तस्मिन् परतोऽन्तःपादमेकारौकारौ प्रकृत्या तिष्ठतः । यवपरत्वादारभ्भः ।

हृषा सोमो अयं सुतः । ऋ० ५।४०।२ ॥ व्रतैः सीक्षंतो अव्रतं । ऋ० ६।१४।३ ॥ ऋचा शोचन्तः संदहंतो अव्रतान् । ऋ० ९।७३।५ ॥ मा शिवासो अवक्रमुः । सि० । अग्निः प्रथमो वसुभिर्नो अव्यात् । का० । दुहो मित्रमहो अवद्यात् । ऋ० ४।४।१५ ॥ ते नो अवन्तु पितरः । का० । कुमिकासो अवस्यवः । ऋ० ३।४२।९ ॥

अन्तःपादमित्येव । ते नोऽवन्तु ते नः पान्तु । मा० ४।११ ॥ कथं, देवानां देवो निधिपा नो अव्यात् । तै० ब्रा० २।८।४ ॥ इति तैत्तिरीयाणां प्रकृतिभावः ।

स्यादेव । कथं तर्हि, व्याघ्रोऽयमग्नौ चरति प्रविष्टः । तै० ब्रा० २।७।१५ ॥ इति तैत्तिरीयाणां, यथेच्छाम मनसा सोऽयमागात् । ऋ० १०।५३।१ ॥ तं नोऽवन्तु रथतूर्मनीषां । ऋ० १०।७७।८ ॥ इति बह्वृचानाञ्च प्रकृतिभावो नास्ति । बहुलाधिकारादिय-मिष्टसिद्धिरिति । एवमन्येऽप्यनुसर्त्तव्याः । बह्वृचैः खल्वेवमादिषु प्रायेण प्रकृतिभावो न क्रियते ।

उरो यजुषि ॥ १५

ओकारान्त उरस्शब्दोऽकारे परे प्रकृत्या तिष्ठति । यजुषि विषये ।

उरो अन्तरिक्षम् । सि० । कथं, स्वयं दास उरो अंसावपि ग्ध । ऋ० १।१५८।५ ॥ इति बह्वृचानां प्रकृतिभावः । उरः अंसौ इति हि पदकाराः पठन्ति । पूर्वेण स्यादेव । यजुषि पादाभावादनन्तःपादार्थं वचनम् ।

केचिदिह संबोधनान्तमुरुशब्दमिच्छन्ति । उदाहरन्ति च । उरो अन्तरिक्ष सजूर्देवेन । तै० स० १।३।८ ॥ त्रिष्टुभन्त्वेता-मामनन्ति । द्यावापृथिवी उरो अन्तरिक्ष । मा० ४।७ ॥ इति माध्यन्दिनीयानां प्रकृतिभावोऽपेक्षितेन व्याख्यातः । विराट् खल्वेषा ।

आपो जुषाणो वृषणो वर्षिष्ठे ॥ १६

एते प्रकृत्या तिष्ठन्ति अकारे परे यजुषि ।

आपो अस्मान्मातरः शुन्धयन्तु । मा० ४।२ ॥ देवीरापो

अपान्नपाद्य जम्भैर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवश्रा-
धत्त । तै० स० १।३।१३ ॥ जुषाणो अग्निर्वेतु स्वाहा । मा०
३।१० ॥ जुषाणो अग्निराज्यस्य । सि० । जुषाणो अंशुराज्यस्य ।
का० । हृषे अंशुभ्यां । सि० । वर्षिष्ठे अधिनाके । तै०
स० १।४।४३ ॥ उदाहरणान्तराणि शाखान्तरेषु पर्य्यन्वेष्याणि ।
एवमन्यत्र ।

कथं, नेमा आपो अनिमिषं चरंतीः । ऋ० १।२४।६ ॥
जुषाणो अस्य सख्यं । ऋ० ८।७२।२ ॥ ऋतस्य हृषे असुराय
मन्म । ऋ० ५।१२।१ ॥ वर्षिष्ठे अधि सानवि । ऋ० ९।३१।५ ॥
इति बह्वृचानां प्रकृतिभावः । स्यादेव । कथं दिव्या आपो-
ऽशान्ता आगच्छेयुः । तै० स० ६।१।३ ॥ अमन्त्रत्वात् व्यत्य-
याद्वा ।

अम्बे अम्बाले अम्बिकेपूर्व्वे ॥ १७

यावम्बे अम्बाले इतेग्रतावम्बिके इतेग्रतस्मात् पूर्व्वौ यजुषि
पठितौ, तयोरेकारः प्रश्लेषेण तिष्ठति । अकारे परे ।

अम्बे अम्बाले अम्बिके । सि० । संज्ञापूर्व्वकत्वादस्मादेव
निर्देशाद्वा अम्बे इत्यत्र ह्रस्वोऽम्बार्थानामिति न प्रवर्त्तते ।
अम्बालादयस्तु विकल्पिताएव । अम्बिकेपूर्व्वे इति किम् ।
अम्बिकेपरस्य सन्धिरेव । अम्बे अम्बिकेऽम्बालिके । मा०
२३।१८ ॥ ह्रस्वाकारानुवृत्तिर्न प्रयोजयति ।

अङ्गे च ॥ १८

एकाऽपीयं सप्तम्यर्थवशात् द्विधा भिद्यते। अङ्गे इतरत्र यएकारः अङ्गे इतीतस्मिन् परे च यावेकारौकारौ ते यजुषि प्रकृतया तिष्ठन्ति। अकारे परे।

ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यदैन्द्र उदानो अङ्गे अङ्गे निधीतः। मा० ६।२०॥ ऐन्द्रः प्राणो अङ्गे अङ्गे निदेध्यदैन्द्रोऽपानो अङ्गे अङ्गे विबोभुवत्। तै० स० १।३।१०॥ ऐन्द्रः प्राणो अङ्गे अङ्गे अदीध्यत्। ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यत्। ऐन्द्रः प्राणो अङ्गे अङ्गे अशोचिषं। का०।

धकवर्गपरे चानुदात्ते ॥ १९

धे अकार उच्चारणार्थः। धकारपरे कवर्गपरे चानुदात्ते अकारे परत एकारौकारौ यजुषि प्रकृतया तिष्ठतः।

अयं सो अध्वरः। सि०। अयं सो अग्निः। मा० १२।४७॥ अध्वरागिशब्दावन्तोदात्तौ।

धकवर्गपरे इति किम्। सोऽयमग्निमन्तः। सि०। सोऽयमग्निः सहस्रियः। का०। इत्यपि काशिकायाम्। अनुदात्ते इति किम्। अश्वोऽग्ने रुद्रे। सि०। अग्निशब्दोऽयमाद्युदात्तः। कथं, सो अध्वरान् त्सऋतून् कल्पयाति। तै० स० १।१।१४॥ ऋषीणां पुत्रो अधिराज एषः। तै० स० १।३।७॥ हविष्मान् देवो अध्वरः। तै० स० १।३।१२॥ इति तैत्तिरीयाणां

प्रकृतिभावः । स्वरितो हि सर्व्वत्राकार पठ्यते । उदात्तग्रहणत्वात् छान्दसाद्वत्यर्थाद्वा ।

अवपथासश्च ॥ २०

चकारेणानुदात्ते इत्यनुकृष्यते । अवपथास् इत्येतस्य योऽनुदात्तोऽकारः तस्मिन् परतो यजुषेयकारौकारौ प्रकृत्या तिष्ठतः ।

त्री रुद्रेभ्यो अवपथाः । सि० । वपेः पञ्चम्यास्थास्, अन् विकरणः अड़ागमः । निहन्यते खल्वनाख्यातान्तादाख्यातान्त्स्यादिः स्वरः । अनुदात्ते इति किम् । यद्रुद्रेभ्योऽवपथाः । सि० । यदादिनिपातयोगे निघातप्रतिषेधादुदात्तोऽयमकार इति ।

विभाषा गोः ॥ २१

अनुदात्ते इति यजुषीति च निवृत्तम् । गोशब्दस्य योकारः स प्रकृत्या तिष्ठति वा अकारे परे ।

दण्डा इवेद्गवो अजनास आसन् । ऋ० ७।३२।६ ॥ अपशवो वा अन्ये गो अश्वेभ्यः पशवो गोऽश्वाः । का० । गोरिति किम् । अन्येषां विभाषा मा भूत् । अतीतेरव । शूरो न मित्रा वरुणा गविष्टिषु । ऋ० ५।६३।५ । भाषायामपि । गोअग्रं गोऽग्रमिति मतम् ।

ईषाग्रच्चादिषु ॥ २२

अतीति निवृत्तम् । विभाषा न स्मर्य्यते । ईषाग्रच्चादिषु प्रकृत्या तिष्ठति । अर्थात् पूर्व्वपदम् ।

ईषा अच्छो हिरण्ययः । ऋ० ८।५।२९ ॥ का ईमरे पिशं-गिला का ईं कुरुपिशङ्गिला * । मा० २३।५५ ॥ ज्या इयं समने पारयंती । ऋ० ६।७५।३ ॥ पूषा अविष्टु माहि नः । ऋ० १०।२६।१ ॥ यथा अङ्गदः । मा० । पथा अगमन् । का० । ईषाअच्छादिराकृतिगणः ।

न नृपतीवादिषु ॥ २३

नृपतीवादिषु पूर्व्वपदं न प्रकृत्या तिष्ठति ।

उग्रेव रुचा नृपतीव तूर्ये । ऋ० १०।१०६।४ । नृपती इव इति ह्यवग्रहन्ति । नृपतीवादिराकृतिगणः ।

इति चान्द्रकाल्यां कातन्त्रच्छन्दःप्रक्रियायां सन्धौ प्रथमः पादः ।

* इत्थमेव सिद्धान्तकौमुद्यां पठितम् । भाष्यकारेणापि, अरे होतः का च पिशङ्गिला—इत्यादि व्याख्यातम् । अध्येतारोऽपि काश्यादिदेश्या इत्थमेव पठन्ति । हस्त-लिखिते काश्यादिपुस्तकेऽपीत्थमेव पाठः । मुद्रितपुस्तके कईमित्यादि पाठः प्रामा-दिक इति लक्ष्यते । तत् पाठस्य प्रामाणिकत्वे छान्दसो ह्रस्व आश्रेयः ।

सन्धौ द्वितीयः पादः ।

प्लुतो वाक्यस्यान्त्यस्वरस्य ॥ २४

वाक्यस्य योऽयमन्त्यः स्वरस्तस्य प्लुतो भवतीत्यधिकृतं वेदितव्यम् । वाक्ये यावन्ति पदानि, तावतामन्त्यस्य स्वरस्य प्लुतो मा भूदिति वाक्यग्रहणम् । वाक्ये यावन्तः स्वरास्तावतां प्लुतनिरासार्थमन्त्यग्रहणं व्यञ्जनान्तस्याप्यन्त्यस्वरस्य प्लुतार्थञ्च । स्वरग्रहणं स्पष्टार्थम् ।

दूराह्वाने बहुलम् ॥ २५

प्राकृतात् प्रयत्नाद्विशेषेऽनुपादीयमाने यत्र सन्देहो भवति श्रोष्यति न वा श्रोष्यतीति, तदिह दूरमभिप्रेयते ।

दूराह्वाने यद्वाक्यं तस्य बहुलं प्लुतो भवति । सुश्लोकाँ३ सुमङ्गलाँ३ सत्यराजा३न् । तै० ब्रा० १।७।१० ॥ अत्र पदानां प्लुतिः । ब्रह्माँ३ त्वं राजन् ब्रह्मासि । तै० ब्रा० १।७।१० ॥ अत्र पूर्वपदमात्रस्य । आत्मन् हा३दित्यह्वयत् । तै० ब्रा० २।३।६ ॥ अत्रान्तपदस्य । भाषायान्त्वन्त्यपदस्यान्त्यस्वरः प्लवते । आगच्छ भो देवदत्ता३ । दूराह्वानं गानरोदनयोरप्युपलक्षणमिच्छन्ति । भाष्यवार्त्तिकयोस्तु नैतच्चिन्तितम् ।

आमन्त्रिते च ॥ २६

आमन्त्रिते च बहुलं प्लुतो भवति ।

अग्ना३इ पत्नीवा३: सजूर्देवेन त्वष्ट्रा सोमं पिब । तै० स० १।४।२७ ॥ न च भवति । अग्न आयाहि वीतये । सा० छ० १।१।१।१ ॥ भाषायामपीति केचित् ।

हैहेप्रयोगे तयोरेव ॥ २७

दूराह्वाने यद्वाक्यं तत्र है हे इत्येतयोः प्रयोगे तयोरेव प्लुतो-भवति ।

देवदत्त है३ । देवदत्त हे३ । तयोरित्यनन्तगार्थम् । है३ देवदत्त । हे३ देवदत्त । इति भाष्यस्थितिः । निगमे त्वत्र प्लुतविकारमधीयते । आत्मन् हा३इत्यह्वयत् । तै० ब्रा० २।३।६ ॥ इति तैत्तिरीयाः । है शब्दे योऽयमेकारः तस्य प्लुत आकार इकारशिरस्क आदेशो भवति । दूराह्वानार्थः प्लुत इति तन्नाष्यम् । तयोरेवेत्यन्यस्य प्लुतो न स्यात् ।

प्रत्यभिवादेऽस्त्रीशूद्रयोः ॥ २८

अभिवाद्यमानस्याग्रेः प्रयोगः प्रत्यभिवादः । तत्र यद्वाक्यं तस्यान्त्यस्वरस्य प्लुतो भवति । स्त्रीशूद्रयोरन्यत्र ।

अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि देवदत्त३ । अस्त्रीशूद्रयोरिति किम् । अभिवादये गार्ग्योऽहं भोः । आयु-

मती भव गार्गि । अभिवादये तुषजकोऽहं भोः । कुण्डलो भव तुषजक । वार्त्तिके त्वसूयकेऽपि प्रतिषेधः । अभिवादये स्थाल्यहं भोः । आयुष्मानेधि स्थालिन् । असूयकस्त्वमसि जाल्म न त्वं प्रत्यभिवादनमर्हसि भिद्यस्व दृषत स्थालिन्निति पुनर्भाष्यस्थितिः ।

भोराजन्यविशां वा ॥ २९

प्रत्यभिवादने यदाकं तत्र भोःशब्दस्य राजन्यविशोश्चान्त्यस्वरस्य प्लुतो भवति वा ।

अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि देवदत्त भोऽ३ः । आयुष्मानेधि देवदत्त भोः । केचित् प्रत्यभिवादवाक्ये सर्व्वस्यैव नाम्नो भोरादेशं विभाषयेच्छन्तस्तस्यैवामुं प्लुतविकल्पमाहुः । तेषामुदाहरणम् । अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि भोऽ३ः । आयुष्मानेधि भोः । आयुष्मानेधि देवदत्तऽ३ । राजन्यविशोः खल्वपि । अभिवादये इन्द्रवर्म्माहं भोः । आयुष्मानेधीन्द्रवर्म्मऽ३न् । आयुष्मानेधीन्द्रवर्म्मन् । अभिवादये इन्द्रपालितोऽहं भोः । आयुष्मानेधीन्द्रपालितऽ३ । आयुष्मानेधीन्द्रपालित ।

गुरोरनन्त्यस्याप्यन्तः पर्य्यायेण ॥ ३०

ऋकारवर्जितस्यान्त्यस्यानन्त्यस्य च गुरोः स्वरस्य पर्य्यायेण प्लुतो भवति । उभयोर्विभाषयोर्मध्ये विधिर्नित्यः ।

देऽ३वदत्त । देवदऽ३त्त । देवदत्तऽ३ । गुरोरिति किम् । वकारात् परस्य लघोर्मा भूत् । अन्त इति किम् । कृष्णमिऽ३च ।

क्षणमित्र३। दूराह्वानादौ यः प्लुतोविहितस्तस्यैव स्थानिविशेषोपदेशोऽयमित्येके। दूराह्वानमात्रगोचरोऽयमित्यन्ये। भाष्ये तु नैष विशेषश्चिन्तितः।

भर्त्सने द्विरुक्तस्य ॥ ३१

द्विरुक्तस्य पर्य्यायेण प्लुतो भवति। भर्त्सने गम्यमाने।

चौर३ चौर। चौरचौर३। कुशील३ कुशील। कुशील कुशील३। भा०। द्वषल३ द्वषल। द्वषल द्वषल३। दस्यो३ दस्यो। दस्योदस्यो३। घातयिष्यामि त्वा, बन्धयिष्यामि त्वा। का०। भर्त्सने इति किम्। देवदत्त देवदत्त त्वरस्व रागच्छति।

पूर्व्वस्यासूयासम्मतिकोपकुत्सनेष्वन्यतरस्याम् ॥ ३२

द्विरुक्तस्य यः पूर्व्वोभागस्तस्यान्त्यस्य स्वरस्य प्लुतो भवति वा। असूयासम्मतिकोपकुत्सनेषु गम्यमानेषु।

असूयायाम्। अभिरूपक३ अभिरूपक रिक्तं ते आभिरूप्यम्। का०। सम्मतौ। अभिरूपक३ अभिरूपक शोभनं खल्वाभिरूप्यं भवतः। कोपे। अविनीतक३ अविनीतक इदानीं श्वासग्रसि जाल्म। का०। कुत्सने। शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः। का०। कन्ये३ कन्ये। शाक्तीके३ शाक्तीके। भा०। पक्षे, कन्ये कन्ये३। शाक्तीके शाक्तीके३ इति प्लुतान्तमुदाहृतं भाष्ये। जयादित्येन तु माणवक माणवकेत्यप्लुतान्तमिति। केचिदिह विकल्पं नेच्छन्ति।

हेः पृष्टप्रतिवचने ॥ २३

पृष्टस्य प्रतिवचने विषये हेः प्लुतो भवति वा।

अकार्षीः कटं देवदत्तेति प्रश्नः। तस्य प्रतिवचनम्। अकार्षं हि३। अकार्षं हि। का०। पृष्टप्रतिवचने इति किम्। कटं करिष्यति हि। का०। हृषी वहति रथं हि। हेरिति किम्। करोमि ननु। का०॥

निगृह्यानुयोगे च ॥ २४

उपपत्त्या स्वमतात् प्रच्यावचनमिह निग्रहः। अनुयोगस्यैव मतस्याविष्करणम्। निगृह्यानुयोगे यद्वाक्यं तस्यान्त्यस्वरस्य प्लुतो भवति वा।

अनित्यः शब्द इत्याह३। अनित्यः शब्दइत्याह। का०। अनित्यः शब्द इत्येवंवादिनमुपपत्तिभिः स्वमतात् प्रच्याव्य साभ्यसूयमिव किलैवमनुयुङ्क्ते। अद्यामावस्येत्याह३। अद्यामावस्येत्याह। का०। अद्यामावस्येत्येवंवादिनं युक्त्या स्वमतात् प्रच्याव्य साभ्यसूयमिव खल्वेवमनुयुङ्क्ते।

साकाङ्क्षस्याङ्गयुक्तस्याख्यातस्य॥ २५

अन्यतरस्यामिति न स्मर्य्यते। भर्त्सनम्त्वनुवर्त्तते। अङ्ग इत्यनेन युक्तस्य साकाङ्क्षस्याख्यातस्य योऽयमन्तः स्वरस्तस्य प्लुतो-भवति। भर्त्सने गम्यमाने।

अङ्ग कूज३ ; अङ्ग व्याहर३ ; इदानीं ज्ञास्यसि जाल्म। का०। कूजनादिफलमधुनैव ज्ञास्यसीत्यर्थः। साकाङ्क्षस्येति किम्। अङ्ग पच। का०। नैतदपरमाकाङ्क्षति। अङ्ग-युक्तस्येति किम्। तावत् क्रीड़; अञ्जसा ज्ञास्यसि जाल्म। आख्यातस्येति किम्। अङ्ग देवदत्त मिथ्या वदसि। का०। भर्त्सने इत्येव। अङ्गाधीष्व भक्तं ते दास्यामि। का०।

आचारभेदाशीःप्रैषेषु च ॥ २६

अङ्गयुक्तस्येति भर्त्सने इति च न सम्पद्यते। आचारोल्लङ्घनमाचारभेदः। इष्टार्थस्याशंसनमाशीः। शब्देन व्यापारणं प्रैषः। एतेष्वर्थेषु गम्यमानेषु साकाङ्क्षस्याख्यातस्य योऽन्त्यः स्वरस्तस्य प्लुतो भवति।

आचारभेदे तावत्। स्वयं ह रथेन यातिश उपाध्यायं पदातिं गमयति। सि०। स्वयमोदनं ह भुङ्क्तेश उपाध्यायं सक्तून् पाययति। पूर्वं खल्वत्राख्यातमुत्तरमाकाङ्क्षति। आशिषि। सुतांश्च लप्सीष्टश धनञ्च तात। छन्दोऽध्येषीष्टश व्याकरणं च भद्र। का०। प्रैषे। कटं कुरुश ग्रामं च गच्छ। यवान् लुनीहिश सक्तूंश्च पिब।

एष्विति किम्। वेदञ्चाधीते व्रतं चाचरति। उपाध्यायं रथेन गमयति स्वयं पदातिर्व्रजति। साकाङ्क्षस्येत्येव। दीर्घं ते आयुरस्तु। का०। अग्नीदग्नीन् विहर। सि०। आचारभेदे त्वाख्यातं नित्यमितरदाकाङ्क्षति।

चिदित्युपमार्थे प्रयुज्यमाने ॥ २७

उपमार्थश्चिदित्ययं निपातो यस्मिन् वाक्ये प्रयुज्यते तस्य वाक्यस्य योऽन्त्यः स्वरस्तस्य प्लुतो भवति ।

अग्निचिच्चायाऽ३त् । राजचिच्चायाऽ३त् । का० । अग्निरिव भायात्, राजेव भायादित्यर्थः । चितीति किम् । अग्निरिव भायात् । उपमार्थे इति किम् । कथंचिदाहुः । का० । प्रयुज्यमाने इति किम् । अग्निर्माणवको भायात् । का० ।

प्रतिश्रुतौ च ॥ २८

प्रतिश्रुतिरभ्युपगमः प्रतिज्ञा श्रवणाभिमुख्यं च । प्रतिश्रुति-विषये यद्वाक्यं तस्यान्त्यस्वरस्य प्लुतो भवति ।

अभ्युपगमे । गां मह्यं देहि भोः । हन्त तुभ्यं ददामिऽ३ । प्रतिज्ञायाम् । नित्यः शब्दो भवितुमर्हतिऽ३ । का० । श्रवणाभिमुख्ये । देवदत्त भोः किमात्थऽ३ । का० । देवदत्तेन यदुक्तं तदसम्यक् श्रुत्वा किलैवमाह । श्रवणाभिमुख्यं खल्वत्र गम्यते ।

विचार्यमाणे सर्वेषाम् ॥ २९

प्रमाणैरर्थपरीक्षणं विचारः । योऽर्थः परीक्ष्यते सोऽयं विचार्यमाणः । इह तु विचारस्याङ्गभूतो विमर्शो येन वाक्येन प्रदर्श्यते, तद्वाक्यं विचार्यमाणविषयमित्युच्यते । विमृष्टे हि विषये विचारः प्रवर्त्तते । विचार्यमाणविषये यावन्ति वाक्यानि प्रयुज्यन्ते तावतामन्त्यस्वरस्य प्लुतो भवति ।

तिष्ठेद्यूपाऽइ अनुप्रहरेऽइदित्याहुः। ऐ० ब्रा० २।३॥ यूपे तिष्ठेदनुप्रहरेत् न वेति विचार्य्यते। होतव्यं दीक्षितस्य गृहाऽइ। का०। होतव्यं न होतव्यमिति विचार्य्यते। सर्व्वत्र प्लुतविकारः। तथा। अधः स्विदासीऽइदुपरि स्विदासीऽइत्। ऋ० १०।१२९।५॥ अधश्चासीदुपरि वेति विचार्य्यते। एवं, होतव्यमग्निहोत्राऽइ न होतव्याऽइमिति। तै० ब्रा० १।१।६॥ प्राश्याऽइ न प्राश्याऽइमिति। तै० ब्रा० १।३।१०॥ प्र चातुर्मास्य-याजी मीयताऽइ न प्रमीयताऽइ इति। तै० ब्रा० १।४।१०॥ उपस्थेयोऽग्नीऽइर्नोपस्थेयाऽइ इत्याहुः। तै० स० १।५।८॥ भाषायान्त्वेवम्भूतविषये पूर्व्वं प्लवते।

प्रश्नाख्यानयोः पदानाम्॥ ४०

प्रश्ने आख्याने च यद्वाक्यं वर्त्तते, तस्य सर्व्वेषां पदानामन्त्य-स्वरस्य प्लुतो भवति।

प्रश्ने। अगमऽः पूर्व्वाऽन् ग्रामाऽन्। आख्याने। अगमऽं पूर्व्वाऽन् ग्रामाऽन्। कथं, उताविद्वानमुं लोकं प्रेत्य कथ्थन गच्छतीऽ। तै० उ० २।६॥ वेत्थ यथा पुनरावर्त्तन्ताऽइति, वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्त्तनाऽइति। छा० उ० ५।९।२॥ इतेरवमादौ पदानां प्लुतो नास्ति। भूयानेवमादिः प्लुतव्यत्ययो निगमे इति।

ओमारम्भे ॥ ४१

आरम्भविषये य ओम् इतिशब्दस्तस्य प्लुतो भवति। इहार्थात् स्वरएव प्लवते। ब्रह्मणः प्रणवं कुर्य्यादादावित्यादिना योऽयमोङ्कारो ब्रह्मणोऽनवयवएव सन्नध्ययनारम्भे प्रयुज्यते, सोऽयमारम्भविषय इत्युच्यते। यस्तु वाक्यावयव एव पठ्यते, नासावारम्भविषयः।

ओ३म् अग्निमीले पुरोहितं। ऋ० १।१।१ ॥ आरम्भे इति किम्। ओमितेतदक्षरमुद्गीथमुपासीत। छा० उ० १।१।१ ॥ ओमित्येतदक्षरमिदं सर्व्वं। मा० उ० १ ॥

बहुलमंगीकारे ॥ ४२

अङ्गीकारेऽर्थे योऽयमोङ्कारस्तस्य बहुलं प्लुतो भवति।

यद्वै देवानां नेति तदेषामो३मिति। ऐ० ब्रा० १।३।५ ॥ न च भवति। ओमिति वै दैवं तथेति मानुषं। ऐ० ब्रा० ७।३।६ ॥ यद्वै नेत्यृचि ओमिति तत्। श० ब्रा० १।४।१।३ ॥ यद्धि किं चानुजानात्योमितेव तदाह। छा० उ० १।१।८ ॥

यज्ञकर्म्मण्यावहश्रौषड्वौषड्ब्रूहि-प्रेषाणामादेः ॥ ४३

आवह श्रौषट् वौषट् ब्रूहि प्रेष्य इतीतेषामादेः स्वरस्य प्लुतोभवति। यज्ञकर्म्मणि विषये। यज्ञकर्म्मणि खल्वेतानि तत्र तत्र विहितानि कल्पसूत्रादिषु।

अग्निमाऽवह। सोमस्याग्ने वीही वौऽषट्। बह्वृचाः किल सर्व्वासां याजयानामन्ते वौषट् इति प्रयुञ्जते प्लावयन्ति च तस्यादिस्वरम्। अग्नयेऽनुब्रूऽहि। अग्नये गोमयान् प्रेऽष्य। बहुलाधिकारात्, आवह देवान् यजमानाय। आश्व० श्रौ० १।३।६ इत्यत्र न प्लवते। सांख्यायनश्रौतसूत्रभाष्ये तु, देवशब्देनात्र यागाभावान्न प्लुतिरित्युक्तम्।

यज्ञकर्म्मणीति किम्। अग्निमावह। अस्तु श्रौषट्। सोमस्याग्ने वीही वौषट्। अग्नयेऽनुब्रूहि। अग्नये गोमयान् प्रेष्य। तथा। अस्तु श्रौषट् पुरो अग्निं। ऋ० १।१३८।१॥ स्वाध्यायकाले मा भूत्॥

परस्य च प्रेषणेऽग्नीधः॥ ४४

अग्निमिन्धे इत्यग्नीध ऋत्विग्विशेषः। आग्नीध्र इति चोच्यते। तस्य प्रेषणे विषये आदेः स्वरस्य ततः परस्य च स्वरस्य प्लुतो भवति। तेनोभयं प्लवते।

ओ३ श्रा३ वय। श्रा३ श्रा३ वय। भा०। इत्यमेवैतदुदाहृतं भाष्ये। केचिदुभयत्रादिस्वरमेव प्लावयन्ति। प्रयुञ्जते च तथैव तत्रभवन्तो याज्ञिकाः। तथा। उद्धर३ उद्धर। आहर३ आहर। भा०। अभिहर३ अभिहर। का०। बहुलाधिकारात् प्लुतव्यत्ययः।

प्रेषणे इति किम्। अस्तु श्रौ३षट्। इत्यनुवचने मा भूत्। अग्नीध इति किम्। अवेरपोऽध्वर्य्या३उ सोमयागे प्रातः-

सवने वसतीवरीग्रहणकाले अध्वर्युं प्रति होतुः प्रैषोऽयम् । अग्नये समिध्यमानायानुब्रूहि । तै० ब्रा० २।२।७ ॥ अनुब्रूहीति मन्त्रपाठः । अयमपि होतुः प्रैषः । अभिषोतारः एतदाह्वयत आवस्तुतमेहि यजमान । श्रौ० प० नि० ३७५। ज्योतिष्टोमे माध्यन्दिने सवने आवस्तुत्प्रैषोऽयम् ।

ये यजामहेपरस्य ॥ ४५

ये इति लुप्तविभक्तिकं पदम् । यजामहे इत्येतत् परं यस्मादिति विग्रहः । यजामहेपरस्य ये इत्येतस्य प्लुतो भवति । यज्ञकर्मणि । इच्छार्थात् स्वरएव प्लवते ।

ये३ यजामहे । बह्वृचाः किलानुयाजवर्ज्जितानां याज्यानामादौ ये यजामहे इति प्रयुञ्जते । प्लावयन्ति च येशब्दम् । तदिदमागूरित्याचक्षते ।

ये इति किम् । द्रविणोदो यजामहे । ऋ० १।१५।१० ॥ यजामहेपरस्येति किम् । ये देवासो दिव्येकादश स्थ । ऋ० १।१३९।११ ॥ ये बर्हिषो नमोवृक्तिं न जग्मुः । तै० स० १।८।२१ ॥ आगूरेव वैवं परिचायते । ये यजामहः प्लुतादिः पुरस्तादुयाज्यानाम् । सा० १।२।२ ॥ इति च सांख्यायनीये कल्पे । यज्ञकर्मण्येव । स्वाध्यायकाले तु न प्लवते । ये यजामहे । ये यजामहे इति पश्चात्वरं । तै० स० १।६।११ ॥

याज्यानामन्तस्य ॥ ४६

अन्तास्वरस्येति वर्त्तते । याज्या नाम याज्याकाण्डे पठ्यमानाहविस्त्यागार्थर्क्चः प्रयोगकाले होत्रा पठ्यन्ते । याज्यानां योऽयमन्तोऽन्तास्वरस्तस्य प्लुतो भवति । यज्ञकर्म्मणि ।

जुषाणो अग्निराज्यस्य हविषो वेतू३ । आश्व० श्रौ० १।५।२९ ॥ पूर्व्वस्याज्यभागस्य याजेयम् । जुषाणः सोम आजस्य हविषो वेतू३ । आश्व० श्रौ० १।५।२९ ॥ इयमुत्तरस्याज्यभागस्य । वेतु इति मन्त्रपाठः । जिह्वामग्ने चक्षुषे हव्यवाहं३ । ऋ० १०।८।६ ॥ हव्यवाहमिति मन्त्रपाठः । इयं दर्शपूर्णमासयोराग्नेयस्य । सहस्तमा सहसा वाजयंता३ । ऋ० ६।६०।१ ॥ इयमैन्द्राग्नस्य । समिधः समिधो अग्न आजस्य व्यन्तू३ । सा० भा० १।७।१ ॥ इयं प्रथमस्य प्रयाजस्य । एवमन्यत्रापि ।

याजयानामिति किम्। अन्येषां मा भूत् । चिकित्वाँ अनुमन्यतां । तै० स० ३।१।४ ॥ सोऽयं पशूपाकरणमन्त्रः । अन्तस्येति किम् । याजया नाम ऋचो वाक्यसमुदायरूपाः, तच्च यावन्ति वाक्यानि तावतामन्तास्वरस्य प्लुतः प्राप्नोति, इष्यते त्वन्तस्य । तदेतदर्थमन्तग्रहणम् । केचिदृक्समुदायो याजयास्तत्र प्रत्यृचं प्लुतः प्राप्नोति ऋक्समुदायस्य प्लुतार्थमन्तग्रहणमित्याहुः । याज्ञिकास्त्वत्रभवन्तः प्रत्यृचमन्तास्वरं प्लावयन्ति । यज्ञकर्म्मणीतिव । स्वाध्यायकाले तु न प्लवते ।

**पूर्व्वयोः सन्ध्यक्षरयोरप्रगृह्ययोः प्लुताकारपूर्व्वा-
विदुतावामन्त्रितप्रश्नान्ताभिपूजितविचार्य्यमाण-
प्रत्यभिवाद्यायाज्ञान्तेषु पाणिनेः ॥ ४७**

अप्रगृह्ययोः पूर्व्वयोः सन्ध्यक्षरयोः स्थाने प्लुताकारपूर्व्वा-विदुतावादिश्येते । आमन्त्रितादिषु विषये । पाणिनेराचार्य्यस्य मतेन । सन्ध्यक्षरयोरेकं पूर्व्वमैकारमपेक्ष्यान्यदौकारमपेक्ष्य । ययोः सन्ध्यक्षरयोः सन्धिर्निषिद्धस्ते प्रगृह्ये विपरीते त्वप्रगृह्ये । तेन, एकारस्य आ३इ ओकारस्य आ३उ इति प्लुतविकारः सम्पद्यते । सन्ध्यक्षरयोः किल द्वावंशावाचक्षते । पूर्व्वोऽंशो-ऽकारः परश्चेदुती । तत्राकारः प्लवते ।

आमन्त्रिते । पात्नीवन्तं ग्रहं गृह्णाम्यग्ना३इ पत्नीवा३: सजूर्देवेन त्वष्ट्रा सोमं पिब । तै० स० १।४।२७ ॥ शमीध्व-मध्रिगा३उ इति ब्रूयात् । ऐ० ब्रा० १।७ ॥ वसतीवरी-ष्वेकधानासु चावेरपोऽध्वर्या३उ इति होता अध्वर्य्युं पृच्छति । ऐ० ब्रा० २।२० । प्रश्नान्ते । वेत्थ यथाऽयं लोको न संपूर्यता३ इति । छा० उ० ५।३।२ । आगम३: पूर्वा३न् ग्रामा३-नग्निभूता३इ । अगम३: पूर्वा३न् ग्रामा३न् पटा३उ । भा० । अभिपूजिते । भद्रं करोषि अग्निभूता३इ । भद्रं करोषि पटा३ उ । का० । सिद्धोऽसि माणवक अग्निभूता३इ । सिद्धोऽसि माणवक पटा३उ । भा० । विचार्य्यमाणे । होतव्यं दीक्षि-तस्य गृहा३इ । तिष्ठेद्धूपा३इ । ऐ० ब्रा० २ । ४ । दीक्षि-

तस्य गृहे होतव्यं न होतव्यमिति यूपे तिष्ठेत्र तिष्ठेदिति विचार्यते। प्रत्यभिवादे। आयुष्मानेधि अग्निभूता३ इ। आयुष्मानेधि पटा३उ। का०। याजयान्ते। स्तौमैर्विधेमाग्नया३इ। ऋ० ८।४३।११। अग्नये इति मन्त्रपाठः। प्रातःसवने प्रस्थितयाजेषम्। कविः कविमियक्षसि प्रयजया३उ। ऋ० ६।४८।४। प्रयजयो इति मन्त्रपाठः।

कथं, आहो विद्वानमुं लोकं प्रेत्य कश्चित् समश्नुता३उ। तै० उ० २।६। नेयं संध्यक्षरस्य प्लुतिः, किंतु समश्नुते उ इति स्थिते अयादेशे यलोपे चाकारः प्लवते।

एष्विति किम्। विष्णुभूते विष्णुभूते३ घातयिष्यामि त्वाम्। का०। अप्रगृह्ययोरिति किम्। अधिश्रियं शुक्रपिशं दधाने३। ऋ० १०।११०।६। पदान्तस्य प्रगृह्यत्वादप्रगृह्यस्यापि पदान्तस्यैव ग्रहणम्। तेनापदान्तें यथाप्राप्तएव प्लुतः। तिष्ठे द्यूषा३इ अनुप्रहरे३दित्याहुः। ऐ० ब्रा० २।४। तदाहुः सर्पे३त् न सर्पे३दिति। ऐ० ब्रा० २।४०। एवमन्यत्रापि। भाषायामपि प्रश्नान्तादिष्विति मतम्। गुणविधिरयम्।

चतुर्मात्रः परयोः ॥ ४८

परयोः संध्यक्षरयोः चतुर्मात्रः प्लुतोभवति। पाणिनेराचार्यस्य मतेन। एकं परमेकारमपेक्ष्यान्यदोकारमपेक्ष्य। दृहाप्यन्तिमांशस्य प्लुतौ पूर्वेणांशेन चतुर्मात्रं संध्यक्षरं संपद्यते। ऐ४तिकायन। औ४पगव।

याज्यान्ते तालव्योष्ठ्ययोः सांख्यायनस्य ॥ ४९

याज्यान्ते स्थितयोरप्रगृह्ययोस्तालव्ययोरोष्ठ्ययोश्च संधाक्षरयोः स्थाने प्लुताकारपूर्वाविदुतावादिश्येते। सांख्यायनस्याचार्यस्य मतेन। तालव्यत्वमोष्ठ्यत्वं चाभिप्रेत्य द्विवचनम्। तेन, तालव्ययोरेकारैकारयोः स्थाने प्लुताकारपूर्वइकारः, ओष्ठ्ययोरोकारौकारयोः स्थाने प्लुताकारपूर्व उकारो भवतीत्यर्थः सम्पद्यते।

तत्र, एकारौकारयोरुदाहृतम्। ऐकारौकारयोः खल्वपि। आदिद्वसूनि प्र च वाचास्मा३इ। इन्दुं समह्यन् पीतये समस्मा३इ। सा० भा० १।२।४॥ अस्मै इति मन्त्रपाठः। समुदेष्ट्री दधातु ना३उ। सा० भा० १।२।५॥ नौ इति मन्त्रपाठः। सहस्रस्थूणं बिभृतः सह द्वा३उ। ऋ० ५।६२।६॥ द्वौ इति मन्त्रपाठः।

इहाप्रगृह्यत्वविशेषणमेकारौकारयोरर्थवत्। शिष्टयोः प्रगृह्यत्वासम्भवात्। अथामन्त्रितजः खल्वोकारो याज्यान्ते, स तु प्रगृह्यएव। सत्यम्। किन्तु बाष्कलानामप्रगृह्यस्तदर्थं वचनमित्यानर्त्तीयाः।

प्रणवोऽन्त्याक्षरादेः सामिधेन्यादौ यथोपदिष्टम् ॥ ५०

क एष प्रणवो नाम। पादस्य वा अर्धर्चस्य वा अन्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारमोंकारं वा विदधति, तं प्रणवमित्याचक्षते इति भाष्यस्थितिः। उत्तमस्य च

छन्दोमानसग्रोर्ध्वमादिव्यञ्जनात् स्थान ओकारः प्लुतस्त्रिमात्रः शुक्लो मकारान्तोवा तं प्रणवइत्याचक्षते इति च सांख्यायनीये कल्पे। ऋगन्ते भवस्य केवलस्य सव्यञ्जनस्य वा स्वरस्य छन्दोमानमिति तान्त्रिकी संज्ञा।

यज्ञकर्म्मणि विषये सामिधेन्यादेर्योऽयमन्त्रस्वरादिरवयवस्तस्य स्थाने प्लुतः प्रणव आदेष्टव्यः। यथोपदिष्टं कल्पादिषु; तमनतिक्रम्येत्यर्थः।

सामिधेन्याम्। नि होता सत्सि बर्हिषोऽ३म्। ऋ० ६। १६।१० ॥ बर्हिषीति मन्त्रपाठः। देवाञ्जिगाति सुम्नयोऽ३म्। ऋ० ३।२७।२ ॥ सुम्नयुरिति मन्त्रपाठः। उत्तमस्य चेति चशब्दात् क्वचिदुत्तमाट्टगच्चरादित्यानन्तीयाः। तत्रोदाहरणं तेषामेव। भवतं दाशुषे मयः ओ३म्। सा० भा० १।१।१९ ॥

कल्पोपदिष्टे त्ववसाने चतुर्मात्रं प्रणवं याज्ञिकाः कुर्वन्ति। याज्ञिकी हि प्लुतिश्चतुर्मात्रेत्याचक्षते। या त्वाम्नायपठिता व्याकरणानुशिष्टा च सा यज्ञेऽपि प्रयुज्यमाना त्रिमात्रैव भवति। यथा, अधः स्विदासीऽ३दिति वाचःस्तोमे प्रयुज्यमाना त्रिमात्रैव प्रयुज्यते। एवमन्यत्र।

यथोपदिष्टमित्यनेनादेर्व्यवस्थावाचित्वं दर्शयति। तेन पुरोनुवाक्यादावपि। तत्र पुरोनुवाक्यायाम्। समिद्धः शुक्र-आहुतोऽ३म्। ऋ० ६।१६।३४ ॥ आहुतः इति मन्त्रपाठः। पूर्वस्याजयभागस्य पुरोनुवाक्येयम्। अनुशंसने। आ नः मृळत्रूतिभिः सीद सादनोऽ३म्। ऋ० २।२३।१ ॥ सादनमिति

मन्त्रपाठः । ज्योतिष्टोमे प्रवर्ग्यकर्म्मणि होतुरनुशंसनमिदम् । शस्त्रे । यज्जरित्रे यज्जरित्रो३म् । ऐरयेथामैरयेथो३म् । आ० श्रौ० सू० ७।१।१२ ॥ सत्रे अङ्ग उत्तमे शस्त्रे परिधानीयाया-उत्तमे वचने उत्तमं चतुरक्षरं द्विरभ्यस्यान्ते किलैवं प्लुतः प्रणवमादिश्यते । एवन्योऽप्यस्य विषयः कल्पसूत्रादिभ्यो बुभुत्सितव्यः ।

अन्यत्रापि दृश्यते ॥ ५१

यत्र यत्र प्लुतो विहितस्तदन्यत्रापि प्लुतो दृश्यते । इषं जरित्रे नद्यो३न पीपेः । ऋ० ४।१६।२१ ॥ सुप्राव्ये३ यजमानाय सुन्वते । ऋ० १०।१२५।२ ॥ निंसानं जुह्वो३ मुखे । ऋ० ८।४३।१० ॥ शग्ध्यू३षु शचीपते । ऋ० ८।६१।५ ॥

मच्चित्युकारः प्लवते सर्व्वत्राप्यपदान्तभाक् ।
सुता याहीत्यतोऽन्येषु पदेष्वच्छेति विग्रहे ॥

इत्येवमादिप्रातिशाख्यादिविहितानामाम्नायपरिपठितानाञ्च प्लुतानामुपसंग्रहार्थमिदम् ।

इति चान्द्रशान्त्यां कातन्त्रच्छन्दःप्रक्रियायां सन्धौ द्वितीयः पादः ।

सन्धौ तृतीयः पादः ।

स्वरान्तर्ढढयोर्ढ्ळौ बह्वृचानाम् ॥ १

बह्वृचानां समाम्नाये स्वरद्वयमध्यवर्त्तिनोर्डकारढकारयोः स्थाने ळकारळ्हकारावादिश्येते यथासंख्यम् ।

तमीळत प्रथमं यज्ञसाधं । ऋ० १।८६।३ ॥ इळस्य चिन्नीमतो वि व्रजस्य । ऋ० ६।६२।११ ॥ यदाग्नावैष्णवं पुरोळाशं निर्वपन्त्यन्तत एव तद्देवानृध्नुवन्ति । ऐ० ब्रा० १।१।१ ॥

स्वरान्तरिति किम् । त्वं मित्रो भवसि दस्म ईड्यः । ऋ० २।१।४ ॥ ढडयोरिति किम् । गंभीराँ उदधीँरिव । ऋ० ३।४५।३ ॥ बह्वृचानामिति किम् । षड्विंशमा ऋषयो-देवजा इति । अथ० ८।८।१६ ॥ ग्रन्थींश्चकार ते दृढ़ान् । अथ० ८।३।३ ॥ इत्याथर्व्वणिकाः । इड़ायाः पदे घृतवति स्वाहा । तै० स० १।२।५ ॥ इति तैत्तिरीयाः । अग्ने मृड़ महाँ असि । सा० छ० १।१।३।३ ॥ दृढ़ा चिदारुजे वसु । सा० उ० १।१।१२।२ ॥ इति छन्दोगाः । बह्वृचास्तु, दृळ्हा चिदारुजे वसु । ऋ० ४।३१।२ ॥ इत्यधीयते ।

स्थमात्स्तुतिस्तुत्यवीरेषु सधः सहस्य ॥ २

बह्वृचानामिति न स्मर्य्यते । तेन सर्व्वेषामेवायं विधिर्न बह्वृचानामेव । मादिति व्यञ्जनान्तमनुक्रियते । तेन मादयतेः

क्विबन्तस्याम्यच वा यत् मादिति रूपं, तस्मिन्नपि परे वचनं प्रवर्त्तते। स्थ मात् स्तुति स्तुत्य वीर इत्येतेषु परतः सहशब्दस्य स्थाने सध इत्ययमादेशो भवति।

अग्ने ची ते वाजिना ची सधस्था। तै० स० ३।२।११॥ परमाच्चित् सधस्थात्। ऋ० ८।११।७॥ तदित् सधस्थमभि चारु दीधय। ऋ० १०।३२।४॥ महान्त्सधस्थे ध्रुव आ निषत्तः। मा० १८।५३॥ एतं सधस्थाः परि वो ददामि। अथ० ६।१२३।१॥ रेवतीर्नः सधमादे। सा० क० २।२।१।८॥ इन्द्र त्वास्मिन्त्सधमादे। ऋ० ८।२।३॥ आ नो बर्हिः सधमादे बृहद्दिवि। ऋ० १०।३५।१०॥ इन्द्राविष्णू सधमादो वहंतु। ऋ० ६।६८।४॥ तस्थुगृणतः सधमाद्यासः। ऋ० १०।१०४।४॥ आ योऽनयत् सधमा आर्य्यस्य। ऋ० ७।१८।७। सधमादः इति प्राप्ते वस्रादित्वात् दलोपः। अश्वानां सधस्तुति। ऋ० ५।१८।५॥ यामृधाथे सधस्तुतिं। ऋ० १।१७।९॥ सुतं सोमं सधस्तुती। ऋ० ८।३८।४॥ सधस्तुत्याय सूरिषु। ऋ० ८।२६।१॥ त्वया यत् स्तवंते सधवीर वीराः। ऋ० ६।२६।७॥ इह मादस्थयोरिति पाणिनीया स्मृतिः। बहुलाधिकारात्, धाता रयिं सहवीरं तुरासः। ऋ० ३।५४।१२॥ इत्यादयोऽप्यनुसर्त्तव्याः।

एव्विति किम्। ता अपश्यं सहगोपाश्चरन्तीः। ऋ० १०।२७।८॥ सहस्तोमाः सहच्छन्दस आहुतः सहप्रमा ऋषयः सप्त दैव्याः। ऋ० १०।१३०।७॥ सहस्येति किम्। ये देवासो-दिव्येकादश स्थ।

नात्तुः पदान्तात् से बहुलम् ॥ २

सकारे परतः पदान्तान्नकारात् परस्तकारागमो बहुलं भवति । उदनुबन्ध आगमस्य लिङ्गम् । जायेदस्तं मघवन्त्सेदु योनिः । ऋ० ३।५३।४ ॥ शर्म्मन्त्स्याम तव सप्रथस्तमे । ऋ० १।८४।१३ ॥ तं देवा हस्तान्त्सऽएरय्यैच्छन् । तै० स० ६।२।४ ॥ न च भवति । आप्याययास्मान्त्सखीन् सन्या मेधया । ऐ० ब्रा० १।४।९ ॥ इदमहं मनुष्यो मनुष्यान् सह प्रजया । तै० स० १।३।४ ॥

नकारादिति किम् । विड़ाट् सम्राड्भ्वीः प्रभ्वीः । ऋ० १।१८८।५ ॥ पदान्तादिति किम् । सो अर्केण विबबाधे तमांसि । ऋ० १०।६८।९ ॥ से इति किम् । पशून् विश्वान्त्समानजे । ऋ० १।१८८।९ ॥

तस्मिन्ननुस्वारस्तस्य छन्दोगानाम् ॥ ४

तस्मिंस्तकारे परतस्तस्य नकारस्यानुस्वारो भवति । छन्दोगानां समाम्नाये । अक्रांत्समुद्रः प्रथमे विधर्म्मन् । सा० उ० ५।२।१।१ ॥ पवस्व सोम महांत्समुद्रः । सा० उ० ५।१।१७।१ ॥ छन्दोगानामित्येव । बह्वृचास्तु, अक्रान्त्समुद्रः । ऋ० ९।९७।४० ॥ महान्त्समुद्रः । ऋ० ९।१०९।४ ॥ इत्यधीयते ॥

अन्यत्रापि दृश्यते ॥ ५

छन्दोगानामिति न स्मर्य्यते । अन्यत्रापि पदान्तस्य नकारस्यानुस्वारो दृश्यते । य ईंखयंति पर्व्वतां तिरः समुद्रमर्णवं ।

ऋ० १।१८।७॥ पर्व्वतान् तिरः इत्यवग्रहे पञ्चते। तथा। तान् क्रिमीं जम्भयामसि। अथ० ५।२३।५॥ ट्टग्रिग्रहणं प्रयोगानुसारार्थम्।

अनुस्वारस्य ँ रेफोष्मणोः॥ ६

पुनरनुस्वारग्रहणं सामान्यार्थम्। रेफोष्मणोः परतोऽनुस्वारस्य स्थाने ँ इत्ययमनुनासिकादेशो भवति। स घा तं वृषण ँ रथं। सा० छ० ५।१।४।६॥ परिलिखितँरक्षः परिलिखिता-अरातयद्दमहँरक्षसोग्रीवा अपि कृन्तामि। तै० स० १।२।५॥ रायः समुद्राँश्चतुरो अस्मभ्यँ सोम मिश्वतः। सा० उ० २।२।१४।३॥ येन जगतीँष्यायवे। सा० उ० २।२।१८।२॥ हरिँहिन्वंत्यद्रिभिः। मा० उ० ३।१।४।६॥ पूष्णोरँह्या-अपामोषधीनाँरोहिष्यै। तै० स० १।३।१०॥ ओषधे त्रायस्वैनँ स्वधिते मैनँ हिँ सीः। तै० स० १।३।६॥ वातरँह्या भव वाजिन्युजग्रमान। मा० ९।८॥ वाचस्पति-र्नोऽअद्य वाजँस्वदतु। का० १०।१॥ नात्र पदान्तत्वनियमः। केचिद्रेफे न कुर्व्वन्ति। बह्वृचा आथर्व्वणिकाश्च प्रायोऽनुस्वारम-धीयते। बहुलाधिकारादिष्टसिद्धिरिति।

अनुस्वारपूर्व्वाः शषसाश्चटतवर्गाणां प्रथम-द्वितीययोर्नस्यान्तस्यर्चि॥ ७

चवर्गटवर्गतवर्गाणां प्रथमद्वितीययोर्व्वर्णयोः परतः पदान्तस्य नकारस्य स्थाने अनुस्वारपूर्व्वाः शषसा बहुलं भवन्ति। यथा-संख्यम्। ऋग्विषये प्रयोगे।

यांश्च विद्म यौँ उ च न प्रविद्म। ऋ० १०।१५।१३॥ पशूंस्तांश्चक्रे वायव्यान्। मा० ३१।६॥ ऋतूंस्तन्वते कवयः प्रजानतीः। तै० म० ४।३।११॥ तांस्त्वं खाद सुखादितान्। तै० स०। का०। नचभवति। पूषन्तव व्रते वयं। मा० ३४।४१॥ विश्वा यस्मिन्तुविष्वणि। ऋ० ५।१६।३॥ तद्दोदेवा अब्रुवन्तद्व-आगमं। ऋ० १।१६१।२॥ तव शरीरं पतयिष्णर्वन्तव चित्तं वात इव ध्रजीमान्। तै० स० ४।६।७॥ सखे वज्रिन्तथा कृणु। ऋ० १।३०।१२॥ येन वंसाम पृतनासु शत्रून्तवोति-भिरुत जामीँरजामीन्। ऋ० ६।१८।८॥ यं सीमकृण्वन्तमसे विपृचे। ऋ० ४।१३।३॥ पशून् तान् चक्रे। सि०। तस्मिंस्त्वा दधाति। तस्मिन् त्वा दधाति। का०। मृग्यं टठयो-रुदाहरणम्।

ऋचीति किम्। यस्मिꣳश्चन्द्रमा विभाति। तै० ब्रा० १।४।१०॥ यएषां पशवस्ताँस्ते दास्यन्ति। तै० स० ३।१।८॥ दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा। मा० २।२५॥ देवा वै यं यमेव वज्रमसुरेभ्य उपायच्छंस्तन्तमेवासुराः प्रत्यबुध्यन्त। ऐ० ब्रा० २।३०॥ तथयोः सकारमिति नित्यं स्यात्।

कथं, यएषां पशव आसन्तानस्मा अददुः। तै० स० ३।१।८॥ संहिता पदयोर्विभाषितैव। वचनन्तु संहितायामेव बाहुलका-र्थम्। छान्दसो व्यत्ययो वा।

चटतवर्गाणामिति किम्। तं राजन् पारयामसि। ऋ० १०।८७।२२॥ प्रथमद्वितीयोरिति किम्। आर्ष्टिषेणो होत्र-मृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्। ऋ० १०।८८।५॥

नस्येति किम् । एतत्त्यत्त इंद्र हृषा उक्थं । ऋ० १।१००।१७ ॥
अन्तस्येति किम् । तमु त्वा हवहंतमं । ऋ० १।३८।४ ॥

विसृष्टो दीर्घात् स्वरहयवरेषु ॥ ८

स्वरहयवरेषु परतो दीर्घात् परस्य पदान्तस्य नकारस्य बहुलं विसर्जनीयो भवति । ऋग्विषये प्रयोगे ।

देवाँ अच्छा ब्रह्मकृता गणेन । ऋ० ७।८।५ ॥ महाँ इंद्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । ऋ० ८।६।१ ॥ विदे हृधस्य दत्तस्य महाँ हि षः । सा० ऋ० ४।२।५।१ ॥ तद्वाँ वा यत् पुष्यति रेक्णः । ऋ० १०।१३२।३ ॥ नलोपे कृते सन्धिः स्यात् । एवमन्येऽपि । न च भवति । पयस्वानग्न आगहि । ऋ० १।२३।२३ ॥ आदित्यान् याचिषामहे । ऋ० ८।६७।१ ॥ सो अस्मान् राजा वरुणो मुमोक्तु । ऋ० १।२४।१२ ॥ महान् ह्यस्य महिमा पनस्यते । ऋ० १०।७५।८ ॥

दीर्घादिति किम् । अहन्नहिं पर्वते शिश्रियाणं । ऋ० १।३२।२ ॥ स्वरहयवरेष्विति किम् । अस्मान्त्सु तत्र चोदय । ऋ० १।८।६ ॥ शतं महिषान् क्षीरपाकमोदनं । ऋ० ८।७७।१० ॥ नकारस्येत्येव । राजा हृतं जंघनत् प्रागपागुदक् । ऋ० ३।५३।११ ॥ पदान्तस्येत्येव । पूषा राजानमा घृणिः । ऋ० १।२३।१४ ॥

भिन्नपादेऽपि दृश्यते । त्वमुत्सां ऋतुभिर्बद्बधानाँ अरंह जधः पर्वतस्य वज्रिन् । ऋ०.५।३२।२ ॥ युङ्क्ष्वा हि देवहूतमाँ

अखाँ अग्ने रथीरिव । ऋ० ८।७५।१ ॥ उत नो देव देवाँ अच्छा वोचो विदुष्टरः । ऋ० ८।७५।२ ॥ न च भवति । अयोदंष्ट्रो-अर्चिषा यातुधानानुपस्पृश जातवेदः समिद्धः । ऋ० १०।८७।२ ॥ त्वया वयं मघवन्निंद्र शत्रूनभि ष्याम महतो मन्यमानान् । ऋ० १।१७८।५ ॥ इह, समानपादे इति पाणिनीया स्मृतिः ।

ऋचीत्यव । तान्त्सब्धान्मृतानभिव्योच्छत् । तै० स० २।४।१ ॥ अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छं । कौ० उ० ३।१ ॥ यः पशूनिच्छेत् प्रयाजाहुतिभिः प्रत्यङ् स इयात् । ऐ० ब्रा० १।२।२ ॥

सृतवानः पायौ ॥ ९

पायुशब्दे परतः स्रतवानित्येतस्य नकारस्य विसर्जनीयो भवति ।

भुवस्तस्य स्रतवाँः पायुरग्ने । ऋ० ४।२।६ ॥ पायाविति किम् । स्रतवांश्च प्रवासी च । मा० १७।८५ ॥

तस्मिन्ननुनासिकः पूर्वस्यानुस्वारो वाऽन्तः ॥ १०

एकाऽपीयं षष्ठ्यर्थवशात् द्विधा भिद्यते । नकारप्रकृतौ विसर्जनीये परतः पूर्वस्य स्वरस्यानुनासिको भवति । ततः परोऽनुस्वारागमो वा भवति ।

देवाँ अच्छा दीद्यद्युंजे अग्निं । ऋ० ३।१।२ ॥ महाँ इंद्रोय ओजसा पर्जन्यो वृष्टिमाँ इव । ऋ० ८।६।१ ॥ इति बह्वृचाः । शाखान्तरे त्वनुस्वारमधीयते । येषां अग्ने

सुभग धारयेह्व । का० ४।२३।७ ॥ इति काण्वाः । आथर्व्वणिका-स्त्वाकारमनुनासिकमन्यत्र त्वनुस्वारमधीयते । रक्षः पिशाचाँ-श्चापबाधमानः । अ० १२।३।१५ ॥ ऋतूँरन्यो विदधज्जायसे नवः । अ० ७।७।१ ॥

तथा । ये वा वनस्पतीँरनु । तै० स० ४।२।८ ॥ क्षिणन्ति शत्रूँरनपव्ययन्तः । तै० स० ४।६।६ ॥ वनस्पतीँरश्विनावैरयेथां । ऋ० १।१५७।५ ॥ वनस्पतीँरसनोदन्तरिक्षं । ऋ० ३।३४।१० ॥ वनस्पतीँरोषधी राय एषे । ऋ० ५।४१।८ ॥ जहि शत्रूँ-रपमृधो नुदस्व । ऋ० ३।४७।२ ॥ जहि शत्रूँरभिगा इंद्र तृंधि । ऋ० ६।१७।३ ॥ तवोतिभिरुत जामीँरजामीन् । ऋ० ६।१८।८ ॥ यः सप्त सिन्धूँरदधात् पृथिव्यां । तै० ब्रा० २।८।३ ॥ ये ते हवेभिर्वि पणीँरदाशन् । ऋ० ७।१९।९ ॥ त्रीँरक्तून् परिदीयथः । ऋ० ८।५।८ ॥ इहात इति पाणिनीया स्मृतिः ।

तस्मिन्निति किम् । अतो देवा अवंतु नः । ऋ० १।२२।१६ ॥ पूर्व्वस्येति किम् । परस्य मा भूत् । कथं, युष्मा इन्द्रोऽ-हणीत हत्रतूर्ये । मा० १।१३ ॥ बहुलाधिकारादियमिष्टसिद्धिः । विभक्तेर्डाऽऽदेशोवा ।

अन्नसूधसवसां रो वा ॥ ११

अन्नस् ऊधस् अवस् इत्येतेषामन्तस्य रो भवति वा ।

अन्नरेव । अन्नएव । ऊधरेव । ऊधएव । अवरेव । अवएव । का० । दुहंत्यूधर्दिव्यानि धूतयः । ऋ० १।६४।५ ॥ रिहंत्यूधो-

अरुषासो अस्य। ऋ० १।१४६।२ ॥ अपावरद्रिवो विलं। ऋ० १।११।५ ॥ अप अवः अद्रिवः इत्यवग्रहे पठ्यते। सम्राजोरव आ वृणे। ऋ० १।१७।१ ॥ महि त्रीणामवस्तु। सा० छ० २।२।५।८ ॥ इति छन्दोगाः। महि त्रीणामवोऽस्तु। ऋ० १०।१८५।१ ॥ इति बह्वृचाः।

महाव्याहृतेश्च भुवः ॥ १२

तिस्रः किल महाव्याहृतयो भूर्भुवःस्वःस्वरूपाः पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः। महाव्याहृतिरूपस्य भुवइतेरतस्य रो भवति वा। अर्थादन्तस्य।

भुवरित्यन्तरिक्षं। भुव इत्यन्तरिक्षं। का०। भुव इति वायुः। भुव इत्यपानः। तै० आ० ७।५ ॥ सान्तैषा महाव्याहृतिः। रेफान्ताएवैता महाव्याहृतयः। विधानसामर्थ्यात्तु पक्षे रप्रकृतिरनामिपरोऽपीति न प्रवर्त्तते इति केचित्।

महाव्याहृतेरिति किम्। भुवो विश्वेषु सवनेषु यज्ञियः। ऋ० १०।५०।४ ॥ भवतेर्ह्यस्तन्याः सिः। अड्गुणयोरभावः। तत उवादेशः। भुव इति किम्। भूरित्याह। सुवरित्याह। तै० ब्रा० १।१।५ ॥ रप्रकृतिरिति नित्यं स्याव्।

इति चान्द्रकान्यां कातन्त्रछन्दःप्रक्रियायां तृतीयः पादः।

सो विसृष्टस्य कपवर्गयोरप्राम्रेडितयोः ॥ १

आम्रेडितं द्विरुक्तिः । प्रशब्दमाम्रेडितं च वर्जयित्वा कवर्ग-पवर्गयोः परतो विसर्जनीयस्य बहुलं सकारो भवति ।

अग्ने त्वातर्ऋतस्कविः । ऋ० ८,६०।५ ॥ उरणस्कारः । का० । त्वं रयिर्बहुलो विश्वतस्पृथुः । ऋ० २।१।१२ ॥ अय-स्मात्रं । विश्वतस्मात्रं । का० । तथा । इंद्राय यो नः प्रदिवो-अयस्कः । ऋ० ६।२३।५ ॥ सरस्वती नः सुभगा मयस्करत् । ऋ० १।८९।३ ॥ सुपेशसस्करति जोषिषद्वि । ऋ० २।३५।१ ॥ उरु क्षयाय नस्कृधि । ऋ० ८।६८।१२ ॥ सोमं न चारुं मघवत्सु नस्कृतं । ऋ० १०।३९।२ ॥ पर्णे वो वसतिष्कृता । ऋ० १०।९७।५ ॥ न च भवति । उरणः कारः । का० । यथा नो अदितिः करत् । ऋ० १।४३।२ ॥ अयः पात्रं । विश्वतः पात्रं । का० । सूर्यरश्मिर्हरिकेशः पुरस्तात् । ऋ० १०।१३९।१ ॥ वीरुधः पारयिष्णवः । ऋ० १०।९७।२ ॥ तथा । केदानीं सूर्यः कश्चिकेत । ऋ० १।३५।७ ॥ दक्षायाय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा । ऋ० ७।९७।८ ॥ शं नः करत्यर्वते । ऋ० १।४३।६ ॥ उप त्वेमः सधि नो भागधेयं । ऋ० ८।९६।८ ॥ वाङ्ग राजन्यः कृतः । ऋ० १०।९०।१२ ॥

विसृष्टसेवेति किम् । भरामेधं कृणवामा हवींषि ते । ऋ० १।८४।४ ॥ कपवर्गयोरिति किम् । पिता यत्र दुहितुः सेकमृंजन् । ऋ० ३।३१।१ ॥ राजानः समितावित्र । ऋ० १०।८७।६ ॥ अप्राम्रेड़ितयोरिति किम् । देवा न आयुः प्र तिरंतु जीवसे । ऋ० १।८९।२ ॥ गयस्फानः प्रतरणः सुवीरः । ऋ० १।९१।१९ ॥ दीद्यानः शुचिर्ऋषिः पावकः पुनः पुनर्मातरा नव्यसी कः । ऋ० ३।५।७ ॥ कथं, अंगमंगं परुष्परुः । ऋ० १०।८७।१२ ॥ पथस्पथः परिपतिं वचस्या । मा० ३४।४२ ॥ आम्रेड़िते निषेधो न त्वाम्रेड़ितस्य । तर्हि कथं, पुनः पुनर्मातरा नव्यसी कः ॥ परुषः परुषस्परि । मा० १३।२० ॥ बाहुलकत्वात् संहिताया अविवक्षणाद्वा । प्राम्रेड़ितयोर्वर्जनं बाहुलकस्यैव विषयप्रपञ्चार्थम् ।

पञ्चम्याः पातौ ॥ २

तिपा धातुरेव निर्दिश्यते । पञ्चमीप्रथमपुरुषैकवचनान्तस्यानुकरणमित्येके । पातौ परतः पञ्चमीविसर्जनीयस्य बहुलं सकारो भवति ।

सूर्य्यो नो दिवस्पातु । ऋ० १०।१५८।१ ॥ वाजो नु ते शवसस्पात्वंतं । ऋ० ५।१५।५ ॥ राष्ट्रस्पातु । का० । तथा । वि चक्रमे रजसस्पात्वंतौ । ऋ० ५।४७।३ ॥ आ नो देव रिषस्पाहि । तै० स० १।४।४५ ॥ विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि ।

मा० ३७।१२ ॥ न च भवति । सनो दिवा स रिषः पातु नक्तं ।
ऋ० १०।८७।१ ॥ परिषदः पातु । का० ।

पञ्चम्या इति किम् । स्वस्ति नो रुद्रः पात्वंहसः । ऋ० ५।५१।१३ ॥ पातावितिं किम् । इतो जातो विश्वमिदं वि चष्टे । ऋ० १।८८।१ ॥ विसर्जनीयस्येत्येव । पृथिवी नः पार्थिवात् पात्वंहसः । ऋ० ७।१०४।२३ ॥

परौ चोपर्य्यर्थे ॥ ३

उपर्य्यर्थे परिशब्दे परतः पञ्चमीविसर्जनीयस्य सकारो-भवति ।

दिवस्परि प्रथमं जज्ञे अग्निः । ऋ० १०।४५।१ ॥ अग्निर्हिमवतस्परि । का० । ऋतेन देवान् हवते दिवस्परि । ऋ० ९।८०।१ ॥ हस्काराद्विद्युतस्परि । ऋ० १।२३।१२ ॥ उद्वयं तमसस्परि । ऋ० १।५०।१० ॥

परावितिं किम् । एभ्योवा एतल्लोकेभ्यः प्रजापतिः समै-रयत् । का० । परस्याअधि संवतः । मा० ११।७१ ॥ उपर्य्यर्थे इति किम् । दिवः पृथिव्योः परि ओज उद्भृतं वनस्पतिभ्यः पर्य्याभृतꣳसहः । तै० स० ४।६।६ ॥ ते अग्नेः परि जज्ञिरे । ऋ० १०।६२।५ ॥ परिरिह सर्व्वतोभावार्थः । पञ्चमीविसर्जनीयस्य इत्येव । स त्वैतेभ्यः परि ददत् पितृभ्यः । ऋ० १०।१७।३ ॥ पर्जुन्योः पर्य्युह्यते । ऋ० १०।८५।१३ ॥ अहिरिव भोगैः

पर्येति बाहुं । ऋ० ६।७५।१४ ॥ कथं, दिव ओषधयस्परि ।
ऋ० १०।९७।१७ । पञ्चमीविसर्जनीयस्य परावेवेति स्यादेव ।

पतिपुत्रपदृष्ठपारपयस्पोषेषु षष्ठ्याः ॥ ४

पतिपुत्रादिषु परतः षष्ठीविसर्जनीयस्य सकारो भवति ।
पति । वाचस्पतिं विश्वकर्म्माणमूतये । ऋ० १०।८१।७ ॥
सदसस्पतिमद्भुतं । ऋ० १।१८।६ ॥ पुत्र । दिवस्पुत्राय सूर्याय
शंसत । ऋ० १०।३७।१ ॥ दिवस्पुत्राय मीळ्हुषे । ऋ० ७।
१०२।१ ॥ त्वामाहुः सहसस्पुत्रमंगिरः । ऋ० ५।११।६ ॥ पद ।
इळस्पदे समिध्यसे । ऋ० १०।११९।१ ॥ इळस्पदे मनुषा यत्
समिद्धः । ऋ० २।१०।२ ॥ पृष्ठ । दिवस्पृष्ठे धावमानं सुपर्णं ।
का० । दिवस्पृष्ठे वि तन्वते । ऋ० ९।६६।५ ॥ पार । अगन्म
तमसस्पारं । का० । अतारिष्म तमसस्पारमस्य । ऋ० १।९२।६ ॥
पयः । सूर्यं चक्षुर्दिवस्पयः । का० । दिवस्पयो दिधिषाणा-
अवेषन् । ऋ० १०।११४।१ ॥ पोष । रायस्पोषं यजमानेषु
धत्तं । ऋ० ८।५९।७ ॥ रायस्पोषमिषमूर्जमस्मासु दीधरत् ।
तै० ब्रा० २।६।२ ॥ सह प्रजया सह रायस्पोषेण । तै० स०
१।३।४ ॥

कथं, इन इनस्य वसुनः पद आ । ऋ०।१४९।१ ॥ विष्णोः
पदे परमे मध्व उत्सः । ऋ० १।१५४।५ ॥ बृहस्पतिस्त्वा सादय-
तु पृथिव्याः पृष्ठे । प्रजापतिस्त्वा सादयतु दिवः पृष्ठे । तै०

स० ४।४।६ ॥ सद्यो अस्याध्वनः पारमश्नुथ । ऋ० ५।५४।१० ॥ सबर्दुघायाः पय उस्रियायाः । ऋ० १।१२१।५ ॥ मित्रावरुणयोः पयस्याथ । तै० ब्रा० १।५।११ ॥ बहुलाधिकारात् संहिताऽभावाद्वा ।

एष्विति किम् । मूर्द्धा विश्वस्य वाघतः । ऋ० ६।१६।१३ । वसोः पवित्रमसि । मा० १।२ ॥ वसोः सार्हस्य पुरुहूत राधसः । ऋ० ८।२४।८ ॥ षष्ठ्या इति किम् । यं वर्धयंतीर्गिरः पतिं तुरस्य राधसः । ऋ० ६।४४।५ ॥ मनुः पुत्रेभ्यो दायं व्यभजत् । तै० स० ३।१।८ ॥ स वह्निः पुत्रः पित्रोः पवित्रवान् । ऋ० १।१६०।३ । द्रुषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः । ऋ० ६।७५।५ ॥ एवमन्येऽपि ।

कथं, दुरो यवस्य वसुन द्रनस्पतिः । ऋ० १।५३।२ ॥ द्रवत्पाणी शुभस्पती । ऋ० १।३।१ ॥ हरिरोपशं क्रणुते नभस्पयः । ऋ० ८।७१।१ ॥ षष्ठ्याः पत्यादिष्वेवेति स्यादेव । विसर्जनीयस्येत्येव । क्षेत्रस्य पते मधुमंतमूर्मिं । ऋ० ४।६७।२ ॥ बह्वीनां पिता बहुरस्य पुत्रः । ऋ० ६।७५।५ । इत्यादि ।

ड्रड़ाया वा ॥ ५

ड्रड़ाशब्दात् परस्य षष्ठीविसर्जनीयस्य पतिपुत्रादिषु परतः सकारो भवति वा ।

ड्रड़ायास्पतिः । ड्रड़ायाः पतिः । ड्रड़ायास्पुत्रः । ड्रड़ायाः पुत्रः । ड्रड़ायास्पदं । ड्रड़ायाः पदं । ड्रड़ायास्पष्ठं । ड्रड़ायाः

पृष्ठं । इड़ायास्पारं । इड़ायाः पारं । इड़ायास्पोषं । इड़ायाः पोषं । का० । इळायास्पुत्रो वयुनेऽजनिष्ट । ऋ० ३।२९।२ ॥ इळायास्पदे घृतवंतमासदः । ऋ० १०।९१।४ ॥ एतद्वा इळाया-स्पदं यदुत्तरवेदिः । ऐ० ब्रा० । तै० स० भा० ॥ इड़ायास्पदमसि । मा० ४।२२ ॥ इति माध्यन्दिनीयाः । इलायास्पदं । का० २।२२ ॥ इति काण्वाः । देवयजनइड़ायाः पदे । तै० स० १।२।५ ॥ इति तैत्तिरीयाः । पतिपुत्रादिष्वित्येव । अरुषो-जातः पद इळायाः पुरोहितो राजन् यज्ञीह देवान् । ऋ० १०।१।६ ॥

ष्याश्लोपो व्यञ्जने ॥ ६

षष्ठ्याइति न सम्पर्यते । स्यात् परस्य विसर्जनीयस्य लोपो-भवति वा । व्यञ्जने परे ।

उत स्य वाजी क्षिपणिं तुरण्यति । ऋ० ४।४०।४ ॥ एष स्य-ते मधुमाँ इंद्र सोमः । ऋ० ९।८७।४ ॥ एष स्य भानुरुदियर्ति युज्यते । ऋ० ४।४५।१ ॥ उदु ष्य वः सविता सुप्रणीतयः । ऋ० ८।२७।१२ ॥ एष स्य सोमो मतिभिः पुनानः । ऋ० ९।९६।१५ ॥ न च भवति । यत्र स्यो निपतेत् । का० । वा व्यवस्थावाचीह ।

स्यादिति किम् । यस्ते सखिभ्य आ वरं । ऋ० १।४।४ ॥ सिलोपे त्वबग्रहः पदकाराणां नोपपद्यते । ते हि, स्यः इत्यव-ग्रहन्ति । अतोऽयमारम्भः ।

षोव्युपधस्य कपवर्गयोः॥ ७

उश्च ऋश्च वौ। वी उपधे यस्यासौ व्युपधः। उकारेकारोपधस्य विसर्जनीयस्य षकारो भवति। कपवर्गयोः परयोः।

यत् पर्जन्यः स्तनयन् हंति दुष्कृतः। ऋ० ५।८३।२॥ यच्छता नो दुष्परिहंतु शर्म। ऋ० २।२७।६॥ निष्कृण्वाना आयुधानीव धृष्णवः। ऋ० १।८२।१॥ ऋच्छंति षा निष्पदो मुन्मलानीं। ऋ० १०।१०२।६॥ घोषवति रेफएव प्रमाणम्। वि दुर्गा वि द्विषः पुरः। ऋ० १।४१।३॥ दुःऽगा इत्यवगर्हन्ति। परि लेषस्य दुर्मतिर्महो गात्। ऋ० २।३३।१४। निर्मथितः सुधित आ सधस्थे। ऋ० ३।२३।१।

व्युपधस्येति किम्। असामि हि प्रयज्यवः कण्वं दद प्रचेतसः। ऋ० १।३९।९॥ त्वं पिप्रोर्नृमणः प्रारुजः पुरः। ऋ० १।५१।५॥ भाषायामपीति मतम्।

द्विर्भावो विष्वजनादिभाश्छकारस्य विभाषा॥ ८

विष्वजनादिभ्यः परस्य छकारस्य द्विर्भावो भवति वा। प्राप्ते विभाषा।

विष्वजनच्छत्रं। विष्वजनछत्रं। न च्छायां कुरवोऽपरां। न छायां कुरवोऽपरां। का०। अच्छांत मे छदयाथा च नूनं। ऋ० १।१६५।१२॥ द्यौरासीदुत छदिः। ऋ० १०।८५।१०॥ त्रिष्टुब्गायत्री छंदांसि। ऋ० १०।१४।१६॥ यस्य छायामृतं यस्य मृत्युः। ऋ० १०।१२१।२॥ विष्वजनादिराकृतिगणः। तस्यैवापि शब्दस्य प्रपञ्चार्थोऽयं योगः।

वस्नादीनि यथोपदिष्टम् ॥ ९

वस्नादीनि यथैवोपदिष्टानि तथैव निपातयितव्यानि। वस्नेव विक्रीणावहै। तै० स० १।८।४ ॥ वसुना इति प्राप्ते। तुभ्येदमग्ने। भा०। तुभ्यमिदमग्नये इति प्राप्ते। आम्बानां चरुं। भा०। नाम्बानामिति प्राप्ते। आव्याधिनी उगणाः। भा०। सुगणा इति प्राप्ते। शिवा उद्रस्य भेषजी। भा०। रुद्रस्य इति प्राप्ते। इष्कृणुध्वं रशना ओत पिंशत। ऋ० १०।५३।७ ॥ निष्कृणुतेति प्राप्ते। इष्कर्त्तारमध्वरस्य। ऋ० १०।१४०।५ ॥ निष्कर्त्तारमिति प्राप्ते। गयस्फानो गोभिरिंदो। ऋ० ७।५४।२ ॥ गयस्फायन इति प्राप्ते। ये महोरजसो विदुः। ऋ० १।१९।३ ॥ महत इति प्राप्ते। प्र तव्यसीं नव्यसीं धीतिमग्नये। ऋ० १।१४३।१ ॥ तवीयसीं नवीयसीमिति प्राप्ते। यथाऽऽम्नानं संहितायामवग्रहे च वचनं प्रवर्त्तते। वस्नादिराकृतिगणः।

इति चान्द्रकान्यां कातन्त्रवृत्तिपञ्जिकायां सन्धौ चतुर्थः पादः।

नाम्नि चतुष्टये प्रथमः पादः ।

षष्ठीयुक्तः पतिरग्निष्टादौ वा ॥ १

पातरसमासे इति प्रतिषेधबाधनार्थोऽयं योगः । षष्ठ्यन्तेन युक्तः पतिशब्दोऽग्निसंज्ञको भवति वा । टादौ स्वरे परे ।

क्षेत्रस्य पतिना वयं । ऋ० ४।५७।१ ॥ ब्रह्मणस्पतेरभवद्-यथा वशं । ऋ० २।२४।१४ ॥ दाधार धर्म्मणस्पतेः । ऋ० ९।२५।६ ॥ पत्तीनां पतये नमः । मा० १६।१९ ॥ कुलुञ्चानां पतये नमः । कुलुञ्चानां पत्ये नमः । का० ।

षष्ठीयुक्त इति किम् । मया पत्या जरदष्टिर्यथासः । ऋ० १०।८५।३६ ॥ जायेव पत्य उशती सुवासाः । ऋ० १।१२४।७ ॥ पतिरिति किम् । निवा नः सख्या संतु । ऋ० ४।१०।८ ॥ येषां सख्ये असि श्रितः । ऋ० ३।८।३ ॥ टादाविति स्पष्टार्थम् ।

बहुलं लोपो विभक्तीनां पूर्व्वस्य च दीर्घः ॥ २

स्यादीनां विभक्तीनां बहुलं लोपो भवति । पूर्व्वस्य च स्वरस्य दीर्घः । प्रत्यासत्त्या विभक्त्युपश्लिष्टस्यैव स्वरस्य दीर्घो न व्यवहितस्य ।

तस्थौ व जती मरुतो यमावत । ऋ० १।६४।१३ ॥ कया मती कुत एतास एते । ऋ० १।१८५।१ ॥ धीत्यग्ने मनसा सं

ष्टि जग्मे। ऋ० १।१६४।८ ॥ जत्या मत्या धीत्येति प्राप्ते। देवी द्यावापृथिवी। मा० ३७।३ ॥ देव्यौ द्यावापृथिव्या-वितिप्राप्ते। आर्द्रे चर्म्मन्। लोहिते चर्म्मन्। भा०। ससस्य चर्म्मन्नधि चारु पृश्नेः। ऋ० ४।५।७ ॥ चर्म्मणीति प्राप्ते। कर्म्मन् कर्म्मन् वृषणमिंद्र देवाः। ऋ० १०।२८।७ ॥ कर्म्मणि कर्म्मणीति प्राप्ते। सहस्राक्षरा परमे व्योमन्। ऋ० १।१६४।४१ ॥ व्योमनीति प्राप्ते। प्रत्ययलोपे प्रत्ययलक्षणमित्यनित्येयम्। तेनानोऽकारस्य लिङ्गान्तनकारस्य च लोपो न स्यात्। यदेवैनं यज्ञ उपनमेदथा-दधीत। मी० भा०। यदैवेति प्राप्ते। हविर्धाने यत् सुखन्ति तत् सामिधेनीरन्वाह। का०। यस्मिन् तस्मिन्निति प्राप्ते। तत्र साक्षाद्विभक्तिग्रहणान्न त्यदाद्यत्वम्।

न च भवति। त्वं नश्चित्र जत्या वसो। ऋ० ६।४८।९ ॥ स्वया मत्या मरुतः सं मिमिक्षुः। ऋ० ५।५८।५ ॥ वि चर्म्म-णीव धिषणे अवर्तयत्। ऋ० ६।८।३ ॥ यस्मिन्निंद्रो मित्रो-वरुणोऽर्यमा। ऋ० १।४०।५ ॥ तस्मिन्ना तस्थुर्भुवनानि विश्वा। ऋ० १।१६४।१२ ॥ एवमन्येऽपि। अन्वाचयशिष्टोऽयं चकारः।

जसश्चादः

जसश्चादेर्बहुलं लोपो भवति। पूर्व्वस्य च दीर्घः।

तस्य साध्वीरिषवो याभिरस्यति। ऋ० २।२४।८ ॥ यावतीः कियतीश्च प्रजावाचं वदन्ति। तै० ब्रा० २।७।५ ॥ अनायतन-वतीर्वा अन्या आहुतयो हूयन्ते। तै० स० ३।१।८ ॥ यं नो-

देवीरभीष्टये । मा० ३६।१२ ॥ माध्वीर्गावो भवंतु नः । ऋ० १।९०।८ ॥ उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । सा० छ० १।१।२।३ ॥ देवानां पत्नीरुशतीरवन्तु नः । अं० ७।४९।१ ॥ न च भवति । प्रतीपं शापं नद्यो वहंति । ऋ०१०।२८।४ ॥ मार्जाल्यो मृज्यते स्वे दमूनाः । ऋ० ५।१।८ ॥ देव्यो वभ्रयः । मा० ३७।४ ॥ इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यः । छा० उ० ६।१०।१ ॥

जस इति किम् । वातेवाजुर्या नद्येव रीतिः । ऋ० ३। ऋ० २।३९।५ ॥ नद्या इव इति पदकाराः पठन्ति ।

आजादयारियाडियाडेडाड्यायेतः ॥ ४

विभक्तीनां स्थाने आच् आत् अयार् इया डिया डे डा ड्या या ईत् इतीत्येते आदेशा बहुलं भवन्ति । चकारः आचि गुणोन्यन्तस्येति विशेषणार्थः । रेफ उच्चारणार्थः । डकारा डानुबन्धकार्य्यार्थाः । तकारः स्वरूपग्राहकः ।

आच् । उभा कर्णा हिरण्यया । ऋ० ८।७२।१२ ॥ उभौ कर्णौ हिरण्ययौ इति प्राप्ते । या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना ता हवामहे । ऋ० १।२२।२ ॥ यौ सुरथौ रथीतमौ उभौ देवौ दिविस्पृशौ अश्विनौ तौ इति प्राप्ते । वसन्ता यजेत । का० । यो वसन्ताग्निमाधत्ते मुख्य एव भवति । तै० ब्रा० १।१।२ ॥ वसन्ता प्रातराग्नेयीं क्षण्वीमालभेत । तै० स० २।१।२ ॥ वसन्ते इति प्राप्ते ।

आत्। न तादृब्राह्मणं। सि०। तमिति प्राप्ते। न तादृब्राह्मणाद् निन्दामि। का०। तान् ब्राह्मणानिति प्राप्ते। यादेव विश्म तात् त्वा मह्यांतं। ऋ० ६।२१।६॥ यं तमिति प्राप्त।

अयार्। स नः सिंधुमिव नावया। ऋ० १।८७।८॥ नावेति प्राप्ते।

इया। दभ्रं पश्यङ्ग्र उर्विया विचक्ष। ऋ० १।११३।५॥ ऊरु-रिति प्राप्ते। घृतेनाहुत उर्विया वि पप्रथे। ऋ० १०।६८।२॥ ऊरु इति प्राप्ते। दार्विया परिज्मन्। भा०। दारुणेति प्राप्ते।

डिया। सुक्षेत्रिया सुगातुया। ऋ० १।८७।२॥ सुक्षेत्रि-णेति प्राप्ते। गायत्रिया क्रियमाणस्य यत्ते। तै० ब्रा० १।२।१॥ गायत्रेयति प्राप्ते।

ङे। न युष्मे वाजबंधवः। ऋ० ८।६८।१९॥ यूयमिति प्राप्ते इतेरके। युष्मास्विति प्राप्ते इत्यन्ये। त्वे सोम प्रथमा ह्रस्व-बर्हिषः। ऋ० ९।११०।७॥ त्वयीति प्राप्ते। अस्मे ते बन्धुः। नि० नै० ५॥ वयमिति प्राप्ते। अस्मे यातं नासत्या सजोषाः। ऋ० १।११८।११॥ अस्मानिनि प्राप्ते। भूरि चकर्थ युज्येभि-रस्मे समानेभिर्वृषभ पौंस्येभिः। ऋ० १।१६५।७॥ अस्माभिरिति प्राप्ते। अस्मे प्र यंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इंद्र शिप्रिन्। ऋ० ३।३६।१०॥ अस्मभ्यमिति प्राप्ते। स सूनवामा स्ववाग् इंद्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु। ऋ० ६।४७।१२॥ अस्मदिति प्राप्ते। उर्व इव पप्रथे कामो अस्मे।

ऋ० ३।३०।१९ ॥ अस्माकमिति प्राप्ते । अस्मे धेहि श्रवो बृहद् द्युम्नमधि रत्नं च धेहि । ऋ० ७।५२।३ ॥ अस्मास्विति प्राप्त ।

ङा । नाभा पृथिव्या भुवनस्य मज्मना । ऋ० १।१४३।४ ॥ नाभौ इति प्राप्ते ।

ञा । ता अनुष्ठ्योच्चावयतात् । ऐ० ब्रा० २।६ ॥ अनुष्ठयेति प्राप्ते । अनुष्ठामनुष्ठा । भिदादित्वादङ् । गणनेत्येतत् । ता वङ्क्रीरनुष्ठया गणनया भवान् पृथक् करोत्वित्येके । अनुष्ठा अनुक्रमेण इति पुनर्वेदभाष्ये सायणाचार्य्याः । वङ्क्रयः पार्श्वास्थीनि । षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्चावयतात् इति खल्वध्वर्य्युप्रैषः पठ्यते । कथमनुष्टुभेति जयादित्येनोक्तम् ।

या । तेभिः कल्पस्व साधुया । ऋ० १।१७०।२ ॥ साध्विति प्राप्ते । स्वप्नया स च सेचनं । का० । स्वप्नया वाव सेचनं । भा० । स्वप्नेनेति प्राप्ते । सह सञ्चस्करद्विया । तै० आ० १।२ ॥ ऋद्वैव इति प्राप्ते ।

ईत् । इतिं न शुष्कं सरसी शयानं । ऋ० ७।१०३।२ ॥ सरसि इति प्राप्ते इति भाष्यस्थितिः । स्वरे त्वास्थेयं प्रयत्नान्तरम् । ङेरीकारे कृते ह्याद्युदात्तं पदं प्राप्नोति । पठ्यते त्वन्तोदात्तमिति । स्त्रीदन्तात् सरसीशब्दात् ङिलोपे पदमिदम् । ईकारस्य त्वन्वेष्यमुदाहरणमित्याहुः । तथा । ऋभवो विष्टयक्रत । ऋ० १।२०।४ ॥ विष्टय इति प्राप्ते जस ईकार इति वेदभाष्ये । यच्छे दाक्षायणो मनसी प्राह्नः । क० उ० । मनसि इति प्राप्ते । न च भवति । उभौ वर्णावृषिरुग्रः पुपोष । ऋ० १।१७८।६ ॥ इत्यादि ।

आसकाराज्जसि ॥ ५

लिङ्गान्तादकाराद् बहुलमासित्ययमागमो भवति। जसि-परे।

देवासः सर्व्वया विशा। ऋ० १।३९।५ ॥ ब्राह्मणासो अति-रात्रे न सोमे। ऋ० ७।१०३।७ ॥ ब्राह्मणासः पितरः सोम्यासः। ऋ० ।६।७५।१० ॥ ये पूर्वासो य उपरास ईयुः। ऋ० १०।१५।२ ॥ ते नः पूर्वासः उपरास इंदवः। ऋ० ९।७७।३ ॥ न च भवति। देवा यज्ञं तन्वानाः। ऋ० १०।९०।१५ ॥ संवत्सरं शशयाना-ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मंडूका अवा-दिषुः। ऋ० ७।१०३।१ ॥

अकारादिति किम्। प्र सोमपा अपसा संतु नेमे। ऋ० १।५४।८ ॥ अमूर्या उप सूर्ये। ऋ० १।२३।१७ ॥ जसीति किम्। आ देवान्त्सोमपीतये। ऋ० १।१४।६ ॥

नेतराच्छुः ॥ ६

इतरस्मादाच्छुरागमो न भवति। अन्यादेस्तु तुरित्यनेन यस्तु रागमो विहितः स इह प्रतिषिध्यते। पारिशेष्यादकारादस-म्बुद्धौ सुश्चेति प्रवर्त्तते। वार्व्रश्नमितरं। इतरमितरमण्डमजा-यत। का०। बाधकबाधनार्थोऽयं योगः ॥

लोपोदन्तस्यातः ॥ ७

दन्तशब्दस्य योऽवमकारस्तस्य बहुलं भवति। अर्थादन्तस्य। उभयदत आलभते। उभयतोदतः प्रतिगृह्णाति। का०।

या दन्तोधावते तस्यै स्यावदन् । तै० स० २।५।१ ॥ दन्तां यो मध्यं गच्छति । अथ० ५।२३।२ ॥ न च भवति । पत्रदन्तमालभेत । का० । सुपर्णं वस्ते मृगो अस्या दन्तः । ऋ० ६।७५।११ ॥

भिसैस् ॥ ८

लिङ्गात् परो भिस् बहुलमैस् भवति ।

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । ऋ० १।१।२ ॥ नूतनैरित्यत्र भवति । पूर्वेभिरित्यत्र न भवति । धुटि बहुत्वे त्वे प्रवर्त्तते । अकारान्ताद्विहितमनकारान्तादपि भवति । नद्यैरिति । का० । स्वरान्ताद्विहितं व्यञ्जनान्तादपि भवति । दूरे ह्यध्वा जगुरिः पराचैः । ऋ० १०।१०८।१ ॥ आरे बाधेथां निर्ऋतिं पराचैः । तै० स० १।८।२२ ॥

सार्व्वनामिकमुभयादीनाम् ॥ ९

उभयादीनां शब्दानां सार्व्वनामिकं कार्य्यं बहुलं भवति ।

येन जना उभये भुञ्जते विशः । ऋ० २।२४।१० ॥ अथा न उभयेषां । ऋ० १।२६।९ ॥ न च भवति । परेऽवर उभयाऽमित्राः । ऋ० २।१२।८ ॥ भुवन्नेमानां वसो । ऋ० ६।१६।१८ ॥ स्वायामेव दिशि रुद्रं निरवदयते । तै० ब्रा० १।७८ ॥ आदिर्व्यवस्थावाचीह ।

शसादिषु मांसपृतनासानूनां मांस्पृत्स्नवः ॥ १०

शसादिषु परतो मांस पृतना सानु इत्येतेषां स्थाने मांस् पृत् स्नु इत्येते आदेशा बहुलं भवन्ति ।

यक्नीक्षणं मांसपचन्या उखायाः । ऋ० १।१६२।१३ ॥ मांस-पचन्या इति प्राप्ते । स मत्सरः पृत्सु वन्वन्नवातः । ऋ० ९।९६।८ ॥ पृतनाखिति प्राप्ते । न ते दिवो न पृथिव्या अधि-स्नुषु । भा० ॥ सानुषु इति प्राप्ते । न च भवति । ये चार्वतो मांसभिक्षामुपासते । ऋ० १।१६२।१२ ॥ न त्वा रक्षाꣳसि पृतनासु जिग्युः । सा० छ० १।२।३।८ ॥ सदो दधान-उपरेषु सानुष्वग्निः परेषु सानुषु । ऋ० १।१२८।३ ॥

शसादिष्विति किम् । मांसमेकः पिंशति सूनया भृशं । ऋ० १।१६१।१० ॥ यत् सानोः सानुमारुहत् । ऋ० १।१०।२ ॥

पादहृदयनासिकायकृत्शकृदसृङ्मांसनिश्यूष-दोषुदकासनानां पद्धृन्नस्यकन्शकन्नसन्मांस्निश्-यूषन्दोषन्नुदन्नासनः ॥ ११

शसादिषु परतः पाद हृदय नासिका यकृत् शकृत् असृज् मास निश्या यूष दोष् उदक आसन इत्येतेषां शब्दानां स्थाने पद् हृद् नस् यकन् शकन् असन् मास् निश् यूषन्-दोषन् उदन् आसन् इत्येते आदेशा बहुलं भवन्ति । यथा-संख्यम् ।

निपदश्चतुरो जहि । का० । पूर्वेण मघवन् पदा । ऋ० १०।१३४।६ ॥ इंद्राय हृदा मनसा मनीषा । ऋ० १।६१।२ ॥ हृदा पश्यन्ति मनसा विपश्चितः । ऋ० १०।१७७।१ ॥ सूकरस्य-

खगम्मसा । का० । पृष्ठे सदो नसोर्यमः । ऋ० ५।६१।२ ॥ यक्षो-ऽवद्यति । का० । यक्ष्मं मतस्नाभ्यां यक्षः । ऋ० १०।१६२।२ ॥ यक्षोऽवद्यति । का० । अस्निक्षोऽस्नावरोहति । का० । मासेव सूर्यो वसु पुर्यमा ददे । ऋ० १०।१३८।४ ॥ मासां विधानमदधा-अधि द्यवि । ऋ० १०।१३८।६ ॥ अमावास्यायां निशि यजेत । का० । या पात्राणि यूष्ण आसेचनानि । ऋ० १।१६२।१३ ॥ यस्ते दोष्णो दौर्भाग्यं । का० । उद्नः शीपालमिव वात आजत् । ऋ० १०।६८।५ ॥ उद्नो ऋदमपिबज्जर्भराणः । ऋ० १०।१०२।४ ॥ नासत्याभ्या भुरण्यति । ऋ० ५।७३।६ ॥ आसनि किं लभे मधूनि । का० ।

न च भवति । स्वयं स यक्ष्मं हृदये नि धत्त । ऋ० १।१२२।९ ॥ दश मासाञ्छशयानः । ऋ० ५।७८।९ ॥ मंडूका-उदकादिव । ऋ० १०।१६६।५ ॥ एवमन्येऽपि । आदिर्व्यवस्थावाची । तेन, शलादोषणी कक्षुदोषणी याचते महादेवः । भा० । इत्यादयोऽप्यनुसर्त्तव्याः । भाषायामपि पदादयः प्रयुज्यन्ते इति मतम् । दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः इत्यादि ।

आसन्नासद्यस्य ॥ १२

आस्यशब्दस्य स्थाने आसन्नित्ययमादेशो बहुलं भवति । अन्नादिषु ।

गर्भे योषामदधुर्वत्समासनि । ऋ० १०।५३।११ ॥ मंद्रा-

जनी चोदते अंतरासनि । ऋ० ८।६८।२ ॥ स्तोमो विप्रेभि-रासया । ऋ० १।२०।१ ॥ आस्येनेति प्राप्ते तृतीयैकवचनस्य याऽऽदेशः आस्यस्यासन् नलोपश्च । न च भवति । परि स्वयं चितुषे अन्नमास्ये । ऋ० १०।८१।५ ॥ अग्नाव्यग्ने हविरास्ये ते । ऋ० १०।८१।१५ ॥

सम्बुद्धावबयाः श्वेतवाः पुरोडा उक्थशाः ॥ १३

सम्बुद्धावेते ह्रस्वदीर्घौ निपात्येते ।
पुरोडा अग्ने पचतः । ऋ० ३।२८।२ ॥

ह्रस्वोऽडलकवतामम्बार्थानामेकेषाम् ॥ १४

सम्बुद्धौ परतो डलकवतामम्बार्थानां ह्रस्वो भवति । एकेषा-माचार्य्याणां मतेन । हे अम्बाड़ हे अम्बाडे । हे अम्बाल हे अम्बाले । हे अम्बिक हे अम्बिके । का० । भाष्यवार्त्ति-कयोस्तु नैतच्चिन्तितम् ।

डौ च तस्य भावे ॥ १५

सम्बुद्धौ डौ च परतो भावेऽर्थे विहितस्य तकारस्य बहुलं ह्रस्वो भवति ।

हे देवत हे देवते । देवते भक्तिः देवतायां भक्तिः । का० । भावविहितस्तकारः स्त्र्यादन्त एव ॥

अन्यत्रापि दृश्यते ॥ १६

उक्तादन्यत्रापि स्त्रस्त्री दृश्यते ।

तिस्रः क्षपस्त्रिरहातिव्रजद्भिः । ऋ० १।११६।४ ॥ नृभ्यो-नारिभ्यो गवे । ऋ० १।४३।६ ॥ नृभ्यो नारिभ्यो अन्नवे । ऋ० ८।७७।८ ॥ इंद्राणीमासु नारिषु । ऋ० १०।८६।११ ॥ उपगायन्तु मां पतयो गर्भिणयो युवतयः । भा० । गर्भिणयो-भवन्ति । तै० स० । आपो वरुणस्य पत्नय आसन् । तै० ब्रा० १ १।३ ॥ भूच्छ्रिये दर्विरेपाः । ऋ० १०।१०५।१० ॥ दृग्रि-ग्रहणं प्रयोगानुसारार्थम् ।

आचि गुणो नाम्यन्तस्य ॥ १७

आचि परतो नाम्यन्तस्य लिङ्गस्य बहुलं गुणो भवति ।

प्र बाह्वा पृथुपाणिः सिसर्ति । ऋ० २।३८।२ ॥ प्र बाह्वा सिस्रतं जीवसे नः । तै० स० १।८।२२ ॥ बाह्वनेति प्राप्ते ॥ नाच्च प्रशब्दः समस्तः । स्वरभेददर्शनात् । पदकारैर्विच्छिद्य पाठाच्च । न च भवति । उत पव्या रथानामर्द्रिं भिंदंत्योजसा । ऋ० ५।५२।९ ॥ पविनेति प्राप्ते ।

आचीति किम् । तं मरुतः क्षुरपविना व्ययुः । नि० नै० ५ ॥ ऋतुना यज्ञमाशाथे । ऋ० १।१५।६ ॥ नाम्यन्तस्येति किम् । नाम्युपधस्य माभूत् । उभा देवा दिविस्पृशा ।

बहुलमिदुत्कार्यं जसादिषु ॥ १८

जसादिषु परतो बहुलमिदुत्कार्यं भवति । स्त्रस्त्रमिकार-

मुकारञ्चाश्रित्य यत् कार्यं विहितं तदिदुत्कार्यमिष्टाभिप्रेतम्।

अधा शतक्रत्वो यूयं। ऋ० १०।८७।२॥ शतक्रतवः इति प्राप्ते। पञ्चे नृभ्योयथा गवे। ऋ० १।४३।२॥ पशवे इति प्राप्ते। अर्यः पुष्टानि स जनास इंद्रः। ऋ० २।१२।४॥ सो अर्यः पुष्टीर्विज इवामिनाति। ऋ० २।१२।५॥ अरेरिति प्राप्ते। पञ्चा यत्पञ्चाविंयुता बुधंत। ऋ० १०।६१।१२॥ पशुनेति प्राप्ते। भवति च। शतक्रतवः। पशवे। चतुष्पदे च पशवे। ऋ० ३।६२।१४॥ त्वां यदग्ने पशवः समासते। ऋ० ३।९।९।७॥ किकिदीव्या। भा०। इति त्वाचि गुणाभावे सिद्धम्।

भाष्ये तु, जसादिष्वनेकत्र च्छन्दसि वावचनमभिधाय, अश्वे दर्वि शतक्रत्वः पञ्चे किकिदीव्या इति प्रयोजनमुपसंख्याय, अश्वे अश्व दर्वे दर्वि शतक्रत्वः शतक्रतवः पञ्चे पशवे किकिदीव्या किकिदीविनेत्युदाहृतम्। चाषेण किकिदीविना। ऋ० १०।९७।१३॥

लोपो नोर्नामिनोनपुंसके॥ १९

नपुंसकलिङ्गे नामिनः परस्य न्वागमस्य बहुलं लोपो भवति।

मध्वा यज्ञं मिमिक्षति। ऋ० १।१४२।३॥ मध्वा देवौषधीः सं पिप्रक्त। ऋ० ३।५४।२१॥ मध्वोरसं सुगमस्मि-

गिरिष्ठां । ऋ० ५।४३।४ ॥ अस्य मध्वः पिबत मादयध्वं । ऋ० ७।३८।८ ॥ न च भवति । यो अद्रुजन्मधुना सं मधूनि । ऋ० १०।५४।६ ॥ स्रोतंति धारा मधुनो घृतस्य । ऋ० ३।१।८ ॥ क्रतुꣳरिहंति मध्वाभ्यंजते । सा० छ० ६।२।२।११ ॥ इति छन्दोगाः । क्रतुं रिहंति मधुनाभ्यंजते । ऋ० ९।८६।४३ ॥ इति बह्वृचाः ।

नामिन इति किम् । संते पयांसि समु यंतु वाजाः । ऋ० १।९१।९८ ॥ नपुंसक इति किम् । अग्निनेंद्रेण वरुणेन विष्णुना । ऋ० ८।३।३५।१ ॥

नेश्च पदान्तस्य ॥ २०

नपुंसकलिङ्गे जस्शसोः शौ यो नुरागमो भवति तदुभयस्य नेरिति निर्देशः । नेश्च पदान्तस्य बहुलं लोपो भवति । पदकार्ये कृते लोपो यथा स्यादिति पदान्तग्रहणम् । अत एवारम्भः ।

या ते गायाणाम्ऋतुथा छणोमि ताता पिंडानां प्रजुहोम्यग्नौ । ऋ० १।१६२।१९ ॥ यानि तानीति प्राप्ते । अच्छिद्रा गाया वयुना छणोत । ऋ० १।१६२।१८ ॥ अच्छिद्राणि गायाणीति प्राप्ते । अग्ने यी ते वाजिना यी यभस्ता । ऋ० ३।२०।२ ॥ यीणीति प्राप्ते । मा हिंस्यात् सर्व्वा भूतानि । ति० । सर्व्वाणीति प्राप्ते । न च भवति । यथाऽत्रैव भूतानीति । तथा । छिद्रा गायाण्यसिना मिथू कः । ऋ० १।१६२।२० ॥

मा त्वत्क्षेत्राण्यरणानि गन्म । ऋ० ६।६१।१४ ॥ यानि क्षेत्राणि या वना । अथ० १४।७।७ ॥ यानि वनानीति प्राप्ते ।

कथं, तिस्रः क्षपस्त्रिरहातिव्रजद्भिः । ऋ० १।१२६।४ ॥ अहानीति प्राप्नोति । डादेशात् सिद्धम् । अन्यत्रापि यथायथं सिध्यतीति चेत्, तर्हि सुखार्थमेवेदम् । एवमन्यत्रापि ।

ओषधेर्दीर्घोऽप्रथमायाम् ॥ २१

विभक्तावप्रथमायां परभूतायामोषधिशब्दस्य दीर्घो भवति । मर्यादमस्य ।

ओषधीभिरपोषतत् । का० । सद्योजात ओषधीभिर्ववक्षे । ऋ० ३।५।८ । यदासिंचा ओषधीभिः पुनीतात् । ऋ० १०।३०।५ ॥ नमः पृथिव्यै नम ओषधीभ्यः । का० । त्वं वनेभ्यस्त्वमोषधीभ्यः । ऋ० २।१।१ ॥ पयो गोष्वदधा ओषधीषु । ऋ० ऋ० १०।७२।८ ॥ इतश्च ङिवर्जिताद्धेतीप्रत्यये हृते ह्यस्तोदात्तता स्यात् । पठ्यते त्वाद्योदात्त इति ।

तथा । अन्न एवौषधीभ्यो वर्षत्यथो अन्न एवौषधीभ्यो-हृष्टिं निनयति । तै० स० २।४।९ ॥ ओषधीभ्यो वेष्टतमालभेत प्रजाकामः । तै० स० २।१।५ ॥

ओषधेरिति किम्। त्वं नो अग्ने अग्निभिः । ऋ० १०।१४१।६ ॥ अप्रथमायामिति किम् । रथीयंतीव प्र जिहीत ओषधिः । ऋ० १।१६६।५ ॥ पयस्वतीरोषधयः । ऋ० १०।९७।१४ ॥ दिव ओषधयस्परि । ऋ० १०।९७।१७ ॥ ओषधयः सं वदंते ।

ऋ० १०।८७।२२॥ कथं, स त्वां विश्नन्त्योषधीरुताप्यः। मा० ८।२५॥ या ओषधीः पूर्व्वा जाताः। ऋ० १०।९७।१॥ जसोऽकारलोपः पूर्व्वस्य च दीर्घः। बहुलाधिकारादमि न स्यात्। यत् संपिंषंत्योषधिं। ऋ० १०।८५।३॥ इमां खनाम्योषधिं। ऋ० १०।१४५।१॥ विश्नक्तावित्येव। ओषधिपते। का०।

विभाषा नामि नामिनः॥ २२

नकारयुक्ते आमि परतो नामिनो दीर्घो विभाष्यते।

तिसृणां मध्यन्दिने। तिसृणां मध्यन्दिने। चतसृणां मध्यन्दिने। चतसृणां मध्यन्दिने। का०। तिसृणां सप्ततीनां श्यावः प्रणेता। ऋ० ८।१९।३७॥ धाता धातॄणां भुवनस्य यस्पतिः। ऋ० ३०।१२८।७॥ इति बह्वृचाः। धाता धातॄणां। इति तैत्तिरीयाः। तथा, देवानां त्वा पितॄणां। तै० आ० ४।८॥

नामीति किम्। अग्ने विश्वेभिरग्निभिः। ऋ० ३।२४।४॥ नकारयुक्ते इत्येव। कण्वत्विजामष्टमं शूरमाहुः। ऋ० १०।११४।८॥ आमीत्येव। अग्निनाग्निः समिध्यते। ऋ० १।१२।६॥ नामिन इति किम्। देवानामुग्रतीरुप। ऋ० १।२२।९॥ नित्यं स्यात्। उभयत्र विभाषेयम्।

तेस्त्रयः॥ २३

नकारयुक्ते आमि परतस्तिशब्दस्य स्थाने त्रयादेशोविभाष्यते। सा वा एषा त्रयाणामेवावरुद्धा संवत्सरसदः सहस्र-

याजिनोऽष्टहमेधिनः। तै० स० ३।४।३ ॥ त्रयाणां ह वै हविषां स्विष्टकृतेन समवद्यन्ति सोमस्य घर्मस्य वाजिनस्येति। ऐ० ब्रा० १।४।५ ॥ त्रीणामपि समुद्राणाम्। का०। महि त्रीणामवोऽस्तु। ऋ० १०।१८५।१ ॥ कथं, विश्वा ते अग्ने त्रेधा त्रयाणि। ऋ० १०।४५।२ ॥ त्रयः प्रकृत्यन्तरम्। त्रेस्तु, त्रीणि पदा वि चक्रमे। ऋ० १।२२।१८ ॥ इति। व्यवस्थितविभाषेयम्।

अमि पन्थः पन्थे र्बहुलं न चालोपः ॥ २४

अमि परतः पन्थीतिगतस्य शब्दस्य स्थाने पन्थेत्ययमादेशो बहुलं भवति। अकारस्तु न लुप्यते।

सूर्य्याय पन्थामन्वेतवा उ। ऋ० १।२४।८ ॥ त्वं रजिष्ठमनु नेषि पन्थां। ऋ० १।९१।१ ॥ आ देवानामपि पन्थामगन्म। ऋ० १०।२।३ ॥ समानं पन्थामवथो घृतेन। तै० आ० २।६ ॥ न च भवति। पन्थानं भ्रूभ्यां। मा० २५।१ ॥

अमीति किम्। आदित्या ऋजुना पथा। ऋ० १।४१।५ ॥

पथि च जसि ॥ २५

पथीति लुप्तविभक्तिकं पदम्। जसि परतः पन्थीतिगतस्य शब्दस्य स्थाने पथीत्ययमादेशोबहुलं भवति। चकारात् पन्थश्च।

ये चत्वारः पथयोदेवयानाः। न्या० भा० ४।१।६१ ॥ पन्थासो-यंति शवसापरीताः। ऋ० १।१००।३ ॥ ये ते पन्था अधो दिवः। सा० छ० २।२।३।८॥ न च भवति। ये पन्थानो बहवोदेवयानाः।

अश्व ६।५५।१॥ न तत्र रथा न रथयोगा न पत्यानः । ह० उ० ३।१० ॥ अनृक्षरा ऋजवः संतु पन्थाः । ऋ० १०।८५।२३॥ इति बह्वृचाः । अनृक्षरा ऋजवः सन्तु पन्थानः । अथ० १४।४।२४ ॥ इत्याथर्वणिकाः ।

जसीति किम् । दिवि पन्थाश्चराचरः । ऋ० १०।८५।११॥ सुगः पन्था अनृक्षरः । ऋ० १।४१।४॥

आमि च ॥ २६

आमि परतः पन्थीतिगतस्य शब्दस्य स्थाने पथीत्ययमादेशोबहुलं भवति ।

विद्वान् पथीनामुर्वंरितरिक्षं । ऋ० ५।१।११ ॥ न च भवति । पप्रथे पथामजनिष्ट पूषा । ऋ० १०।१७।६ ॥

आमीति किम् । सुगान् पथः कृणुहि देवयानान् । ऋ० १०।५१।५ ॥

अन्नस्थ्यादीनाम् ॥ २७

अस्थ्यादीनां बहुलमन् भवति । अर्थादन्तस्य ।

टादौ विहितमटादावपि भवति । अस्थान्युत्कृत्य जुह्वोति । का० । वि सक्थानि नरोयमुः । ऋ० ५।६१।२ ॥ टादौ स्वरे विहितं व्यञ्जनेऽपि भवति । इंद्रोदधीन्वो अस्थभिः । ऋ० १।८४।१२ ॥ अस्थभ्यः स्वाहा । मा० ३८।१० ॥ भद्रं पश्येमाक्षभिर्यजत्राः । ऋ० १।८९।८ ॥ विभक्तौ विहितमविभक्तावपि

भवति। अश्वन्वंतं यदनस्था बिभर्त्ति। ऋ० १।१६४।४॥ अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः। ऋ०। ६।४८।१८॥ अत्त्रन्वंतः कर्णवंतः सखायः। ऋ० १०।७१।७॥ पश्यदक्षण्वान्न वि चेतदंधः। ऋ० १।१६४।१६॥ कथं, गोपा नेममाविरस्था क्षणोति। ऋ० १०।४८।१०॥ अंतरा सक्थ्या३कपृत्। ऋ० १०।८६।१६॥ पूर्व्वत्र तृतीयैकवचनस्य डा उत्तरत्र द्वितीया-द्विवचनस्य ङा।

द्विवाचिष्वी ॥ २८

द्विवाचिषु परतोऽस्यादीनामीकारोऽन्तादेशो भवति।

अक्षीभ्यां ते नासिकाभ्यां। ऋ० १०।१६३।१॥ तेजो वा-एतदक्ष्योर्यदाञ्जनं। ऐ० ब्रा० १।१।३॥ कथं, यो अक्ष्यौ परि-सर्पति। अथ० ५।२३।३॥ अक्ष्यौ नौ मधुसंकाशे। अथ० ७।३६।१॥ वाञ्छाक्ष्यौ३वाञ्छ सक्थ्यौ। अथ० ६।८।१॥ पुंवद्भावा-न्नौरीम्।

इहापवाद ईकारादेशः उत्सर्गं ङागममनं च बाधित्वा प्रथमतः प्रवर्त्तते बाधितोऽङागमः पश्चादपि न भवति। ङागमे त्वादौ कृते न स्युरस्थ्यादीनि द्विवाच्युपस्थिष्टानि। तेन, अक्षी ते इन्द्र पिङ्गले। भा०। दिवो यदक्षी अमृता अकृण्वन्। ऋ० १।७२।१०॥ अक्षी इव चक्षुषा यातमर्वाक्। ऋ० २।३८।५॥ गुहा शिरो निहितमक्षिगक्षी। ऋ० १०।७८।२॥ इत्यादयोऽप्यनु-

सर्त्तव्याः । अपवादविषयेऽप्युत्सर्गस्य प्रवृत्तेर्वा । आर्षत्वात्तस्यैवोदाहरणान्येतानि ।

अक्ष्णश्चक्षिशब्दस्य ॥ २९

द्विवाक्षिषु परतोऽक्षिशब्दस्य स्थाने अक्ष्णेत्ययमादेशो बहुलं भवति ।

अक्ष्णयोः क्षिपणेरिव । तै० आ० १।४ ॥ न च भवति । तेजोवा एवदक्ष्योर्यदाञ्जनं । कथं, यदक्षात् कुरुते पापं तदक्षात् प्रति मुच्यते । यदाक्षियात् कुरुते पापं तदाक्षियात् प्रति-मुच्यते । तै० आ० । सर्व्वत्र तृतीयैकवचनस्यात् । पूर्व्वत्रानोऽलोपः परत्र तन्वादित्वादियः । मधुषादिप्रपञ्चार्थमिदम् ।

पुंवन्नपुंसकस्य ॥३०

द्विवाक्षिष्विति निवृत्तम् । नपुंसकलिङ्गस्य बहुलं पुंवद्भावो-भवति ।

मधोर्द्यौर्भामि । भा० । मधोस्तृप्ता इवासते । भा० । मधो-र्मदाय मरुतः समन्यवः । ऋ० २।३४।५ ॥ सोम्ये मधौ स्वाहेह मादयाध्वै । ऋ० ७।५९।६ ॥ न च भवति । पृच्यंतीर्मधुना पयः । ऋ० १।२३।१६ ॥ उत प्रियं मधुने युंजाथां रथं । ऋ० ४।४५।२ ॥ स्रोतंति धारा मधुनो घृतस्य । ऋ० ३।१।८ ॥ कथं, मध्वो रसं सुगभस्तिर्गिरिष्ठां । ऋ० ५।४३।४ ॥ तन्वादित्वाद्वः ।

नदीकारात् सेः ॥ ३१

नदीसंज्ञकेकारात् परस्य सेर्बहुलं लोपो भवति ।

येनानुकं मानुषो भोजते विट्। ऋ० १।७२।८ ॥ न च भवति। यमीर्यमस्य बिभृयादजामि। ऋ० १०।१०।९ ॥ मा वां दृको मा दृकीरादधार्षीत्। ऋ० १।१८३।४ ॥ वेदभाष्यकारास्त्वत्र वचनव्यत्ययमाहुः। तेषां नेदमुदाहरणम्। गौरी मिमाय सलिलानि तक्षती। तै आ० १।१० ॥ इति तैतिरीयाः। गौरीर्मिमाय सलिलानि तक्षती। ऋ० १।१६४।४१ ॥ इति

नदीति किम्। दक्षिणावान् ग्रामणीरग्रमेति। ऋ० १०। १०७।५ ॥ ईकारादिति किम्। भद्रा वधूर्भवति यत्सुपेशाः। ऋ० १०।२७।१२ ॥ सेरिति किम्। यच्छुल्मलौ भवति यन्नदीषु। ऋ० ७।५०।३ ॥

अम्शसोश्चादेर्नद्याः ॥ ३२

नदीसंज्ञकात् परयोरम्शसोरादेर्बहुलं लोपो भवति।

यो वः शर्मीं शशमानस्य निंदात्। ऋ० ५।४२।१०॥ ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व सहवः सयोनीः। ऋ० । १०।३०। १०॥ न च भवति। यमस्य मा यम्यं काम आगन्। ऋ० १०। १५।७॥ सूर्म्यं सुषिरामिव। ऋ० ८।६८।१२ ॥ ते अन्यामन्यां नद्यं सनिष्णत। ऋ० १।१३१।५॥ राजा समुद्रं नद्योऽवि गाहते। ऋ० ८।८६।८ ॥ नद्यो अजिग्वदद्रुहः। ऋ० ८।९।४ ॥ भोजा जिग्यु-

र्वध्वं१ या सुवासाः। ऋ० १०।१०७।८॥ अपाङ् गर्भः प्रस्व-१ आ विवेश। ऋ० ७।८।३॥ शमीं च शम्यं च। गौरीं च गौर्यं च। किशोरीं च किशोर्यं च। भा०॥

अम्शसोरिति किम्। वज्रेण खान्यत्रृणन्नदीनां। ऋ० २।१५।३॥ नद्या इति किम्। मित्रं भगमदितिं नूनमश्याः। ऋ० ५।४२।१॥

आसोऽम्॥ २३

नद्याः परस्यासो बहुलमसादेशो भवति।

उपह्वरे नद्योऽंशुमत्याः। ऋ० ८।९६।१४॥ आ काम-मृण्वे वध्वः। ऋ० ५।७४।५॥ पतिर्यद्वध्यो३वाससा स्वमंगमभिधि-त्सते। ऋ० १०।८५।३०॥ न च भवति। सं भूम्या अंता ध्वसिरा अट्टच्चत। ऋ० ७।८३।३॥ जनिता दिवो जनिता पृथिव्याः। ऋ० ८।३६।४॥ एवमन्यत्रापि।

आस इति किम्। अव स्मयंत विद्युतः पृथिव्यां। ऋ० १।१६८।८॥ कथं, दिवस्त्वा परस्यायाः। प्राणस्य त्वा परस्यायै। तै० आ० ४।११॥ परस्या प्रकृत्यन्तरम्। मधुषादित्वाद्वा। नद्या-इत्येव। रथं देवासो अभि विक्षु वाजयुं। ऋ० ३।३१।२॥

भूसुधियोर्यवावियुवौ च स्वरे॥ २४

विभक्तिस्वरे परतो भू सुधी इत्येतयोर्यवावियुवौ च भवतः। आन्तरतम्यात्। यवार्थमारम्भः। इयुवौ चेत्युत्तरार्थमिहार्थश्च।

वनेषु 'चित्रं विभ्वं' विशे विशे । ऋ० ४।७।१। विभुवं वा । अयुद्धसेनोविभ्वा विभिंदता । ऋ० १०।१३८।५ ॥ विभुवा वा । महांतो मक्षा विभ्वो३ विभूतयः । ऋ० १।१६६।११ ॥ विभवो-वा । उक्थवाहसे विभ्वे मनीषां । ऋ० ८।८६।११ ॥ तं त्वा वयं सुध्यो ३ नव्यमग्ने । ऋ० ६।१।७ ॥ सुधियोवा । कथं, नाना रथं वा विभवो ह्यख्याः । ऋ० ३।६।८ ॥ विभुः प्रकृत्यन्तरम् । यदा डुविषये क्विप्, तदोदाहरणम् । यदा तु डुस्तदा त्वस्येयं यत्नान्तरम् ।

भूसुधियोरिति किम् । स्त्रियो याः पुण्यगंधाः । ऋ० ७।५५।८ ॥ स्वरे इति किम् । माकिर्देवानामप भूरिह स्याः । ऋ० ।१०।११।९ ॥

बहुलं तन्वादिषु ॥ ३५

तन्वादिषु बहुलं यवाविधुवौ च भवतः ।

शूरो यो युत्सु तन्वं परिव्यत । ऋ० २।१७।२ ॥ प्रियामिंद्रस्य तन्वमवीवृधत् । ऋ० ८।७३।२ ॥ रक्षोत नस्तन्वो३ अप्रयुच्छन् । ऋ० १०।४।७ ॥ जनयन्मित्रं तन्वे३स्वायै । ऋ० १०।८।४ ॥ तन्वं पुषेम । तनुवं पुषेम । विभ्वं पुषेम । विभुवं पुषेम । स्वर्गोलोकः । सुवर्गो लोकः । का० । त्र्यंबकं यजामहे । ऋ० ७।५९।१२ ॥ इति बह्वृचाः । त्रियम्बकं यजामहे । मा० ३।६० ॥ इति माध्यन्दिनीयाः । यस्यै बह्वीस्तनुवो-

वीतपृष्ठाः । तै० ब्रा० १।४।८ ॥ ये ते अग्ने शिवे तनुवौ । यास्ते अग्ने शिवास्तनुवः । तै० ब्रा० १।१।७ ॥ घृतेन त्वं तनुवो वर्धयस्व । तै० स० ३।१।४ ॥ इन्द्रवायुवोः पात्रमसि । तै० स० ३।१।६ ॥ ते सुवर्गाय लोकायाग्निमचिन्वन्त । तै० ब्रा० १।१।२ ॥ सुवर्भानुरासुरः सूर्यं तमसा विध्यत् । तै० स० २।१।२ ॥ देवीरापोऽग्रेगुवोऽग्रेपुवः । यज्ञपतिं देवयुवं । मा० १।१२ ॥ तस्मान्नान्वास्ते न संयाजयन्ति पत्नियै गोपीथाय । तै० ब्रा० १।६।८॥ ङेः स्थाने ऐ, पश्वादियः । इन्द्राग्नियोर्विशाखे । तै० ब्रा० १।५।१ ॥ कथं, तच्चन् धेनुं सबर्दुघां । ऋ० १।२०।३ ॥ सुबः प्रकृत्यन्तरं क्षीरार्थे । तन्वादिराकृतिगणः ।

श्रीग्रामण्योर्नुरामि ॥ ३६

आमि परतः श्री ग्रामणी इत्येतयोर्नुरागमो भवति ।

श्रीणामुदारो धरुणो रयीणां । ऋ० १०।४५।५ ॥ अपि तत्र सूतग्रामणीनां । भा० । यस्मिन् पक्षे नदीवद्भावो नास्ति ततस्मिन्नपि नुरागमो यथा स्यादिति श्रीग्रहणम् । ग्रामणी-ग्रहणमसमाहारार्थम् । भाष्ये तु, नदीवद्भावस्य छन्दसि व्यवस्थितविभाषया सूतग्रामण्योर्हृन्दैकवद्भावेन च सिद्धेः प्रत्याख्यातमिदम् ॥

धियोबहुलम् ॥ ३७

धीशब्दस्य बहुलं नुरागमो भवति । आमि परे । यः किल धीशब्दः प्रज्ञावचनो यश्च कर्मवचनो नैघण्टुके काण्डे पठ्यते, अविशेषात्तयोरुभयोर्विधिरयम् ।

स धीनां योगमिन्वति। ऋ० १।१८।७॥ यंतारं धीना-मुशिजं च वाघतां। ऋ० ३।३।८॥ भुवोऽविता वामदेवस्य धीनां। ऋ० ४।१६।१८॥ धीनामंतः सवर्दुघः। ऋ० ८।१२।७॥ न च भवति। विश्वासामूधः स धियामुदंचनः। ऋ० ५।४४।१३॥

गोः पादान्ते ॥ ३८

ऋचः पादान्ते वर्त्तमानस्य गोशब्दस्य नुरागमो भवति। आमि परे। ऋचां खलु पादव्यवस्था।

विद्मा हि त्वा सत्पतिं शूर गोनां। ऋ० १०।४७।१॥ शतं कक्षीवाँ असुरस्य गोनां। ऋ० १।१२६।२॥ कक्षीवति शतहिमाय गोनां। ऋ० ८।७४।८॥

पादान्ते इति किम्। गवां शता पृक्षयामेषु पक्वे। ऋ० १।१२२।७॥ यो आख्यानां योगवां गोपतिर्वशी। ऋ० १।१०१।४। कथं, विराजं गोपतिं गवां। १०।१६६।१॥ बहुला-धिकारादियमिष्टसिद्धिरिति॥

दृक्खवस्खतवसां सौ ॥ ३९

दृक् खवस् खतवस् इत्येतेषां नुरागमो भवति। सौ परे। दृह दृगिति तदन्तविधिरिष्टः। खतगत्वनिर्देशादृगत्वे सति विधिरयम्।

ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च। तै० सं० ४।६।५॥ कीदृङ्डिंद्रः सरमे का दृशीका। ऋ० १०।१०८।३॥ यो विश्वतः

सुप्रतीकः सट्टङ्कसि। ऋ० १।८४।७॥ सुक्षत्सुपाणिः स्ववाँ ऋतावा। ऋ० ३।५४।१२॥ गिरिर्न यः स्वतवाँ ऋष्व इंद्रः। ऋ० ४।२०।६॥ स्वतवाँश्च प्रघासी च। मा० १७।८५॥

कथं, यादृगेव दृष्टश्रे तादृगुच्यते। ऋ० ५।४४।६॥ क्रिया-विशेषणत्वात्। मादृक् क्वचन विद्यते। तै० आ० १।५॥ इति स्वरूपग्रहणात्।

एषामिति किम्। स युधः सत्वा ऋजीषत् समद्वा। ऋ० ६।१८।२॥ साविति किम्। गिरयो न स्वतवसो रघुष्यदः। ऋ० ऋ० १।६४।७।

दीर्घः षपूर्व्वस्यानो घुटासम्बुद्धौ ॥ ४०

असम्बुद्धौ घुटि परतः षपूर्व्वस्यानो बहुलं दीर्घो भवति। अर्थादुपधायाः।

स तक्षाणं तिष्ठन्तमब्रवीत्। स तक्षणं तिष्ठन्तमब्रवीत्। ऋभुक्षाणमिन्द्रं। ऋभुक्षणमिन्द्रं। का०। ऋभुक्षणमृभुक्षरयिम्। सा० ऋक्० ३।१।१।६॥ उक्षाणं पृश्निमपचंत वीराः। ऋ० १।१६४।४३॥ सिंधोरुच्छ्वासे पतयंतमुक्षणं। सा० ऋ० ६।२।२।११॥

षपूर्व्वस्येति किम्। पूषा राजानमाघृणिः। ऋ० १।२३।१४॥ अन इति किम्। अग्नी रक्षांसि सेधति। ऋ० १।७८।१२॥ नित्यं सत्रात्। घुटीति किम्। घस्मन् इंद्र उक्षणः। ऋ० १०।८६।१३॥ अग्ने वक्षाभिरुक्षभिः। ऋ०

२।७।५ ॥ असम्बुद्धाविति किम् । द्यौष्पिता जनिता सत्य-
मुक्षन् । ऋ० ४।१।१० ॥

उषसश्च ॥ ४१

उषस् इत्येतस्य बहुलं दीर्घो भवति । अर्थादुपधायाः ।
आत् सूर्यं जनयन् द्यामुषासं । ऋ० १।३२।४ ॥ अवी-
हधध्वमुग्रतीरुषासः । ऋ० १।१२४।१३ ॥ रेवद्दच्छंतु सुदिना
उषासः । ऋ० १।१२४।९ ॥ न च भवति । इंद्रं सिषक्त्युषसं
न सूर्यः । ऋ० १।५६।४ ॥ संहितायामेवायं दीर्घः । ह्रस्वमेव
त्ववग्रहे पठन्ति ।

शीर्षन् शिरसः ॥ ४२

शिरःशब्दस्य बहुलं शीर्षन्नादेशो भवति ।
शीर्ष्णो द्यौः समवर्त्तत । ऋ० १०।९०।१४ ॥ शीर्ष्णा
शिरः प्रति दधौ वरूथं । ऋ० १०।२७।१३ ॥ शीर्षन्निंद्रस्य
क्रतवो निरेके । ऋ० ८।९६।३ ॥ यच्चं शीर्षण्यं मस्तिष्कात् ।
ऋ० १०।१६३।१ ॥ न च भवति । मदे सुतस्य शवसा भिन-
च्छिरः । ऋ० १।५२।१० ॥ शिरो अपश्यं पथिभिः सुगेभिः ।
ऋ० १।१६३।६ ॥ उपर्य्युपरि शिरोहरेत् । अधोधः शिरोहरति ।
तै० ब्रा० १।१।५ ॥ भाष्ये तु शिरःपर्य्यायः शीर्षन्शब्दः प्रश-
स्यतरं छन्दसि द्रष्टव्य इत्युक्तम् ।

अथ, अर्षन्शिरस्य वरुणस्य धर्मणा । ऋ० ८।१०७।१५ ॥

तानि धर्माणि प्रथमान्यासन् । ऋ० १०।९०।१६ ॥ इत्यादयः । नैते धर्मशब्दस्य प्रयोगाः किन्तु धरतेर्मनन्तस्य धर्मन्शब्दस्य । यदेकस्याधिधर्मणि । तै० स० १।८।३ ॥ इत्येवमादयोऽप्येते-नैवोपपादनीयाः ।

स्नोरन्तयोर्लोपो न चालुप्तवत् ॥ ४३

लिङ्गान्तयोः सकारनकारयोर्बहुलं लोपो भवति । न च लुप्तौ तावलुप्तवद्भवतः ।

अभ्रस्य पारे भुवनस्य मध्ये । तै० आ० १०।१ ॥ चक्षोः सूर्यो अजायत । ऋ० १०।९०।१३ ॥ हस्तिचर्मे जुहोति । का० । ऋषभचर्मेध्यभिषिञ्चति । तै० ब्रा० २।७।२ ॥ ब्रह्म-सामं भवति । का० । प्रथिष्ट यस्य वीरकर्मभिष्णत् । ऋ० १०।६१।५ ॥ अजलोमैः सꣳस्पृजति । तै० आ० ५।२ ॥ इदा धनुं सृष्टतीमप्स्वं१तः । ऋ० १०।२७।१७ ॥ गायत्रं छन्दं । पर-मात्मं सरूपं । तै० आ० १०।३३ ॥ आत्माय नमः । तै० आ० १०।१६ ॥

न च भवति । वीतं पातं पयस उस्रियायाः । ऋ० १।१५३।४ ॥ निश्चर्मणो ऋभवो गामपिंशत । ऋ० १।११०।८ ॥ यस्य रथन्तरसामा सोमः स्यात् । मै० भा० । ब्रह्मसाम । का० । एतानि वा असौ देवतानामानि देवतानामैरेवैनामाह्वयति । एतानि वा असौ मनुष्यनामानि मनुष्यनामैरेवैनामाह्वयति । तै० आ० ५।७ ॥ अन्त्रमनुष्ययोः प्रकृत्यन्तरमायुं नैघण्टुकाः समा-

मनन्ति । हृषा पुनान आयुषु । ऋ० ९।१९।२ ॥ इतीयव-मादीनि तस्योदाहरणानि । न त्वायुषः सलोपः । एवं, नमः प्रकृत्यन्तरमवार्थं पठ्यते । तस्य, चयद्वीराय नमसा दिदिष्टन । ऋ० १०।८२।८ ॥ इत्यादयः प्रयोगाः । नत्यर्थत्वे त्वास्थेयं यत्नान्तरम् ।

अङ्गः सः ॥ ४४

अहन् इतीयतस्य नकारस्य स्थाने बहुलं सकारो भवति । वाहधीथा अह्नोभिरिव द्यौः । ऋ० १।१३०।१० ॥ अह्नोभि-रद्भिरक्तुभिर्व्यक्तं । ऋ० १०।१४।८ ॥ न च भवति । न वां द्यावोऽहभिर्नीत सिंधवः । ऋ० १।१५१।८ ॥ ईर्म्मा तस्थुषी-रहभिर्दुदुक्षे । ऋ० ५।६२।२ ॥ चकार महीरवनीरहभ्यः । ऋ० ७।८७।१ ॥ प्रास्तुभ्य इंद्रः प्र हधो अहभ्यः । ऋ० १०।८८।११ ॥

मासुषःस्वस्स्वतवसां भे दः ॥ ४५

विभक्तौ भकारे परतो मास् उषस् स्वस् स्वतवस् इतीयतेषां दो भवति । अर्थादन्तस्य ।

मात्भिः मरद्भिः । सि० । मात्भिरिष्टा इन्द्रो हवत्रहा । भा० । ससुषद्भिरजायथाः । ऋ० १। ६।३ ॥ स्वद्भिः । भा० । अवतेरसुन् । शोभनमवो येषां तैरित्यर्थः । स्वतवद्भिः । भा० । तु इत्यगणपरिपठितो धातुस्तस्मादसुन् । स्वं तवो येषां तैरित्यर्थः ।

एषामिति किम् । होता तमू नमोभिरा कृणुध्वं । ऋ० १।७७।२ ॥ मे हृति किम् । दोषा अस्मभ्यमुषसश्च पिन्वतं । ऋ० १।२४।३ ॥ विभक्ताविति यव । क्रत्वा चेतिष्ठो विश्वा-मुषभुत् । ऋ० १।६५।५ ॥

मन्तुवन्सोर्विसृष्टः सम्बुद्धौ ॥ ४६

सम्बुद्धौ परतो मन्तु वन्स् इतीयवमन्तस्य विसर्जनीयो-भवति । अर्थादन्तस्य ।

मन्त्वन्तस्य तावत् । इंद्र मरुत्व इह पाहि सोमं । ऋ० ३।५१।७ ॥ यद्वा मरुत्वः परमे सधस्थे । ऋ० १।११०।८ ॥ मरुतो विद्यन्ते अस्येति मन्तुः । बहुलं वोमन्तो रिति मकारस्य वकारः । संयोगान्तस्य लोपे नकारस्य विसर्गः । तथा । प्र यह्वो हरिवः प्रातरग्न । ऋ० १।३३।५ ॥ एतेन गातुं हरिवो विदोनः । ऋ० १।१७३।१३ ॥ विश्वेत्ता ते हरिवः श्चीवः । ऋ० १०।४८।११ ॥ हरी विद्येते अस्येति मन्तुः । विश्वा हि माया अंवसि स्वधावः । तै० आ० १।२ ॥ एव-मन्यंचापि ।

वन्सन्तस्य खल्वपि । त्र्यङ्गोरस्य तव रुद्र मीढ्वः । ऋ० १।१४३।२ ॥ मीढ्वस्तोकाय तनयाय मृळ । ऋ० २।३३।१४ ॥ इन्द्र साढ्वः । का० । दाम्वान् साढ्वान् मीढ्वांश्चेति वन्स्वन्तो निपातः ।

मन्तुवन्सोरिति किम् । ब्रह्मन् वीरब्रह्मक्षतिं जुषाणः । ऋ० ७।२८।२ ॥ सम्बुद्धाविति किम् । विष्णुरित्था परममस्य विद्वान् । ऋ० १०।१।३ ॥

वनश्च ॥ ४७

वन इत्युपत्सृष्टानुबन्धनिर्देशः क्वनिप्वनिपोरुपसंग्रहार्थः । वनो नकारस्य विसर्जनीयो भवति । सम्बुद्धौ ।

यस्त्वायंतं वसुना प्रातरित्वः । ऋ० १।१२५।२ ॥ अन्येभ्योऽपि दृश्यन्ते इति क्वनिप् । एवमन्यत्रापि ।

अन्यत्रापि दृश्यते ॥ ४८

अन्यत्रापि नकारस्य विसर्जनीयो दृश्यते ।

विननादाभिधावः । तै० आ० १।३ ॥ अभिधावन्निति प्राप्ते । दृशिग्रहणं प्रयोगानुसारार्थम् ।

नेट् पावकादिषु ॥ ४९

पावकादिष्विकारो न भवति । के प्रत्यये स्वीकृताकारपरे पूर्वोऽकारइकारमित्यस्य प्रतिषेधोऽयम् ।

मधुश्चुतः शुचयो याः पावकाः । ऋ० ७।४९।३ ॥ पावका नः सरस्वती । ऋ० १।३।१० ॥ पुनातेः पावयतेर्वा वुण् । स्त्रियामादा । यासु अलोमकाः । का० । दयन्तिका

शकुंतिका सका जघास ते विषं । ऋ० १।१९१।११ ॥ प्रावकादि-राकृतिगणः । तस्यैव बहुलाधिकारस्य प्रपञ्चार्थमिदम् ।

युष्मदोऽम् प्रथमाद्विवचनस्य ॥ ५० ॥

युष्मदः परस्य प्रथमाद्विवचनस्य स्थाने अम् भवति ।

युवं वस्त्राणि पीवसा वसाथे । ऋ०।१।१५२।१ ॥ त्रिर्नांद्यं वहतमश्विना युवं । ऋ० १।३४।४ ॥ आ मा गंतां पितरा मातरा युवं । आ० क० । युवामिति प्राप्ते ।

युष्मद इति किम् । ऋतेन याहतावृधावृतस्य ज्योतिष-ष्पती । ता मित्रावरुणा हुवे । ऋ० १।२३।५ ॥ प्रथमाद्विव-चनस्येति किम् । युवां हवंते अश्विना । ऋ० १।४७।४ ॥

मधुषादीनि यथाऽऽम्नातम् ॥ ५१ ॥

मधुषादीनि यथैवाम्नातानि तथैव निपातयितव्यानि । मधुषा संयौति । तै० स० २।४।९ ॥ मधुषादिराकृतिगणः ।

इति चान्द्रक्रान्त्यां कातन्त्रवृत्तिप्रक्रियायां नाम्नि चतुष्टये

प्रथमः पादः ।

नाम्निचतुष्टये द्वितीयः पादः ।

व्यत्ययो विभक्तिलिंगवचनानाम् ॥ १

विभक्तिलिङ्गवचनानां बहुलं व्यत्ययो भवति ।

युक्ता मातासीऽुरि दक्षिणायाः । ऋ० १।१६४।९ ॥ दक्षिणायामिति प्राप्ते इति महाभाष्यम्। वेदभाष्यकाराणान्तु वैदिक्येवेयं षष्ठी । अनृक्षरा ऋजवः संतु पंथाः । ऋ० १०।८५। २३ ॥ इति पन्थिशब्दस्य पन्थादेशात् सिद्धम् । पन्थान इति प्राप्ते इति पुनः पाणिनीयाः । चक्रुव क्रंददाध्ये शिवायै ।ऋ० १०।८५।१३ ॥ शिवे इति प्राप्ते विभक्तिलिङ्गयोर्व्यत्ययः । प्रजापतिः प्रथमजा ऋतस्य । तै० आ० १।२३ ॥ प्रथमज इति प्राप्ते । अमी ये सुभगे दिवि विचृतौ नाम तारके । तै० आ० २।६ ॥ अमू इति प्राप्ते। पश्यदक्षण्वान्न विचेतदंधः । ऋ० १।१६४।१६ ॥ पश्यन्निति प्राप्ते । निदहत् पृथिवीं सर्व्वां । तै० आ० १।२ ॥ निदहन्निति प्राप्ते । येनावृतं खश्च दिवं महीञ्च । अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तं । तै० आ० १०।१ ॥ महो इति अणीयः इति महत् इति च प्राप्ते । श्रोत्रं ते चक्रे आस्तां । ऋ० १०।८५।११ ॥ श्रोत्रे इति प्राप्ते । शतं वो अंब धामानि । ऋ० १०।९७।२ ॥ अम्बाः

इति प्राप्ते । अयं देवाय जन्मने । ऋ० १।२०।१ ॥ देवेभ्यो-जन्मभ्य इति प्राप्ते । अनागा मित्रे वरुणे स्वस्तये श्रेष्ठे स्याम सवितुः सवीमनि । ऋ० १०।३६।१२ ॥ अनागस इति प्राप्ते ।

द्यूतव्यवहारयोर्दिवः कर्मणि द्वितीया ब्राह्मणे ॥ २

द्यूतमप्राणिभिः क्रीड़नम् । व्यवहारः क्रयादिः । ब्राह्मणं मन्त्रेतरवेदभागः । द्यूतव्यवहारयोरर्थयोर्वर्त्तमानस्य दीव्यतेः कर्म्मणि द्वितीया भवति । ब्राह्मणविषये प्रयोगे ।

गां प्रदीव्यन्ति । गामस्य तदहः सभायां दीव्येयुः । भा० । प्रष्टौहीं दीव्यति । मी० भा० । कथं, अक्षैर्दीव्यति शौनः-शेपमाख्यापयति । मी० भा० । करणे तृतीया । दिवस्तदर्थस्य कर्म्मणि साधकतमादन्यत्र षष्ठीमिच्छन्ति, तद्बाधनार्थोऽयं योगः ।

तृतीया जुहोतेरन्यतरस्याम् ॥ ३

जुहोतेः कर्म्मणि तृतीया भवति वा ।

जर्त्तिलयवाग्वा जुहोति । गवेधुकयवाग्वा जुहोति । सक्तून् जुहोति । मी० भा० । यवाग्वाऽग्निहोत्रं जुहोति । यवागूमग्निहोत्रं जुहोति । भा० । अग्निहोत्रशब्दोऽत्र हविर्वचनः । अग्नये हूयते इति व्युत्पत्तेः । यस्याग्निहोत्रमधिश्रितमित्यादि प्रयोगाच्च । हविः खल्वधिश्रीयते । यवागूश्चात्र हविः । तत्र कर्म्मणि तृतीया । यवाग्वाख्यं हविर्जुहोतीत्यर्थः ।

भाष्ये तु प्रत्याख्यातमिदम्। अग्निहोत्रशब्दस्य हविर्ज्योतिषोर्जुहोतेश्च प्रक्षेपप्रीणात्यर्थयोः प्रयोगात् कर्मकरणयोर्द्वितीयातृतीयाभ्यामुपपत्तेः। यवाग्वा हविषाऽग्निं प्रीणयतीत्येकत्र, यवागूं हविरग्नौ प्रक्षिपतीत्यन्यत्रार्थः। अग्निहोतं प्रज्वलितमिति ह्यग्निहोत्रशब्दो ज्योतिरर्थः, अग्निषु हूयमानेष्विति च जुहोतिः प्रीणात्यर्थो दृश्यते।

प्रेष्यब्रुवोर्हविषाप्रस्थिते षष्ठी देवतासंप्रदाने ॥ ४

प्रेष्येति दैवादिकस्येष्यतेः पञ्चमीमध्यपुरुषैकवचनान्तं पदम्। तत्साहचर्य्याद्ब्रुविरपि तद्विषयएव गृह्यते। प्रेष्यब्रुवोरप्रस्थिते हविषि कर्मणि षष्ठी विभक्तिर्भवति। देवतासम्प्रदाने विषये।

अग्नये छागस्य हविषो वपाया मेदसः प्रे३ष्य। अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रू३हि। का०।

प्रेष्यब्रुवोरिति किम्। अग्नये छागं हविर्वपां मेदो-जुहुधि। का०। हविषीति किम्। अग्नये गोमयान् प्रेष्य। का०। अप्रस्थिते इति किम्। यत्र प्रस्थितत्वेन हविर्विशिष्यते तत्र मा भूत्। इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रे३ष्य। भा०। देवतासंप्रदाने इति किम्। माणवकाय पुरोडाशं प्रेष्य। उभयोर्विभाषयोर्मध्ये विधिर्नित्यः।

यजेः करणे वा ॥ ५

यजेः करणे षष्ठी विभक्तिर्भवति वा।

सोमस्य यजते। सोमेन यजते। घृतस्य यजते। घृतेन यजते। का०। यजेरिति किम्। दध्ना जुहोति। मी० भा०। करणे इति किम्। पृषदाज्येनानुयाजान् यजति। मी० भा०।

चतुर्थ्यर्थे ॥ ६

चतुर्थ्या अर्थे षष्ठी भवति वा।

पुरुषमृगचन्द्रमसो गोधाकालका दार्वाघाटास्ते वनस्पतीनां क्षुकवाकुः सावित्रोहंसो वातस्य नाक्रोमकरः कुलीपयस्ते अकूपारस्य क्रियै शल्यकः। मा० २४।३५॥ प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय क्षणोमनुष्यराजाय मर्कटः शार्दूलाय रोहिद्वृषभाय गवयी क्षिप्रश्येनाय वर्त्तिका नीलंगोः क्षमिः समुद्राय शिशुमारो हिमवते हस्ती। मा० २४।३०॥ व्यवस्थितविभाषेयम्।

चतुर्थीसप्तम्यौ षष्ठ्यर्थे ॥ ७

अष्ठा अर्थे चतुर्थीसप्तम्यौ भवतो वा।

चतुर्थी तावत्। स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं परिग्रहाणेति। तै० स० २।५।१॥ यां मलवद्वासस्यं

सम्भवन्ति यस्ततो जायते सोऽभिशस्तः । यामरण्य तस्यै स्तेनो यां पराचीं तस्यै क्रीतमुख्यप्रगल्भो या स्नाति तस्या-अमुमारुक्षो या अभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणक्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बन्धुको या पर्णेन पिवति तस्या उन्मादुको या खर्वेण पिवति तस्यै खर्वः । तै० स० २। ५।१ ॥ सर्व्वत्र तस्या इति प्राप्ते । रजस्वलायाः खर्वपानादि-प्रतिषेधार्थवादोऽयम् । अहल्यायै जार । मनायै तन्तुः । भा० । नवाग्नरे जायायै कामाय जाया प्रिया भवति । बृ० उ० २।४।५ ॥ तद्रोहिण्यै रोहिणित्वं । तै० ब्रा० १।१।२ ॥

सप्तमी खल्वपि । अनागा मित्रे वरुणे स्वस्तये । ऋ० १०।३६।१२ । मित्रस्य वरुणस्य इति प्राप्ते । षष्ठ्यपि । कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम । ऋ० १। २४।१ ॥ न तस्य प्राणा उत्क्रामन्ति । बृ० उ० ४।४।६ ॥ तच्छर्कराणाꣳ शर्करत्वं । तै० ब्रा० १।१।३ ॥ षट्सूत्रीयं प्रपञ्चार्था ।

पुनर्वसोरेकवचनं नक्षत्रे ॥ ८

नक्षत्रेऽभिधेये पुनर्वसुशब्दादेकवचनं भवति वा । पुनर्वसु-नक्षत्रस्य द्वितारकत्वान्नित्यवत् द्विवचने प्राप्ते पक्षे एकवच-नार्थोऽयमारम्भः ।

पुनर्वसुर्नक्षत्रमदितिर्देवता। का०। ते पुनर्वस्वोरादधत। पुनर्वस्वोरग्निमादधीत। तै० ब्रा० १।१।२॥

पुनर्वसोरिति किम्। न पूर्व्वयोः फल्गुन्योरग्निमादधीत। उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य यदुत्तरे फल्गुनी। तै० ब्रा० १।१२॥ नक्षत्रे इति किम्। अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं। ऋ० १०।१८।१॥ देवार्थे द्विवचनमेव। तथा, पुनर्वसू माणवकौ। का०।

विशाखायाश्च॥ ९

नक्षत्रे अभिधेये विशाखाशब्दादेकवचनं भवति वा।

विशाखा नक्षत्रमिन्द्राग्नी देवता। विशाखे नक्षत्रमिन्द्राग्नी देवता। का०। भाष्ये तु प्रत्याख्यातमिदं योगद्वयम्। व्यत्ययेन सिद्धेः। प्रपञ्चार्थन्तु भविष्यति। किमिव ह्यत्र व्यत्ययेन प्रत्याख्यातुं न शक्यते।

इति चान्द्रकान्तायां कातन्त्रच्छन्दप्रक्रियायां नाम्निचतुष्टये

द्वितीयः पादः।

नाम्नि चतुष्टये तृतीयः पादः ।

निसः सस्य षस्तपतावपौनःपुन्ये ॥ १

तिपा धातुर्निर्दिश्यते । तपतौ परतो निसः सकारस्य षकारो भवति । अपौनःपुन्येऽर्थे ।

निष्टप्तं रक्षो निष्टप्ता अरातयः । मा० १।७ ॥ सदपि पौनःपुन्यं न विवक्षितमित्येके । नास्तेव तदित्यपरे । निष्टप्ता शत्रुं पृतनासु सासहिः । ऋ० २।२३।११ ॥

निस इति किम् । आदित् सूर्य्यस्तपति तप्यतुर्वृथा । ऋ० २।२४।८ ॥ तपताविति किम् । जाते निःष्ठामदधुर्गोषु वीरान् । ऋ० ३।३१।१० ॥ पूर्वपदस्थान्निमित्तादिति षत्वम् । भाषायामपि । निष्टपति सुवर्णम् । सकृत् तपतीत्यर्थः । पौनः-पुन्ये तु, निस्तपति सुवर्णं सुवर्णकारः ।

ततक्षुस्ततक्षतुस्तुरेषु ॥ २

तुरे अकार उच्चारणार्थः । ततक्षुः ततक्षतुः तुर इत्येतेषु परतो निसः सकारस्य षकारो भवति ।

ततक्षुः । वेनादेकं स्वधया निष्टतक्षुः । ऋ० ४।५८।४ ॥ यतो द्यावापृथिवी निष्टतक्षुः । ऋ० १०।३१।७ ॥ ततक्षतुः । तमोजसे धिषणे निष्टतक्षतुः । ऋ० ८।६१।२ ॥ तुर । प्र वउग्राय निष्टुरे । ऋ० ८।३२।२७ ॥ ते पुत्र संतु निष्टुरः । ऋ० ८।७७।२ ॥ निःऽतुरे इति निःऽतुरः इति चावग्रहन्ति ।

एष्विति किम् । यदाशसा निःशसाभिशसा । ऋ० १०।१६४।३ ॥ कथं, निष्षहमानो यमते । ऋ० १।१२७।३ ॥ सहेः षत्वे निसो विसर्गस्य पररूपात् सिद्धम् । निस इतीत्यव । सप्त मर्य्यादाः कवयस्ततक्षुः । ऋ० १०।५।६ ॥

दुस्तरे ॥ ३

तरे परतो दुसः सकारस्य षकारो भवति ।

अस्मासु यन्मरुतो यच्च दुष्टरं । ऋ० १।१३९।८ ॥

दुस इति किम् । ईजानस्तरति द्विषः । ऋ० ७।५९।२ ॥ तरे इति किम् । ये दुःषहासो वनुषा बृहंतः । ऋ० ९९१।५ ॥ कथं, न दुष्टुतिर्द्रविणोदेषु शस्यते । ऋ० १।५३।१ ॥ स्तौतेः षत्वे दुसो विसर्गस्य लोपः ।

नामिनस्तेयुष्मादेशेष्वन्तःपादम् ॥ ४

ते इति तच्छब्दस्य रूपम् । तत् ते युष्मदादेशेषु परतो-नामिनः परस्य सकारस्य षकारो भवति । स चेत् सकार ऋचः पादमध्ये भवति । ऋचामेव पादव्यवस्था ।

तत् । अद्या नकिष्टदा मिनत् । ऋ० ४।३०।२३ । तत् आ मिनत् इति पदकाराः पठन्ति । अग्निष्टच्छोचन्नप बाधतामितः । ऋ० ७।५०।२ ॥ ते । ईयुष्टे ये पूर्व्वतरा-मपश्यन् । ऋ० १।११३।११ ॥ पुरू णंसेन वावृधुष्ट इंद्रं । ऋ० १०।७३।२ । त्वम् । शुचिष्टमसि प्रियो न मित्रः । ऋ० १।८१।३ ॥ ददिष्टमिंद्रापांसि वाजान् । ऋ० २।१७।८ ॥ त्वा । दधुष्टा भृगवो मानुषेष्वा । ऋ० १।५८।६ ॥ हविष्टा संतं हविषा यजाम । ऋ० १०।१२४।६ ॥ ते । योनिष्ट इंद्र निषदे अकारि । ऋ० १।१०४।१ ॥ स्वादुष्टे अस्तु संमुदे । ऋ० ८।१७।६ ॥ तव । अप्स्वग्ने सधिष्टव । ऋ० ८।४३।९ ॥ न किष्ट्वद्रथीतरः । ऋ० १।८४।६ ॥ इति च ॥

बहुलाधिकारात्, आविस्तत् क्षध्व यदसत्त उक्थ्यं१ । ऋ० २।२३।१४ ॥ यद्दत्तद्विदुस्त इमे समासते । ऋ० १।१६४।३९ ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः । ऋ० २।१।१ ॥ त्रिः षष्टिस्त्वा मरुते वावृधानाः । ऋ० ८।९६।८ ॥ इत्यादयोऽप्यनुसर्त्तव्याः ।

नामिन इति किम् । अश्वयो वारो अभवस्तदिंद्र । १।३२।१२॥ त्वमपो अजनयस्त्वं गाः । ऋ० १।९१।२२ ॥ ब्रह्माणस्त्वा शतक्रतो । ऋ० १।१०।१ ॥ इंद्र मर्त्यस्तवोतिभिः । ऋ० १।८३।१ ॥ एष्विति किम् । प्र वाजेभिस्तिरत पुष्यसे नः । ऋ० ७।५७।५ ॥ अन्तःपादमिति किम् । यस्य आत्मनो विदाभूदग्निस्तत् पुनराह जातवेदा विचर्षणिः । सि० । त्वं सोमासि सत्-

पतिस्त्वं राजोत द्युत्रहा । ऋ० १।८१।५ ॥ तमाविध सुश्रवसं नवोतिभिस्तव नामभिरिंद्र तूर्वयाणं । ऋ० १।५३।१० ॥

यजुष्येकेषाम् ॥ ५

तदादिषु परतो नामिनः परस्य सकारस्य षकारो भवति। यजुषि विषये। एकेषामाचार्य्याणां मतेन। न भवति त्वन्येषामाचार्य्याणां मतेन। इह तूभयोः प्रमाणत्वाद्विकल्पः सिद्धो भवति। यजुषि पादाभावादनन्तःपादार्थं वचनम्।

अग्निष्टत्। अग्निस्तत्। अर्च्चिर्भिष्ट्वं। अर्च्चिभिस्त्वं। अग्निष्टे अग्रं। अग्निस्ते अग्रं। का०। अग्निष्ट्वा वसुभिः पुरस्ताद्गोचयतु। तै० आ० ४।६ ॥

ततक्षुषि च ॥ ६

यजुषि विषये ततक्षुःशब्दे परतो नामिनः परस्य सकारस्य षकारो भवति। एकेषामाचार्य्याणां मतेन।

अर्च्चिर्भिष्टतक्षुः। अर्च्चिर्भिस्ततक्षुः। का०। चकारादन्योऽप्यस्य विषयो बुभुत्सितव्यः।

पूर्वपदस्थान्निमित्तात् ॥ ७

यजुषीति न स्मर्य्यते। पूर्वं पदं पूर्वपदम्। निमित्तं नामिककारररेफाः। पूर्वपदस्थान्निमित्तात् परस्य सकारस्य षकारो भवति। एकेषामाचार्य्याणां मतेन।

द्विषाहस्रं चिन्वीत। त्रिषाहस्रं चिन्वीत। तै० स० ५।२।८॥ मधुष्ठानं। का०। त्रीन् स्तनान् व्रतमुपैत्युपसत्सु त्रिषन्धिर्हींषुरनीकं शल्यस्तेजनं द्वौ स्तनौ व्रतमुपैत्युपसत्सु द्विषन्धिर्हींषुः शल्यश्च ह्येव तेजनं च। ऐ० ब्रा० १।४।८॥ यदिन्द्राग्नी दिविष्ठः। सि०। सहसः सूनो त्रिषधस्थ हव्यं। ऋ० ५।४।८॥ त्रिष्टुब्गायत्री च्छन्दांसि। ऋ० १०।१४।१६॥ त्रिऽ सुप् इति पदकाराः पठन्ति। का सुष्टुतिः शवसः सूनुमिंद्रं। ऋ० ४।२४।१॥ उरु ष सरथं सारथये। ऋ० ६।२०।५॥ नस्त्रिष्ठं वां सूरे दुहितारुहद्रथं। ऋ० १। ३४।५॥ प्रजां त्वष्टा विष्यतु नाभिमस्मे। ऋ० २।३।८॥ अस्माभिष्टे सुषहाः संतु शत्रवः। ऋ० १०।३८।३॥ उदु ष्य देवः सविता सवाय। ऋ० २।३८।१॥ त्रिः षमृद्धत्वाय। का०। न च भवति। द्विसन्धिः। त्रिसन्धिः। का०। इत्यादि। तथा, त्रिसप्तैः शूर सप्तभिः। ऋ० १।१३३।६॥ त्रिः सौभगत्वं त्रिरुत श्रवांसि। ऋ० १।३४।५।

निमित्तादिति किम्। स पवस्व महमानः पृतन्यून्। ९।११०।१२॥

स्तुतस्तोमयोश्च॥ ८

पूर्वपदस्थात् निमित्तात् परस्य स्तुत स्तोम इतीतयोः सकारस्य षकारो भवति। एकेषामाचार्य्याणां मतेन।

त्रिभिष्टुतस्य। का०। उदु ष्टुतः समिधा यज्ञो अग्नीत्। ऋ० ३।५।९॥ अपि ष्टुतः सविता देवो अस्तु। ऋ० ७।३८।३॥

ऋषिष्टुता जरयंतीमघोनी । ऋ० ७।७५।५ ॥ गोष्ठोमं षोड़शिनं । का० । न च भवति । त्रिभिस्तुतस्य । गोस्तोमं षोड़शिनं । का० । यद्दित्ससि स्तुतोमघं । ऋ० ४।३२।८ ॥

निमित्तादितेरव । इह स्तुतः सुतपा बोधि नो हवे । १०।१००।१ ॥ बह्वृचाः स्तोमे षकारं न कुर्व्वन्ति । शृण्वंतु स्तोमं मरुतः सुदानवः । ऋ० १।४४।१४ ॥ इत्यादि दन्त्यमेवाधीयते । पूर्व्वपदस्थान्निमित्तादितेरव सिद्धे प्रपञ्चार्थमिदम् । एवमुत्तरत्रापि । सर्व्वएव लमी योगास्तस्यैवापिशब्दस्य प्रप-

।

सोर्निपातस्य ॥ ९

पूर्व्वपदस्थान्निमित्तात् परस्य निपातस्य सोः सकारस्य षकारो भवति ।

अभी षु णः सखीनां । ऋ० ४।३१।२ ॥ ऊर्ध्व ऊ षु ण-ऊतये । ऋ० १।३६।१३ ॥ नि षु सीद गणपते गणेषु । ऋ० १०।११२।९ ॥

सोरिति किम् । यं क्रंदसी संयती विह्वयेते । ऋ० २।१२।८ ॥ संऽयती इति पदकाराः पठन्ति । निपातस्येति किम् । इंद्राय यत्र सवनानि सुन्वे । ऋ० ७।८७।१ ॥ निमित्तादितेरव । तेषां सु शृणुतं हवं । ऋ० १।४७।२ ॥ बहुलाधिकारात्, नव्यमायुः प्र सू तिर । ऋ० १।१०।११ ॥ इत्यादयोऽप्यनुसर्त्तव्याः ।

सनोतेर्बहुलम् ॥ १०

पूर्वपदस्थान्निमित्तात् परस्य सनोतेः सकारस्य बहुलं षकारो भवति ।

गोषा इंद्रो नृषा असि । ऋ० ८।२।१० ॥ गोषा उ अश्वसा असि । ऋ० ८।६१।२० ॥ गोषामश्वेषु सश्चिम । ऋ० ८।१६।२ ॥ यत्र गोषाता धृषितेषु खादिषु । ऋ० १०।३८।१ ॥ उत नो गोषणिं धियं । ऋ० ६।५३।१० ॥ शंसामि गोषणो नपात् । ऋ० ४।३२।२२ ॥ न च भवति । गोसनिं वाचमुदीरयन् । का० ।

निमित्तादित्येव । असना गोषाः शतसा न रंहिः । ऋ० १०।८५।३ ॥ भाष्ये तु, सनोतेरनकारान्तस्यैवेति नियमान्नकारान्तस्य न स्यात्, गोसनिं सिसनीरित्युक्तम् । बह्वृचास्तु, नकारान्तस्यापि षकारं समामनन्ति । तस्मात् यथान्यासमेवास्तु ।

कथं, व्यषीदत् पिता नः । न्यषीदत् पिता नः । अभ्यषीदत् । का० । ब्राह्मणो होतुरवरो निषीदन् । ऋ० १०।८८।१९ ॥ पूर्वपदस्थान्निमित्तादिति सिद्धमेव । न च भवति । व्यसीदत् । न्यसीदत् । अभ्यसीदत् । का० । अग्निर्होता न्यसीदद्यजीयान् । ऋ० ५।१।६ ॥ तथा, अभ्यष्टौत् । अभ्यस्तौत् । सि० ।

ऋतपृतनाभ्यां सहः ॥ ११

ऋतशब्दात् पृतनाशब्दाच्च परस्य सहः सकारस्य षकारो भवति ।

ऋतषाहं । का० । तमग्ने पृतनाषहं । ऋ० ५।२३।२ ॥ पृतनाषाड़मर्त्यः । ऋ० १।१७५।२ ॥ कथं, ऋतीषाहं रयिमस्मासु धत्त । ऋ० १।६४।१५ ॥ पूर्वपदस्थान्निमित्तादिति एव सिद्धम् । सर्वएवामी विधयः संहितायामेव प्रवर्त्तन्ते । दन्त्योह्यवग्रहति सर्वत्र ।

णोनस्यावग्रहाट्टतः संहितायाम् ॥ १२

अवग्रहति इत्यवग्रहस्तद्योग्यो भण्यते । अवग्रहयोग्याट्टकारात् परस्य नकारस्य णकारो भवति । संहितायाम् ।

पन्थामनु प्रविद्वान् पितृयाणं । ऋ० १०।२।७ ॥ त्वं नृभिर्नृमणो देववीतौ । ऋ० ७।१९।४ ॥ तृतीयमप्सु नृमणाअजस्रं । ऋ० १०।४५।१ ॥ अस्मभ्यं नृमणस्यसे । ऋ० ५।३८।४ ॥ पितृऽयानं । नृऽमनः इत्याद्यवग्रहन्ति । अवग्रहग्रहणं विषयोपलक्षणार्थम् अवग्रह्यमाणात् स्यादनवग्रह्यमाणान्न स्यात् । पदान्ते ह्यवग्रहो नापदान्ते । संहिताग्रहणञ्च प्रागेवावग्रहात् स्यात् अवग्रहे तु न स्यादित्येवमर्थम् । दन्त्योहि सर्वत्रावग्रहे पठ्यते

कथं, अस्मभ्यं नृम्णमाभर । ऋ० ५।३८।४ ॥ अवग्रहेऽपि नृम्णंमिति पठ्यते । नृम्णं बलार्थं प्रकृत्यन्तरमामनन्ति नैघण्टुकाः ।

नसोधातुस्थान्निमित्तात् ॥ १३

निमित्तं रषृवर्णाः । धातुस्थान्निमित्तात् परस्य नसोनकारस्य णकारो भवति ।

शिक्षा णो अस्मिन् पुरुहूत यामनि। ऋ० ७।३२।२६ ॥ शिक्षा ण इंद्र राय आ। ऋ० ८।९२।९ ॥ रक्षा णो ब्रह्मणस्पते। ऋ० १।१८।३ ॥

धातुस्थादिति किम्। सुते दधिष्व नश्चनः। ऋ० १।३।६ । निमित्तादिति किम्। ऊर्ध्वास्तिष्ठा न ऊतये। ऋ० १।३०।६ ॥ नस इति किम्। रक्षा नृन् पाह्यसुर त्वमस्मान्। ऋ० १।१७४।१ ॥

उरुष्वभ्याञ्च ॥ १४

उरु षु इत्येताभ्यां परस्य नसो नकारस्य णकारो भवति।

उरु णो वाजसातये। ऋ० ५।६४।६ ॥ उरु णो यंधि जीवसे। ऋ० ८।६८।१२ ॥ अभी षु णः सखीनां। ऋ० ४।३१।३ ॥ ऊर्ध्व ऊषु ण ऊतये। ऋ० १।३६।१३ ॥ उरुणसावसुतृपावुलुम्बलौ। तै० आ० ६।३ ॥

आभ्यामिति किम्। स शक्र उत नः शकत्। ऋ० १।१०।६ ॥ षु इति क्षतषत्वस्य निपातस्य ग्रहणं, न सुपः। तेन, यज्ञं देवेषु नः कवे। ऋ० १।१३।२ ॥ इत्यादौ न भवति। कथं तर्हि, शक्रो यथा सुतेषु णः। ऋ० १।१०।५ ॥ कर्त्तव्योऽत्र यत्नः।

पूर्वपदस्थाद्बहुलम् ॥ १५

नस इति न सम्बध्यते। पूर्वपदस्थान्निमित्तात् परस्य नकारस्य बहुलं णकारोभवति।

उत प्र णेष्यभि वत्स्या अस्मान्। ऋ० १।३१।१८ ॥ अस्थूरि णौ गार्हपत्यानि सन्तु। मा० २।२७ ॥ न च भवति। प्र नो-मुञ्चतं वरुणस्य पाशात्। ऋ० ६।७४।४ ॥ रेवतीर्नः सधमादे। ऋ० १।३०।१३ ॥ प्र ण आयूंषि तारिषत्। ऋ० १।२५।१२ ॥ इति बह्वृचाः। छन्दोगास्तु दन्त्यमधीयते। सा० छ० ४।२।२।७ ॥

निमित्तादितीव। सुगा नः सुपथा कृणु। ऋ० १।४२।७ ॥ संहितायामेवामो विधयो भवन्ति। न त्ववग्रहे। दन्त्यो ह्यवग्रहे पठ्यते सर्वत्र।

इति चान्द्रकान्त्यां कातन्त्रच्छन्दःप्रक्रियायां नाम्नि चतुष्टये तृतीयः पादः।

नाम्नि चतुष्टये चतुर्थः पादः ।

पदन्तादा स्त्रियामृचि ॥ १

ऋचीत्यभिधेयनिर्देशः । स्त्रियां वर्त्तमानात् पदन्तान्निङ्गादा-प्रत्ययो भवति । ऋचि अभिधेयायाम् ।

एकपदा द्विपदा ऋक् । सि० । ऋचीति किम् गौरी-र्मिमाय सलिलानि तक्षतैकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बुभूवुषी सहस्राक्षरा परमे व्योमन् । ऋ० १। १६४।४१ ॥ सखा सप्तपदी भव । म० ब्रा० १।२।७ ॥ भाषाया-मपीति मतम् ।

बहुव्रीहेरुपधालोपिनोऽनन्तादौ ॥ २

उपधालोपिनोऽनन्ताद्बहुव्रीहिसमासात् स्त्रियामीप्रत्ययो-भवति ।

गौः पञ्चदाम्नी । एकदाम्नी । द्विदाम्नी । एकमूर्ध्नी । समानमूर्ध्नी । का० । समानमूर्ध्नीरभि लोकमेकम् । तै० स० ४।३।११ ॥ भाषायान्तु संज्ञायां नित्यमन्यत्र विकल्पः ।

रात्रेरजसि ॥ ३

जस्विषयादन्यत्र रात्रिशब्दात् स्त्रियामीप्रत्ययो भवति। अवसं रात्री: शरदश्चतस्रः। ऋ० १०।८५।१६ ॥ रात्रीभिरस्मा-अहभिर्दशस्येत्। ऋ० १०।१०।८ ॥ रात्र्याश्चिदंधो अतिदेव पश्यसि। ऋ० १।८४।७ ॥ रात्र्यां तमो अदधुर्ज्योतिरह्न्। ऋ० १०।६८।११ ॥

रात्रेरिति किम्। वेषंतीरूर्ध्वा नद्यो न आगुः। ऋ० १।१८१।६ ॥ जस्यपि स्यात्। अजसीति किम्। यास्ता-रात्रयः। का०।

विभाषा स्यमोः ॥ ४

सौ अमि च परतो रात्रिशब्दात् स्त्रियामीप्रत्ययो भवति वा। प्राप्ते विभाषा।

आद्रात्री वासस्तनुते सिमस्मै। ऋ० १।११५।४ ॥ रात्री व्यख्यदायती। ऋ० १०।१२७।१ ॥ ततो रात्र्यजायत। ऋ० १०।१९०।१ ॥ ह्वयामि रात्रीं जगतो निवेशनीं। ऋ० १।३५।१ ॥ उत रात्रीमुभयतः परीयसे। ऋ० ५।८१।४ ॥ न च भवति। रात्रिः केतुना जुषतां। मा० २७।२१ ॥ रात्रिं सङ्घोषिल्वा। का०। रात्रेरित्येव। सूर्यादेवीमुषसं रोचमानां। ऋ० १।११५।२ ॥

भोर्नित्यम् ॥ ५

भु इति ङुप्रत्ययान्तस्य ग्रहणम् । स्त्रियां वर्त्तमानाद्भ्वन्ता-
ल्लिङ्गान्नित्यमीप्रत्ययो भवति ।

विराट् सम्राड्विभ्वीःप्रभ्वीर्बभ्वीश्च भूयसीश्च याः । ऋ० ५।८८।५ ॥ विभ्वी रातिः शतक्रतो । ऋ० ५।३८।१ ॥

भोरिति किम् । क्विबन्तस्य मा भूत् । स्वयम्भूः । का० ।

बह्वादिभ्यश्च ॥ ६

स्त्रियां वर्त्तमानेभ्यो बहुप्रभृतिभ्यो लिङ्गेभ्यो नित्यमीप्रत्ययो-
भवति ।

बह्वीषु हित्वा प्रपिबन् । बह्वी नाम ओषधी भवति । का० । बह्वीनां पिता बहुरस्य पुत्रः । मा० २९।४२ ॥ बह्वीनां गर्भो अपसामुपस्थात् । ऋ० १।९५।४ ॥ उतो गुणवचनादखरु-संयोगोपधाद्वेति विकल्पे प्राप्ते नित्यार्थं वचनम् । बह्वादि-राकृतिगणः ।

दीर्घजिह्वी ॥ ७

दीर्घजिह्वीति स्त्रियामीप्रत्ययान्तं निपात्यते ।

आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट् । सि० । दीर्घजिह्वी वै देवानां हव्यमलेट् । का० । सखायो दीर्घजिह्वं । ऋ० ९।१०१।१ ॥

आग्नीध्रसाधारणाभ्याम् ॥ ८

स्त्रियां वर्त्तमानाभ्यामाभ्यामीप्रत्ययो भवति ।

आग्निध्री । साधारणी । का० । साधारण्येव मरुतो-मिमिक्षुः । ऋ० १।१६७।४ ॥ भाषायाम् । आग्नीध्रा शाला । साधारणा भूमिः । का० ।

केवलादिभ्यश्च ॥ ९

केवलादिभ्यो लिङ्गेभ्यः स्त्रियामीप्रत्ययो भवति ।

अथो त इंद्रः केवलीर्विशो बलिहृतस्करत् । १०।१७३।६ ॥ केवलेति भाषायाम् । मामकी । का० । मामिकेति भाषा-याम् । मित्रावरुणयोर्भागधेयी । का० । भागधेयेति भाषा-याम् । पापी त्वियम् । का० । अनिषव्यास्तन्वः संतु पापीः । ऋ० १०।१०८।६ । पापा इति भाषायाम् । उतापरीभ्यो मघवा वि जिग्ये । ऋ० १।३२।१३ ॥ अहं जनिभ्यो अपरीषु पुत्रान् । १०।१८३।३ ॥ अपराभ्यः अपरास्विति भाषायाम् । शिवा रुद्रस्य भेषजी । तै० सं० ४।५।१० ॥ आप इद्वा उ भेषजीः । ऋ० १०।१३७।६ ॥ भेषजेति भाषायाम् । समानी-मंत्रः समितिः समानी । ऋ० १०।१९१।३ ॥ ता इन्वे३व समना समानीः । ऋ० ४।५१।९ ॥ समाना इति भाषायाम् । आर्य-कृती । आर्यकृतेति भाषायाम् ।

सुमङ्गलशब्दं केवलादौ पठन्ति । सुमंगलीरियं वधूः । ऋ० १०।८५।३३ ॥ भाष्ये तु, मत्वर्थीयेकारान्ततयैतदुदाहृतम् ।

सुमङ्गली प्रतरणी गृहाणां। अथ १४।८।२६॥ इत्येवमाद्यर्थं त्वास्येयं यद्वान्तरं भाष्यनये। संज्ञायां लोकेऽपि प्रयुज्यन्ते इति मतम्। कथं, सुष्वेः पक्तिं क्वणुते केवलेंद्रः। ऋ० ४।२५।६॥ केवलीशब्दादमो डा। तथा। दिवश्चरंति भेषजा। ऋ० १०। ५९।९॥ भेषजानीत्यर्थः। केवलादिराकृतिगणः।

पुंयोगे मुङ्गलादानुश्च॥ १०

मुङ्गलशब्दात् स्त्रियामीप्रत्ययोभवति। आनुश्चागमः। पुंयोगे गम्यमाने।

रथीरभून्मङ्गलानी गविष्टौ। ऋ० १०।१०२।२॥ ऋच्छंति षा निष्पदोमुङ्गलानीं। ऋ० १०।१०२।६॥ उदनुवन्ध आगमस्य लिङ्गम्।

रश्च बहुलं नस्य॥ ११

स्त्रियां वर्त्तमानान्निङ्गाद्बहुलमीप्रत्ययो भवति। अन्तस्य नकारस्य रेफश्चादिश्यते।

विशो येन गच्छथो यज्वरीर्नरा। ऋ० १०।४१। २॥ स्तनाभुजो अशिश्वीः। ऋ० १।१२०।८॥ आ धेनवो धुनयंतामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः। ऋ० ३।५५।१६॥ न च भवति। यज्वनीर्विशः। भा०। अशिश्वमिव मामयं शिश्वरभिमन्यते। का०।

असितपलिताभ्यां क्रश्च तस्य॥ १२

असितपलिताभ्यां स्त्रियामीप्रत्ययो भवति। तकारस्य क्रादेशश्च।

असिक्नीमेति रुशतीमपाजन् । ऋ० १०।३।१ ॥ त्वङ्गिया विश आयन्नसिक्नीः । ऋ० ७।५।३ ॥ असिक्त्रया मरुद्वृधे वितस्तया । ऋ० १०।७५।५ ॥ असिक्त्रयां यजमानो न होता । ऋ० ४।१७।१५ ॥ पलिक्नीरिद्युवतयो भवंति । ऋ० ५।२।४ ॥

भाषायामपि । गतो गणस्तूर्णमसिक्निकानाम् । भा० प्र० । बहुव्रीहौ दासपूर्वात् पत्युर्नश्चेत्येके । दासपत्नीरहिगोपा अतिष्ठन् । ऋ० १।३२।११ ॥ भाष्यवार्त्तिकयोस्तु नैतच्चिन्तितम् । स्त्रियां त्वाख्येयं यत्नान्तरमिति मतम् ।

ऊङ् कद्वादिभ्यः ॥ १३

कद्रुप्रभृतिभ्यः स्त्रियामूङ्- प्रत्ययो भवति ।

कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्द्धेतां । तै० स० ६।१।६ ॥ मा स्म कमण्डलूं शूद्राय दद्यात् । का० । गुग्गूलूः । मधूः । जतूः । पतयालूः । भा० । अपिबत् कद्रुवः सुतं । ऋ० ८।४५।२६ ॥ तन्वादित्वादुव् । नदादिप्रपञ्चार्थं प्रकरणम् ।

इति चान्द्रक्रान्त्यां कातन्त्रव्याकरणप्रक्रियायां नाञ्चितचतुष्टये

चतुर्थः पादः ।

वृत्तौ विभक्त्यलोपो ब्राह्मणाच्छंसिप्रभृतिषु ॥ १

वृत्तिः समासः पदप्रत्ययय्योगश्च । वृत्तिविषये ब्राह्मणाच्छंसि-प्रभृतिषु विभक्तेरलोपो भवति ।

ब्राह्मणविहितानि शस्त्राणि ब्राह्मणानि, तानि शंसतीति ब्राह्मणाच्छंसी । द्वितीयाबहुवचनस्यात् । व्यत्ययात् द्वितीयार्थे पञ्चमीयमित्येके । ब्रह्मणादादाय शंसतीत्यन्ये । ऋत्विग्विशेषे रूढिः । संज्ञात्वात् लोकेऽपि प्रयुज्यते इति मतम् ।

क्षणस्याखरेष्ठः । तै० स० १।१।११ ॥ य उदृचि यज्ञे अध्वरेष्ठाः । ऋ० १०।७७।७ ॥ अप्सु योनिरुत्पत्तिर्यस्य स अप्सु योनिर्वैतसः । अप्सु भवोऽप्सव्यः ।

दीर्घो देवताद्वन्द्वे बहुलमुत्तरपदे ॥ २

समासान्तपदमुत्तरपदमिति रूढिः । देवतानां द्वन्द्वे उत्तर-पदे परतो बहुलं दीर्घो भवति । अर्थात् पूर्वपदस्य ।

इंद्रासोमावहिमपः परिष्ठां। ऋ० ६।७२।३॥ अस्मे स इंद्रावरुणावपि ष्यात्। ऋ० ६।६८।६॥ इंद्राविष्णू सुतपा वामुरुष्यति। ऋ० १।१५५।२॥ यूयं नो मित्रावरुणादिते च स्वस्तिमिंद्रामरुतो दधात। ऋ० २।२९।३॥ आ न इंद्राबृहस्पती। ऋ० ४।४९।३॥ इंद्रापूष्णोः प्रियमप्येति पाथः। ऋ० ऋ० १।१६२।२॥ यो अग्नीषोमा हविषा सपर्यात्। १।९३।८॥ अग्नीपर्जन्यावववतं धियं मे। ऋ० ६।५२।१६॥ इति च। न च भवति। अग्निवायू। वायुग्नी। का०। इन्द्रवायू बृहस्पतिं। मा० ३३।४५॥

देवताद्वन्द्वे इति किम्। विश्वामित्रजमदग्नी दमे। ऋ० १०।१६७।४॥ उत्तरपदे इति किम्। उत्तरपदस्य मा भूत्। ऋस्वस्य दीर्घतित्यस्य प्रपञ्चार्थं वचनम्।

आदग्नेर्विष्णौ ॥ २

देवताद्वन्द्वे विष्णुशब्दे उत्तरपदे परतोऽग्निशब्दस्याकारो भवति। अर्थादन्तस्य।

अग्नाविष्णू मा वामवक्रमिषं। तै० सं० १।१।१२॥

विष्णाविति किम्। अग्नीषोमाविमानि नः। ऋ० १। ८३।११॥

न वृद्धाव ॥ ४

विष्णुवर्जिते बृहद्वृद्धावुत्तरपदे परतोऽग्निशब्दस्य दीर्घ आत्व न भवति

आग्निवारुणीमनड्वाहीमालभेत। आग्निमारुतं कर्म क्रियते। का०। हुद्राविति किम्। अग्नीषोमौ। अविष्णाविति किम्। आग्नावैष्णवं चरुं निर्वपेत्। तै० ब्रा० १।५।८॥

दिवोद्यावां ॥ ५

उत्तरपदमनुवर्त्तते। देवताद्वन्द्वे उत्तरपदे परतो दिवितस्य स्थाने द्यावेत्ययमादेशो भवति।

द्यावाक्षामा पृथिवी दर्शतं वपुः। ऋ० १।१२०।२॥ द्यावाभूमी शृणुतं रोदसी मे। ऋ० १०।१२।४॥ कथं, द्यावा च क्षामा प्रथमे ऋतेन। ऋ० १०।१२।१॥ द्यावेति प्रकृत्यन्तरमाचक्षते नैरुक्ताः। तस्य भविष्यति। छान्दसो वा व्यत्ययः।

दिवस् च पृथिव्याम् ॥ ६

देवताद्वन्द्वे पृथिवीतिप्रतिषिद्धे उत्तरपदे परतो दिवो दिवसित्ययमादेशो भवति। चकारात् द्यावा च।

दिवस्पृथिव्योरवसा मदेम। ऋ० ५।४८।५॥ देवैर्द्यावापृथिवी प्रावतं नः। ऋ० १।३१।८॥ द्यावा चिदस्मै पृथिवी नमेते। ऋ० २।१२।१३॥ इत्यादिकं पूर्ववत् समाधेयम्।

उषासोषसः सर्वत्र ॥ ७

देवताद्वन्द्वे पूर्वपदे उत्तरपदे च उषस्शब्दस्य स्थाने उषासा इत्ययमादेशो भवति।

पूर्व्वपदे तावत् । उषासानक्ता पुरुधा विदाने । ऋ० १।१२२।२ ॥ उत्तरपदे खल्वपि । नक्तोषासा सुपेशसा । ऋ० १।१३।७ ॥ नक्तोषासा समनसा विरूपे । ऋ० १।११३।३ ॥ अवग्रहे त्वन्यत्रापीति क्वचित् । उषसानक्ता इतीयमादिश्चवग्रहे पठ्यते ॥

पितरामातरा च द्वन्द्वे ॥ ८

मातापित्रोर्द्वन्द्वे पितरामातरेतीयमिपात्यते । चकारान्मातरापितरा च ।

आ मा गन्तां पितरामातरा च । तै० स० १।७।८ ॥ न मातरापितरा नू चिदिष्टौ । ऋ० ४।६।७ ॥ कथं, उदीरय पितरा जार आ भगं । ऋ० २०।२१।६ ॥ सदा पुत्रो न मातरा ततंथ । ऋ० १०।१।७ ॥ विभक्तेराचि गुणे सिद्धम् । तत्रापि तर्हि प्रतिपदकं विभक्तेराचि गुणे सिध्यति । सत्यमवग्रहे दोषः स्यादिति वचनम् । अवग्रहे ह्येकमेवेदं पदं पठ्यते ।

पूर्व्ववल्लिंगं हेमन्तशिशिरयोः ॥ ९

हेमन्तशिशिरयोर्द्वन्द्वे पूर्व्ववल्लिङ्गं भवति ।

हेमन्तशिशिरार्तूनां प्रीणामि । तै० स० १।६।२ ॥ हेमन्तशिशिरार्तू । मा० १०।१४ ॥ भाषायान्तु, दुःखे हेमन्तशिशिरे । का० । इति पूर्ववल्लिङ्गतैव ।

अहोरात्रयोश्च ॥ १०

अहोरात्रयोर्द्वन्द्वे पूर्व्ववल्लिङ्गं भवति ।

अहोरात्रे इदं ब्रूमः । अहोरात्राणीष्टकाः । का० । अहो-

रात्रे पार्श्वे । मा० २१।२२ ॥ इति माध्यन्दिनीयाः । अहो-रात्राणि विदधत् । ऋ० १०।१९०।२ ॥ इति बह्वृचाः । भाषा-यान्तु, अहोरात्राविमौ पुण्यौ । का० । इति परवस्त्रिकृतैव । व्यत्ययप्रपञ्चार्थं योगद्वयम् ।

दीर्घोऽष्टन उत्तरपदे ॥ ११

उत्तरपदे परतोऽष्टन् इतोऽतस्य दीर्घो भवति ।

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति । तै० स० १।८।१ ॥ अष्टाहिरण्या दक्षिणा । का० । अष्टापदी नवपदी बुभूषुणी । ऋ० १।१६४।४१ ॥ वाचमष्टापदीमहं । ऋ० ८।७६।१२ ॥ अष्टापदीभिराहुतः । ऋ० २।७।५ ॥ अष्टावंधुरं वहतामितो-रथं । ऋ० १०।५३।७ ॥

अष्टन इति किम् । सावित्रं द्वादशकपालं । मारुतं सप्त-कपालं । द्यावापृथिव्यमेककपालं । तै० स० १।८।२ ॥ उत्तरपदे इति किम् । अष्टावुपभृति तस्मादष्टाग्रफा । तै० ब्रा० ३।३।५ ॥ अवग्रहेऽपि विधिरयम् । अष्टा इति ह्यवगृह्यते । कथं, सहस्रं मे ददतो अष्टकर्ण्यः । ऋ० १०।६२।७ ॥ तत्र क्वचिदधिकारात् चित्रस्यैव कर्णे दीर्घः । बहुलाधिकाराद्वा ।

सुर्ङ्स्वाञ्चन्द्रे मन्थे ॥ १२

चन्द्रशब्दे उत्तरपदे परतो ङ्स्वात् परः सुरागमो भवति । मन्थविषये प्रयोगे ।

धूमकेतुः पुरुश्चन्द्रः। ऋ० १।२७।११॥ सुचंद्रं वर्णं दधिरे सुपेशसं। ऋ० २।३४।१२॥ सुचन्द्र दस्म विश्पते। उमे सुचन्द्र सर्पिषः। तै० स० ४।४।४॥ उत्तरप्रतीकं वाजसनेयिनो-ऽप्यामनन्ति। मा० १५।४३॥ हरिश्चन्द्रो मरुद्गणः। सि०।

क्रस्वादिति किम्। सूर्य्याचन्द्रमसौ धाता। ऋ० १०।१९०।३॥ सूर्य्याचन्द्रमसाविव। ऋ० ५।५१।१५। चन्द्र इति किम्। ह्रचह्रा पुरुचेतनः। ऋ० ६।१६।१९॥ उत्तरपदे ह्रत्येव। शुक्रासि चन्द्रासि। तै० स० १।२।५॥ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेण। तै० स० १।२।७॥ शुक्रमसि चन्द्रमस्यमृतमसि। मा० ४।१८॥ मन्त्रे ह्रति किम्। ब्राह्मणे मा भूत्। सुचन्द्रा पौर्णमासी। का०। संहितायां विधिरयम्। पुरुः चंद्रः ह्रतेरवमादि ह्यवग्रहश्रुति।

विभाषा काकवौ पथि कोः॥ १३

पन्थिशब्दे उत्तरपदे परतः कुशब्दस्य स्थाने का कव ह्रतेरता-वादेशौ भवतो वा। कापथः। कवपथः। कुपथः। का०। अनीषदर्थार्थोऽयमारम्भः।

समानस्य सोऽमूर्द्धप्रभृत्युदर्केषु॥ १४

मूर्धन् प्रभृति उदर्कं ह्रतेरतिभ्यो भिन्ने उत्तरपदे परतः समान-शब्दस्य स ह्रत्ययमादेशो भवति वा।

अनुभ्राता सगर्भ्योऽनुसखा सयूथ्यः। मा० ४।२०॥ समानो गर्भः सगर्भः तत्र भवः सगर्भ्यो भवे यत्। यो न

सनुत्य उत वा जिघक्षुः। ऋ० २।३०।९ ॥ उद्बुध्यध्वं समनसः सखायः समग्निमिंध्वं बहवः सनीळाः। ऋ० १०।१०१।१ ॥ न च भवति। समानदक्षा अवसे हवंते। ऋ० ७।२६।२ ॥ समानबंधू अमृते अनूची। ऋ० १।११३।२ ॥ समानयोजनो-हि वां। ऋ० १।३०।१८ ॥ मंदू समानवर्चसा। ऋ० १।६।७ ॥

अमूर्धप्रभृत्युदर्कैंष्विति किम्। समानमूर्धा। समानप्रभृतयः। समानोदर्कः। का०। समानमूर्ध्नीरभि लोकमेकं। तै० सं० ४।३।११ ॥ व्यवस्थितविभाषेयम्। मूर्धादिवर्जनं प्रपञ्चार्थम्।

अद्रिर्दैवादीनामन्त्यस्वरादेरञ्चतौ ॥ १५

अञ्चतावुत्तरपदे परतः देव सर्वनाम विश्वक् इत्येतेषा-मन्त्यस्वरादेरवयवस्य स्थाने अद्रिरित्ययमादेशो भवति वा।

देवद्रीचीं नयत देवयंतः। ऋ० ३।६।१ ॥ सा कद्रीची कं स्विदर्धं परागात्। ऋ० १।१६४।१७ ॥ न च भवति। देवी-देवाच्या कृपा। १।१२७।१ ॥ आ विश्वाची विदथमानषक्तु। ऋ० ७।४३।३ ॥ स विश्वाचीरभि चष्टे घृताचीः। ऋ० १०।१२८।२ ॥ अपोदीचो अप शुराधराचः। ऋ० १०।१३१।१ ॥ इति च। व्यवस्थितविभाषया स्त्रियामेवायं विधिः।

एषामिति किम्। उरुची विश्वे यजते निपातं। ऋ० ४।५६।४ ॥ अञ्चताविति किम्। अचिक्रदत् कलशे देवयूनां ऋ० ९।९६।२४ ॥ कथं, कुमारिदारा। प्रदर्विदा। का०। अजस्रीरेण शुह्वोति। तै०। ऊर्णम्रदा युवतिर्दक्षिणा-

वते। ऋ० १०।१८।१० ॥ जर्णस्नदा पृथिवीं विश्वधायसं। का०। याकारौ स्त्रीलक्षतौ ह्रस्वौ क्वचिदिति ह्रस्वः। न च भवति। जगतीच्छन्दः। फाल्गुनीपौर्णमासी। का०। जर्णासूत्रेण कवयो वयन्ति। का०। कथं, अज एकपात् पृथिवी समुद्रः। ऋ० ६।५०।१४ ॥ एकक्षितिपाद्भवति। एकक्षितिपादभवत्। एकक्षितिपादमालभेत। तै० स० २।१।२ ॥ समान्तविधिरनित्य इति।

समापं देवयजने ॥ १६

समापमिति निपात्यते। देवयजनेऽर्थे। समापं नाम देवयजनं। का०। समीपमन्यत्।

बहुलं सुभोरुतं वन्तुविन्वतिषु ॥ १७

वन्तु विन् वतिषु परतो सुभोरुक्तं कार्यं बहुलं भवति।

एष वः स्तोमो मरुतो नमस्वान्। ऋ० १।१७१।२ ॥ नमस्वंत इदुपवाकमीयुः। ऋ० १।१६४।८ ॥ तं घेमित्था नमस्विनः। ऋ० १।३६।७ ॥ नक्षंति रुद्रा अवसा नमस्विनं। ऋ० १।१६६।२ ॥ मनुष्वदग्ने अंगिरस्वदंगिरः। ऋ० १।३१।१७ ॥ ममत्तु वातो अपां हविष्मान्। ऋ० १।१२२।३ ॥ हविष्मंतं बिभ्रती धूर्षु रथं। ऋ० १।१००।१६ ॥ मनस्विनी-मानविघातदक्षमिति च मतम्। भवति च। नभोवत्। सर्पिर्वत्।

न हृषणो वस्वश्वयोः ॥ १८

वसुशब्दे अश्वशब्दे च परतो हृषन् इत्येतस्य सुभीरुक्तं कार्यं न भवति ।

तक्वन् हरी इंद्रवाहा हृषण्वसू । ऋ० १।१११।१ ॥ आदर्षदुहृषण्वसू । ऋ० २।४१।८ ॥ हृषणश्वेन मरुतो हृषप्सुना । ऋ० ८।२०।१० । मेनाभवो हृषणश्वस्य सुक्रतो । ऋ० २।५१।१३ ॥

हृषण इति किम् । रथं कमाहुर्द्रवदश्वमाशुं । ऋ० ४।४३।२ ॥ वस्वश्वयोरिति किम् । हृषच्युता मदासो गातुमाशत । ऋ० ८।६८।७ ॥

अयस्मयादीनि यथाऽऽम्नातम् ॥ १९

अयस्मयादीनि यथा आम्नातानि तथैव निपात्यन्ते ।

अयस्मयानि पात्राणि । का० । अयस्मयस्तम्बादाम विप्राः । ऋ० ५।३०।१५ ॥ अयस्मये कुम्भे । म० ब्रा० २।४।६ ॥ अयस्मयी पृथिवी । गो० ब्रा० उ० २।७ ॥ ते वा अयस्मयीमेवेमामकुर्वत । ऐ० ब्रा० १।४।६ ॥ स सुष्टुभा स ऋक्वता गणेन । ऋ० ४।५०।५ ॥ ऋक्वाणो अग्निमिंधते । ऋ० ३।१३।५ ॥ चवर्गलक्षणं स्यात् वर्गप्रथमलक्षणं न स्यात् । नैनं हिन्वंत्यपि वाजिनेषु । ऋ० १०।७१।५ ॥ वर्गप्रथमलक्षणं स्यात् चवर्गलक्षणं न स्यात् । अयस्मयादिराकृतिगणः ।

न ऋतः को बहुव्रीहौ ॥ २०

बहुव्रीहौ समासे ऋदन्तात् को न भवति ।

हता माताऽस्य हतमाता । हतपिता । हतस्वसा । का० । हतोहतमाता क्रिमिर्हतभ्राता हतस्वसा । अथ ५।२३।११ ॥ ग्रावाणो न सूरयः सिंधुमातरः । शिशूला न क्रोळ्यः सुमातरः । ऋ० १०।७८।६ ॥

बहुप्रजाः ॥ २१

बहुव्रीहौ बहुप्रजा इतीयत्रिनिपात्यते ।

बहुप्रजा निर्ऋतिमा विवेश । ऋ० १।१६४।३२ ॥ भाषायान्तु बहुप्रजो ब्राह्मणः ।

इति चान्द्रकान्तायां कातन्त्रच्छन्दःप्रक्रियायां नाम्निचतुष्टये

पञ्चमः पादः ।

कुलालादिभ्योऽण् ॥ १

कुलालादिभ्योऽण् प्रत्ययो भवति । स्वार्थे ।

कुलाल एव कौलालः । एवं, बारुडः । नैषादः । चाण्डालः । मैत्रः । आमित्रः । कार्म्मारः । तपसे कौलालं । मा० ३०।७॥ ऋक्षीकाभ्यो नैषादं । मा० ३०।८ ॥ वायवे चाण्डालं । मा० ३०।२१ ॥ नासामामित्रो व्यथिरा दधर्षति । ऋ० ६।२८।३ । कार्मारो अश्मभिर्द्युभिः । ऋ० ९।११२।२ ॥ बीभत्साये पौल्कसं । मा० ३०।१७ ॥ कुलालादिराकृतिगणः ।

वैशन्तहिमवङ्गाां भवे ॥ २

सप्तमी समर्थविभक्तिः । सप्तम्यन्ताभ्यां वैशन्तहिमवच्छब्दाभ्यां भवेऽर्थे अण्प्रत्ययो भवति । यतोऽपवादः ।

वैशन्ताभ्यो वैन्दं । मा० ३०।१६ ॥ गणक्कृतमनित्यमिति न नदादित्वादी । वैशन्तीभ्यः स्वाहा । हैमवतीभ्यः स्वाहा । का० ।

सप्तनस्तदस्य परिमाणमिति वर्गे ॥ ३

प्रथमान्तात् सप्तन्शब्दादण् प्रत्ययो भवति । तदस्य परिमाणमित्येतस्मिन्नर्थे । यत्तदस्येति, वर्गश्चेत् स भवति ।

सप्त साप्तान्यहजत् । का० । त्रिरा साप्तानि सुन्वते । ऋ० १।२०।७ ॥ त्रिभिः साप्तेभिरवतं शुभस्पती । ऋ० ८।५८।५ ॥

आदित् सामस्य चक्रिरन् । ऋ० ८।५५।५ ॥ कथं, आयवसे वर्ड्ढते । भा० । त्रयो राज्ञ आयवस्य जिष्णोः । ऋ० १।१२२।१५ ॥ वन्दस्व मारुतं गणं । ऋ० १।३८।१५ ॥ स्यादेव ॥

छन्दसः सोऽस्यादिरिति प्रगाथे ॥ ४

छन्दांसि अनुष्टुभादीनि । स इति प्रथमासमर्थात् छन्दोवाचिशब्दात् आदिरस्येतीतस्मिन्नर्थेऽण् प्रत्ययो भवति । यत्तदस्येति निर्दिष्टं, प्रगाथश्चेत्तद्भवति ।

अनुष्टुबादिरस्य आनुष्टुभः प्रगाथः । एवं, जागतः । पांक्तः । एवमन्येऽपि । छन्दस इति किम् । उदुत्यशब्द आदिरस्य प्रगाथस्येत्यत्र मा भूत् । प्रगाथे इति किम् । पंक्तिरादिरस्यानुवाकस्येत्यत्र मा भूत् । भाषायामपीति मतम् ।

स्वार्थे च ॥ ५

छन्दोवाचिशब्दात् स्वार्थे चाण् प्रत्ययो भवति ।

त्रिष्टुबेव त्रैष्टुभम् । एवं, जागतम् । पांक्तमित्यादि । नपुंसका एवामी भवन्ति ।

तृष्टे सामन्यान्तात्स्वरादिलोपश्च बहुलम् ॥ ६

तृतीया समर्थविभक्तिः । तृतीयान्तान्निङ्गात् तृष्टमितीतस्मिन्नर्थे अण् प्रत्ययो भवति । यत्तत्तृष्टं, साम चेत्तद्भवति । तस्मिंश्चाणि परतो बहुलमन्त्यस्वरादिरवयवो लुप्यते ।

क्रुञ्चेन दृष्टं साम क्रौञ्चम्। एवं, वासिष्ठम्। वैश्वामित्रम्। औशनसम्। अन्त्यस्वरादिलोपः खल्वपि। औशनम्।

अग्निकलिभ्यामेयण् ॥ ७

तृतीयान्ताभ्यामग्निकलिशब्दाभ्यां दृष्टं सामेत्येतस्मिन्नर्थे एयण् प्रत्ययो भवति।

अग्निना दृष्टं साम आग्नेयम्। एवं, कालेयम्।

गोत्रादकण् ॥ ८

तृतीयान्तादगोत्रवाचिशब्दात् दृष्टं सामेत्येतस्मिन्नर्थे अकण् प्रत्ययो भवति।

औपगवेन दृष्टं साम औपगवकम्।

वामदेवाद्यण् ॥ ९

तृतीयान्ताद्वामदेवशब्दात् दृष्टं सामेत्येतस्मिन्नर्थे यण् प्रत्ययोभवति। वामदेवेन दृष्टं साम वामदेव्यम्।

तित्तिर्य्यादिभ्यः प्रोक्तस्याध्ययनवेदनयोरीयण् छन्दसि ॥ १०

तृतीया समर्थविभक्तिः। तृतीयान्तेभ्यः तित्तिरिप्रभृतिभ्यो लिङ्गेभ्यः प्रोक्तमधीयते विदन्ति वेत्येतस्मिन्नर्थे ईयण् प्रत्ययो भवति। यत्तत् प्रोक्तमिति छन्दश्चेत्तद्भवति।

तित्तिरिणा प्रोक्तमधीयते विदन्ति वा तैत्तिरीयाः। एवं, वारतन्तवीयाः। खाण्डिकोयाः। औखीयाः। कौहलीयाः इति च। छन्दसीति किम्। तित्तिरिणा प्रोक्तं श्लोकमधीयते इत्यत्र मा भूत्।

कलाप्यादिभ्योऽण् ब्राह्मणे च ॥ ११

तृतीया समर्थविभक्तिः। तृतीयान्तेभ्यः कलापिप्रभृतिभ्यो-लिङ्गेभ्यः प्रोक्तमधीयते विदन्ति वेतिप्रतस्मिन्नर्थे अण्प्रत्ययो-भवति। यत् तत् प्रोक्तं, ब्राह्मणं छन्दो वा चेत्तद्भवति।

कलापिना प्रोक्तमधीयते विदन्ति वा कालापाः। एवं, कौथुमाः। ब्राह्मणग्रहणं ब्राह्मणविशेषप्रतिपत्त्यर्थम्। तेन याज्ञ-वल्क्यादिभ्यो न स्यात्। कलाप्यादिराकृतिगणः।

कठादेर्लुक् ॥ १२

कठादेः परस्य प्रोक्तस्याध्ययनवेदनयोरुत्पन्नस्याणो लुग्भवति।

कठेन प्रोक्तमधीयते विदन्ति वा कठाः। एवं, चरकाः। चरक इति वैशम्पायनस्य नामधेयम्। सर्वे चैतदन्तेवासिन-एवंमुच्यन्ते।

छगलिनो णेयिन् ॥ १३

तृतीयान्ताच्छगलिशब्दात् प्रोक्तमधीयते विदन्ति वेत्येत-स्मिन्नर्थे णेयिन् प्रत्ययो भवति। छगलिना प्रोक्तमधीयते विदन्ति वा छागलेयिनः।

कलापिवैशम्पायनान्तेवासिभ्यो णिन् ॥ १४

कलाप्यन्तेवासिनां वैशम्पायनान्तेवासिनाञ्च वाचका ये शब्दास्तेभ्यस्तृतीयान्तेभ्यः प्रोक्तमधीयते विदन्ति वेत्येतस्मिन्नर्थे णिन्प्रत्ययो भवति । कलाप्यन्तेवासिनश्चत्वारः । हरिद्रुः छगली तुम्बुरुरुलपश्चेति । वैशम्पायनान्तेवासिनो नव । आलम्बिः पलङ्गः कमलः ऋचभः आरुणिः ताण्ड्यः श्यामायनः कठः कलापी चेति । तथा चोक्तम् ।

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू ।
उलपेन चतुर्थेन कालापकमिहोच्यते ।
आलम्बिश्चरकः प्राचां पलङ्गकमलावुभौ ।
ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे ।
श्यामायन उदीच्येषु उक्तः कठकलापिनोः ।

चरक इति वैशम्पायनान्तेवासीत्यर्थः । तत्र साक्षादन्तेवासिनामिह ग्रहणं, नान्तेवास्यन्तेवासिनाम् । कलापि ग्रहणात् । स हि वैशम्पायनान्तेवासी । यद्यन्तेवास्यन्तेवासिनां ग्रहणं स्यात् कलाप्यन्तेवासिनोऽपि वैशम्पायनान्तेवासिन एवेति नार्थः कलापिग्रहणेन ।

कलाप्यन्तेवासिभ्यस्तावत् । हरिद्रुणा प्रोक्तमधीयते विदन्ति वा इति हारिद्रविणः । एवं, तौम्बुरविणः । औलपिनः । वैशम्पायनान्तेवासिभ्यः खल्वपि । आलम्बिनः । पालङ्गिनः । कामलिनः । आर्चाभिनः । ताण्डिनः । श्यामायनिनः । एतएवापवादविषयाता णिनं प्रयोजयन्ति ।

चिरन्तनेन ब्राह्मणे ॥ १५

चिरन्तनेनेति प्रकृत्यर्थो विशिष्यते । ब्राह्मणे इति च प्रोक्तार्थः । तृतीयान्ताच्चिरन्तनर्षिवाचिनः शब्दात् प्रोक्तमधीयते विदन्ति वेत्येतस्मिन्नर्थे णिन् प्रत्ययो भवति । यत्तत् प्रोक्तमिति, ब्राह्मणञ्चेत्तद्भवति ।

शाट्यायनेन प्रोक्तं ब्राह्मणमधीयते विदन्ति वा शाट्यायनिनः । एवं, भाल्लविनः । ऐतरेयिणः ।

चिरन्तनेनेति किम् । याज्ञवल्क्येन प्रोक्तं ब्राह्मणमधीयते विदन्ति वेत्यत्र मा भूत् । याज्ञवल्क्यादयो ह्यचिरन्तना प्रत्याख्यानेषु वार्त्ता ।

शौनकादिभ्यश्छन्दसि ॥ १६

तृतीयान्तेभ्यः शौनकादिभ्योलिङ्गेभ्यः प्रोक्तमधीयते विदन्ति वेत्येतस्मिन्नर्थे णिन् प्रत्ययो भवति । यत्तत् प्रोक्तमिति, छन्दश्चेत्तद्भवति ।

शौनकेन प्रोक्तमधीयते विदन्ति वा शौनकिनः । एवं, भाल्लविनेयिनः । एवमन्येऽपि । शौनकादिराकृतिगणः ।

अनुब्राह्मणादिनिः ॥ १७

द्वितीया समर्थविभक्तिः । द्वितीयान्तादनुब्राह्मणशब्दादधीते वेत्येतस्मिन्नर्थे इनि प्रत्ययो भवति । अनुब्राह्मणमधीते वेत्ति वा, अनुब्राह्मणी । अनुब्राह्मणिनौ, अनुब्राह्मणिनः ।

कठादेरकण् प्रोक्ते धर्म्माम्नाययोः ॥ १८

तृतीया समर्थविभक्तिः । तृतीयान्तात् कठादिशब्दात् प्रोक्तमितीतस्मिन्नर्थे अकण् प्रत्ययो भवति । यत्तत्प्रोक्तमिति, धर्म्म आम्नायो वा चेत्तद्भवति ।

कठेन प्रोक्तं प्रवचनं काठकम् । एवं, कालापकम् । पैप्पलादकम् । कठादिराकृतिगणः ।

आथर्व्वणिकादस्मिन्नर्थे लोपश्चैकस्य ॥ १९

षष्ठी समर्थविभक्तिः । षष्ठ्यन्तादाथर्व्वणिकशब्दात् इदमितीतस्मिन्नर्थे अण् प्रत्ययो भवति । तत्सन्नियोगेनैकस्य लोपश्च भवति । यत्तदिदमिति, धर्म्म आम्नायो वा चेत्तद्भवति ।

आथर्व्वणिकस्यायम्, आथर्व्वणो धर्म्म आम्नायो वा । कथं, कौथुमम् । तस्येदमित्यण् । एवमन्येऽपि ।

छन्दोगादिभ्यो यण् ॥ २०

षष्ठ्यन्तेभ्यश्छन्दोगादिशब्देभ्य इदमितीतस्मिन्नर्थे यण्प्रत्ययो भवति । धर्म्मान्नाययोः ।

छन्दोगानामिदं छान्दोग्यम् । धर्म्म आम्नायो वा । एवं मौक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । भूयानस्मीषां सम्प्रचारः । छन्दःप्रसङ्गादिह व्युत्पादिताः ।

शन्शक्कतिभ्यो डिन् परिमाणे ॥ २१

प्रथमा समर्थविभक्तिः। तदन्तविधिरत्वेष्टः। प्रथमान्तेभ्यः शन् शत् शतान्तेभ्यः शब्देभ्यो डिन् प्रत्ययो भवति। परिमाणेऽर्थे।

शन्। पञ्चदशिनोऽर्धमासाः। शत्। त्रिंशिनोमासाः। शति। विंशिनोऽङ्गिरसः। सि०।

वर्षावसन्तहेमन्तेभ्य इकण् शेषे ॥ २२

तत्र भवस्तत्र जातस्ततो वा आगत इतीयमादिः शेषः। यथायोगं समर्थविभक्तिः। वर्षादिभ्य इकण् प्रत्ययो भवति। शेषेऽर्थे।

नभश्च नभस्यश्च वार्षिकाद्वतू। मधुश्च माधवश्च वासन्तिकाद्वतू। सहश्च सहस्यश्च हैमन्तिकाद्वतू। तै० स० ४।४।११॥ एभ्य इति किम्। शुक्रश्च शुचिश्च प्रैषाद्वतू। तपश्च तपस्यश्च ग्रैशिराद्वतू। तै० स० ४।४।११॥ भाषायामपीति मतम्।

आविषस्तायः ॥ २३

आविस् शब्दात् शेषेऽर्थे तायप्रत्ययो भवति।

आविष्टायो वर्धते चारुरासु। ऋ० १।८५।५॥ नाविष्टंत्र वसवो-देवहेळनं। ऋ० १।१००।७॥

अर्हतौ यत् ॥ २४

द्वितीया समर्थविभक्तिः । द्वितीयान्ताल्लिङ्गात् अर्हतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति ।

उदका हत्तयः । यूप्यः पलाशः । गर्त्यो देशः । का० । उदकमर्हन्ति यूपमर्हतीत्यादिर्विग्रहः । सादन्यं । सि० । सदनमर्हतीति यत् । अन्येषामपि दृश्यते इति दीर्घः । विदथ्यं । सि० । विदथो यज्ञः । परिज्मानं विदथ्यं सुदानिभिः । ऋ १०।४१।१ ॥ अवोचाम कवये मेध्याय । ऋ० ५।१।१२ ॥

भवे ॥ २५

सप्तमी समर्थविभक्तिः । सप्तम्यन्ताल्लिङ्गाद्भवेऽर्थे यत् प्रत्ययो भवति ।

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च । नमो मेघ्याय च नमो विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च । मा० १६।३८ ॥ कूपे भवोऽवटे भव इत्यादि विग्रहः । तथा । समानो गर्भः सगर्भः तत्र भवः सगर्भ्यः । समानो यूथः सयूथस्तत्र भवः सयूथ्यः । नुतं नुतिर्भावे निष्ठा । समानं नुतं सनुतं तत्र भवः सनुत्यः । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्य उत वा जिघत्नुः । ऋ०२।३०।९ ॥

कथं, पाथोऽन्तरिक्षं तत्र भवः पाथ्यः । स्रोतसि भवः स्रोत्यः । स्रोरन्त्ययोरिति सलोपे पश्चादवर्णलोपः । सलोपाभावे स्रोतस्यः । तमु त्वा पाथ्यो वृषा । ऋ० ६।१६।१५ ॥ अधो-

अच्छा: सिंधव: स्रोतयाभि: । ऋ०३।३३।९ ॥ नवतिं स्रोतया नव च स्रवंती: । ऋ०१०।१०४।८ ॥

नद्यायण् ॥ २६

सप्तम्यन्तान्नदीशब्दाज्ञवेऽर्थे यण् प्रत्ययो भवति ।

नद्यां भवो नाद्य: । च नो दधीत नाद्यो गिरो मे । ऋ०२।३५।१ ॥

दूताङ्गागकर्मणो: ॥ २७

विशेषातिदिष्टन्यायेन यतोऽनुवृत्ति: । षष्ठी समर्थविभक्ति: । भागोऽंश: कर्म्म क्रिया । षष्ठ्यन्तादूतशब्दाङ्गागे कर्म्मणि चार्थे यत्प्रत्ययो भवति ।

दूतस्य भागो दूत्य: । दूतस्य कर्म्म दूत्यम् । सत्रा दूत्यं१ भृगवाणो विवाय । ऋ०१।७१।४ ॥

अप: संस्कृते ॥ २८

तृतीया समर्थविभक्ति: । तृतीयान्तादप्शब्दात् संस्कृतेऽर्थे यत् प्रत्ययो भवति ।

अग्नेगो राजाप्यस्तविष्यते । ऋ० ९।८६।४५ ॥ अप्य: दूत्यवग्रहे पठ्यते । यस्येदमप्यं हवि: । ऋ० १०।८६।१२ ॥

सोमादर्हतौ मयडर्थे च ॥ २९

अर्हतौ द्वितीया समर्थविभक्ति: । प्रस्तुतादयोऽनेके मयडर्था: । तत्र यथायोगं समर्थविभक्तय: । समर्थविभक्त्यन्तात् सोमशब्दात् अर्हत्यर्थे मयड्र्थे च यत् प्रत्ययो भवति ।

सोममर्हन्तीति सोम्या ब्राह्मणाः। सोम्यं मधु पिबन्ति। का०। सोममयमित्यर्थः। अक्षानह्यो नह्यतनोत सोम्याः। ऋ० १०। ५३।७॥ सोमार्हाइत्यर्थः। अध्वर्युभिः प्रस्थितं सोम्यं मधु। ऋ० २।३७।२॥ मयडर्थे इतीयतावतुप्रक्ते अर्हतौ न स्यादितीयञ्छ-निरासार्थमर्हतिग्रहणम्। पृथङ्निर्देश उत्तरार्थः।

मधोः ॥ ३०

मधुशब्दान्मयडर्थे यत् प्रत्ययो भवति।

मधव्यान् स्तोकान्। का०। मधुमयानित्यर्थः। मधव्यः। मधुमय इत्यर्थः। यन्मधुनो मधव्यं परमं रूपमन्नाद्यं। तेनाहं मधुनो मधव्येन। य० द० प०।

वसोः समूहे च ॥ ३१

यथायोगं समर्थविभक्तिः। वसुशब्दात् समूहेऽर्थे मयडर्थे च यत् प्रत्ययो भवति।

ते नो धांतु वसव्य१मसामि। ऋ० १०।७४।३॥ वसुसमूह-मित्यर्थः। उभयं ते क्षीयते वसव्यं। ऋ० २।८।५॥ आ नः साहें भजतना वसव्ये३। ऋ० ७।५६।२१॥ न सूनृता नि यमते वसव्या। ऋ० ७।३७।३॥

बर्हिषोदत्ते ॥ ३२

सप्तमी समर्थविभक्तिः। सप्तम्यन्ताद्बर्हिःशब्दाद्दत्तमित्ये-तस्मिन्नर्थे यत् प्रत्ययो भवति। बर्हिष्येषु निधिषु प्रियेषु। मा० १८।५७॥

रक्षोयातुभ्योहननयाम् ॥ ३३

हन्यतेऽनयेति हननी । षष्ठी समर्थविभक्तिः । षष्ठ्यन्तात् रक्षःशब्दात् यातुशब्दाच्च हननीत्यतस्मिन्नर्थे यत् प्रत्ययो भवति । स्तुत्ये बहुवचननिर्देशाद्बहुवचनान्तात् यत् । बहुवचनेन स्तुतिवैशिष्ट्यं ज्ञाप्यते ।

रक्षसां हननी रक्षस्या । यातूनां हननी यातव्या । बह्वनां रक्षसां यातूनाञ्च हननेन तनूः स्तूयते । या ते अग्ने रक्षस्या तनूः । या ते अग्ने यातव्या तनूः । का० ।

रेवतीजगतीहविष्याभ्यः प्रशंसने ॥ ३४

प्रशंसनं प्रशंसा । षष्ठी समर्थविभक्तिः । षष्ठ्यन्तेभ्यो-रेवती जगती हविष्याशब्देभ्यः प्रशंसनेऽर्थे यत्प्रत्ययो भवति ।

यद्वो रेवती रेवतंत्र । यद्वो जगती जगतंत्र । यद्वो हविष्या हविष्यं । का० । रयिर्विद्यते अस्या इति रेवती । तस्याः प्रशंसनं रेवत्यम् । जगत्याः प्रशंसनं जगत्यम् । हविषे हिता हविष्या । गवादित्वाद्यत् । तस्याः प्रशंसनं हविष्यम् । यत्र-कारलोपे तद्धितानामाकृतिप्रधानत्वाद्यलोपः ।

तद्धानासामित्युपधानमन्त्रदृष्टकासु लुक् च मन्त्वर्थस्य ॥ ३५

निर्देशादेव समर्थविभक्तिः । मन्त्वर्थप्रत्ययान्तात् प्रथमा-न्तान्निङ्गादासामितीयतस्मिन्नर्थे यत्प्रत्ययो भवति । मन्त्वर्थ-

प्रत्ययस्य लुक् च भवति। तद्धानिमि योऽयं प्रथमान्तपदेन निर्दिष्टः, स चेदुपधानमन्त्वो भवति। याश्चासाभिति षष्ठ्यन्तपदेन निर्दिष्टास्ताश्चेदिष्टका भवन्ति। इतिशब्दो विवक्षार्थः। सतप्यनेकपदे केनचिदेव पदेन तद्धानिह मन्त्वो विवक्ष्यते। तद्धानितप्रवयवेनावयविनो निर्देशः। प्रत्ययविधिस्तु श्रुतादेव मन्त्वर्थप्रत्ययान्तादवयववाचिशब्दात्। उपधीयते येन तदुपधानम्। उपधानं पुनश्चयनम्।

वर्ष्मःशब्दो यस्मिन्मन्त्रेऽस्ति स मन्त्रोवर्ष्मवान्। वर्ष्मवानुपधानमन्त्र आसामिष्टकानामिति यति कृते मन्त्वर्थप्रत्ययस्य लुकि च विहिते वर्ष्मस्या इति पदं निष्पद्यते। तच्च वर्ष्मवन्मन्त्रकरणकोपधाना इष्टका अभिधत्ते। वर्ष्मस्या उपदधाति। का०। एवं, पयस्या उपदधाति। रेतस्या उपदधाति।

तद्धानिति किम्। मन्त्रसमुदायात् प्रत्ययविधिर्मा भूत्। उपधानेति किम्। वर्ष्मवानुपस्थानमन्त्र आसामिष्टकानामित्यत्र मा भूत्। मन्त्र इति किम्। अङ्गुलिमानुपधानो हस्त आसामिष्टकानामित्यत्र मा भूत्। इष्टकास्विति किम्। वर्ष्मवानुपधानमन्त्र एषां कपालानामित्यत्र मा भूत्।

अश्मिमतोऽण् ॥ २६

प्रथमा समर्थविभक्तिः। अश्मिमच्छब्दात् प्रथमान्तादण् प्रत्ययो भवति। मन्त्वर्थप्रत्ययस्य लुक् च भवति। उपधानमन्त्र आसामित्यर्थे। यतोऽपवादः।

अश्विशब्दो यस्मिन् मन्त्रे विद्यते स मन्त्रोऽश्विमान् । अश्विमानुपधानमन्त्र आसामित्यश्विमच्छब्दादण्णि मन्तोर्लुकि च प्रकृतिभावे हृद्भगादौ च कृते आश्विनीति पदं निष्पद्यते । आश्विनीरुपदधाति । का० ।

वयस्यासु मूर्ध्नन्वतो यतोलोपः ॥ २७

वयस्वानुपधानमन्त्रो यासामिष्टकानां ता वयस्याः । वयस्यास्विष्टकास्वभिधेयासु मूर्ध्नन्वच्छब्दाद्विहितस्य यतोलोपोभवति ।

यस्मिन् मन्त्रे वयःशब्दो मूर्ध्नशब्दश्चास्ति, स मन्त्रोवयस्वानपि भवति मूर्ध्नन्वानपि भवति । मूर्ध्ना वयः प्रजापतिच्छन्दः । का० । इत्येवमादिः । तत्र मूर्ध्नन्वच्छब्दाद् यतो लोपो विधीयते । यतोग्रहणान्मन्त्वर्थप्रत्ययस्य लुगिह नेष्यते । मूर्ध्नन्वती रुपदधाति । का० । या एव वयस्यास्ताएव मूर्ध्नन्वत्यः ।

वयस्यास्विति किम् । यत्र मन्त्रे मूर्ध्नशब्दएव केवलः पठ्यते न वयःशब्दस्तत्र मा भूत् । मूर्ध्नन्वत इति किम् । वयस्यायां यतो लोपो मा भूत् ।

असुरादिदमर्थे ॥ २८

षष्ठी समर्थविभक्तिः । षष्ठ्यन्तादसुरशब्दात् इदमितोऽस्मिन्नर्थे यत् प्रत्ययो भवति ।

असुर्यं देवेभिर्धायि विश्वं । ऋ० ६।२०।२ । असुर्यं वा एतत् पात्रं यच्चमसः कृतं कुलालकृतं । का० । के ते वाजा यासुर्याय हिन्विरे । ऋ० १०।५०।३ ॥ असुर्यं वर्णं नि रिणीते

अस्य तं । ऋ० ८।७१।२ ॥ असुराणां बाधकमिति वेदभाष्यम् । चत्वारि ते असुर्याणि नाम । ऋ० १०।५४।४ ॥ असुर-विघातोनीति वेदभाष्यम् । दृहासुराणां स्वमिति पाणिनीया स्मृतिः ।

मायायामण् ॥ ३९

षष्ठ्यन्तादसुरशब्दान्मायायामर्थे अण् प्रत्ययो भवति । यतोऽपवादः । आसुरी माया स्वधया कृतासि । का० ।

बहुलं वस्वादिभ्यः स्वार्थे ॥ ४०

विशेषातिदिष्टन्यायेन यतोऽनुवृत्तिः । वस्वादिभ्यो बहुलं यत् प्रत्ययो भवति स्वार्थे ।

हस्तौ पृणस्व बहुभिर्वसव्यैः । भा० । वसुभिरित्यर्थः । अग्निरीशे वसव्यस्य । ऋ० ४।५५।८ ॥ वसोरित्यर्थः । वसव्याः पान्तु । भा० । वसव एव वसव्याः । अपस्यो वसानाः । का० । अपोवसाना इत्यर्थः । अस्मिन् सुते सवने अस्त्वोक्यं । ऋ० १०।४४।९ ॥ ओक एव ओक्यम् । स्त्रोरन्तयोरिति सलोपः । कव्योऽसि हव्यवाहन । का० । कविरसीत्यर्थः । सत्यैः कव्यैः पितृभिर्धर्ममद्भिः । ऋ० १०।१५।९ ॥ कविभिरित्यर्थः । क्षेम्यस्येशे । क्षेम्यस्य वस्यति । का० । क्षेमस्येत्यर्थः । आयुर्वर्चस्यं । का० । वर्च इत्यर्थः । निष्केवल्यं शंसति । उक्थ्यं शंसति । मी० भा० । निष्केवलमेव निष्केवल्यम् । उक्थमेवोक्थ्यम् । नव्यं तदुक्थ्यं हितं । ऋ० १।१०५।१२ ॥ इंद्राग्नी स्तोमं जनयामि नव्यं । ऋ० १।१०८।२ ॥ नवमेव नव्यम् ।

न च भवति । क्राणा रुद्रेभिर्वसुभिः पुरोहितः । ऋ० १।५८।३ ॥ अपो देवीरुप ह्वये । ऋ० १।२३।१८ ॥ दाधार क्षेममोको न रण्वः । ऋ० १।६६।२ ॥ पुरां भिंदुर्युवा कविः । ऋ० १।११।४ ॥ क्षेमो न साधुः क्रतुर्न भद्रः । ऋ० १।६७।१ ॥ वर्चोधा यज्ञवाहसे । ऋ० ३।८।३ ॥ उक्थमिंद्राय शंस्यं । ऋ० १।१०।५ ॥ तूर्णी रथः सदा नवः । ऋ० । ३।११।५ ॥

छन्दसोऽक्षरसमूहे ॥ ४१

अक्षरसमूहे इत्यनेन प्रकृत्यर्थो विशिष्यते । अक्षरसमूहे वर्त्तमानात् छन्दःशब्दात् यत् प्रत्ययो भवति स्वार्थे ।

ओ श्रावयेति चतुरक्षरं अस्तु श्रौषड़िति चतुरक्षरं येयजामहइति पञ्चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरः छन्दस्यः प्रजापतिः । भा० । सप्तदशाक्षराण्येव छन्दस्यः ।

तैत्तिरीयास्तु, आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं येयजामहइति पञ्चाक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदश प्रजापतिर्यज्ञमन्वायत्तः,—इति समाम्नाय, मन्त्राणां महिमानं प्रदर्श्य, एष वै छन्दस्यः प्रजापतिराश्रावयास्तु श्रौषड्यज येयजामहे वषट्कारो य एवं वेद पुण्यो भवति । तै० स० १ ।६।११ ॥ इत्यन्ते समामनन्ति ।

अक्षरसमूहे इति किम् । कुरीरं छंदश्रोपशः । ऋ० १०।८५।८ ॥

कृते च ॥ ४२

तृतीया समर्थविभक्तिः । तृतीयान्तात् छन्दःशब्दात् कृतेऽर्थे यत् प्रत्ययो भवति ।

छन्दोभिः कृता छन्दस्या । छन्दस्यां३ वाचं वदन् । ऋ० ८।११३।६ ॥

दूनश्च पूर्वेभ्यः ॥ ४३

तृतीयासमर्थाद्बहुवचनान्तात् पूर्वशब्दात् कृतेऽर्थे यत्प्रत्ययो भवति । दूनश्च । बहुवचनान्तेन पूर्वशब्देन स्तुतिवैशिष्ट्यं ज्ञाप्यते ।

पूर्वैः कृतः पूर्व्यः पूर्विणः । इंदुरिंद्राय पूर्व्यः । ऋ० ९।६७।८ ॥ स पूर्व्यः पवते यं दिवस्परि । ऋ० ९।७७।२ ॥ गम्भीरेभिः पथिभिः पूर्विणेभिः । आ० क० ॥

मासतन्वोरनन्तरार्थे मन्त्वर्थे च ॥ ४४

यदनुवर्त्तते । प्रथमा समर्थविभक्तिः । मासतन्वोरित्यनेन प्रत्ययार्थौ विशिष्यते । प्रथमान्तान्निङ्गादनन्तरार्थं मन्त्वर्थे च यत्प्रत्ययो भवति । मासे तन्वां च विषये । मन्त्वर्थानामपवादः । तदस्त्यस्यास्मिन् वेत्ययं मन्त्वर्थः ।

मासे तावत् । मध्वनन्तरमस्येति मधव्योमासः । एवं । नभोऽभ्रम्, नभांसि विद्यन्तेऽस्मिन्निति नभस्यो मासः । एवं ।

सहस्यः । तपस्यः । मधव्यः । नभश्च नभस्यश्च वार्षिकावृतू । सहश्च सहस्यश्च हैमन्तिकावृतू । तपश्च तपस्यश्च शैशिरावृतू । तै० स० ४।४।११ ॥ तन्वां खल्वपि । ओजोऽस्यां विद्यते इत्योजस्या तनूः । ओजस्या तनूरित्यस्या । का० ।

मासतन्वोरिति किम् । मधुमता पात्रेण चरति । का० । दिवो दृष्टो मधुमाँ आ विवेश । ऋ० १०।९८।३ ॥

मधोरण् च ॥ ४५

प्रथमान्तान्मधुशब्दादनन्तरार्थे मन्त्वर्थे च यत् प्रत्ययो भवति । अण् च । मासे तन्वां च विषये ।

मधव्यो मासः । माधवो मासः । मधव्या तनूः । माधवा तनूः । का० । गणकृतमनित्यमिति न नदादित्वादी ।

अदिड्डाः ॥ ४६

मन्त्वर्थमात्रमनुवर्त्तते । प्रथमान्तात्लिङ्गान्मन्त्वर्थे अत् इत् र इत्येते प्रत्यया भवन्ति । मासतन्वोरर्थयोः । तकार उच्चारणार्थः ।

अत् । इड्विद्यतेऽस्मिन्निति इषोमासः । ऊर्ग् विद्यतेऽस्मिन्निति ऊर्जो मासः । इत् । शुग्विद्यतेऽस्मिन्निति शुचिर्मासः । र । शुग्विद्यतेऽस्मिन्निति शुक्रो मासः । अयस्मयादित्वाद्वर्गप्रथमलक्षणं न स्यात् । इषश्च ऊर्जश्च शारदावृतू । शुक्रश्च शुचिश्च शैषिकावृतू । तै० स० ४।४।११ ॥ तन्वामन्वेष्यमुदाहरणम् ।

लुक् च मन्त्वर्थस्य ॥ ४७

मन्त्वर्थे विहितः प्रत्ययो मन्त्वर्थः । मन्त्वर्थे विहितस्य प्रत्ययस्य लुक् च भवति । मासतन्वोरर्थयोः ।

नभांसि विद्यन्तेऽस्मिन्निति नभो मासः । सहो विद्यतेऽस्मिन्निति सहोमासः । तपो विद्यतेऽस्मिन्निति तपो मासः । मधु विद्यतेऽस्मिन्निति मधुर्मासः । नभश्च नभस्यश्च वार्षिकाद्वतू । सहश्च सहस्यश्च हैमन्तिकाद्वतू । तपश्च तपस्यश्च शैशिराद्वतू । मधुश्च माधवश्च वासन्तिकाद्वतू । तै० स० ४।४।११ ॥

यदीनावहन्योजसः ॥ ४८

प्रथमान्तादोजःशब्दान्मन्त्वर्थे यदीनौ प्रत्ययौ भवतः । अहन्यभिधेये । ओजो विद्यतेऽस्मिन्निति ओजस्यमहः । ओजसीनमहः । का० ।

भगाच्च वेशोयशःपूर्व्वात् ॥ ४९

प्रथमासमर्थाद्वेशोयशःपूर्व्वाङ्गशब्दान्मन्त्वर्थे यदीनश्च प्रत्ययो भवति । वेशोबलम् । श्रीकाममाहात्म्यवीर्य्ययशांसि भगः ।

वेशश्चासौ भगश्चेति वेशोभगः । सोऽस्यास्तीति वेशोभग्यः । वेशोभगीनः । एवं, यशोभग्यः । यशोभगीनः । का० ।

तुग्रादियो भवेऽन्यतरस्याम् ॥ ५० .

सप्तमी समर्थविभक्तिः । तुग्रशब्दात् सप्तम्यन्ताज्ज्ञवेऽर्थे द्वयः प्रत्ययो भवति वा । पक्षे यत् । अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्दं पठन्ति ।

त्वमग्ने वृषभस्तुग्रियाणां। का०। आवः शमं वृषभं तुग्रियासु। ऋ० १।३३।१५॥ इति बह्वृचाः॥ तुग्रियासु इति शाखान्तरे पठ्यते। उत यस्तुग्र्य सचा। ऋ० ८।३२।२०॥ इह विभाषां नेच्छन्त्येके।

ईयश्चाग्रात्॥ ५१

सप्तम्यन्तादग्रशब्दाच्चवेऽर्थे ईय ईयश्च प्रत्ययो भवति वा। पक्षे यत्। अग्रे भव अग्रीयः अग्रियः अग्र्यः। का०। अयं ते स्तोमो अग्रियः। ऋ० १।१६।७॥

समुद्राच्च॥ ५२

अन्यतरस्यामिति न स्मार्यते। ईयस्तु वर्त्तते। सप्तम्यन्तात् समुद्रशब्दात् भवेऽर्थे ईयः प्रत्ययो भवति।

दिवो धर्त्ता सिन्धुरापः समुद्रियः। ऋ० १०।६५।१३॥ समुद्रिया अप्सरसो मनीषिणं। ऋ० ८।७८।३॥

संघे चाभ्रात्॥ ५३

अभ्रशब्दादियः प्रत्ययो भवति। संघे भवे चार्थे। यथायोगं समर्थविभक्तिः।

संघे तावत्। वावदतो अभ्रियस्येव घोषाः। ऋ० १०।६८।१॥ सो अभ्रियो न यवस उदन्यन्। ऋ० १०।९९।८॥ भवे खल्वपि। इदमकर्म नमो अभ्रियाय। ऋ० १०।६८।१२॥ यदभ्रियां वाचमुदीरयंति। ऋ० १।१६८।८॥

अमित्रादिभ्यो बहुलम् ॥ ५४

अमित्रादिभ्यः शब्देभ्यो बहुलमियः प्रत्ययो भवति ।

जघ्निर्वृत्रममित्रियं । ऋ० ८।६१।१ ॥ न च भवति । परोऽवर उभया अमित्राः । ऋ० २।१२।८ ॥ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । मा० ६।२२ ॥ इति माध्यन्दिनीयाः । सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुः । तै० स० १।४।४५ ॥ इति तैत्तिरीयाः । नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा । मा० २२।२८ ॥ इति चोदाहरन्ति । बहुलग्रहणात् यदपि । ते नो रासंतां मह्ये सुमित्रयाः । ऋ० १०।६५।३ ॥ अमित्रादिराकृतिगणः ।

सहस्रात् सम्मितमन्त्वर्थयोः ॥ ५५

सम्मितस्तुल्यः सदृश इत्यनर्थान्तरम् । सहस्रशब्दादियः प्रत्ययो भवति । सम्मितेऽर्थे मन्त्वर्थे च । यथायोगं समर्थविभक्तिः ।

सहस्रेण सम्मितः सहस्रं विद्यतेऽस्येति वा सहस्रियः । अयमग्निः सहस्रियः । का० । सहस्रतुल्य इत्यर्थः । सहस्रियासो अपां नोर्मयः । ऋ० १।१६८।२ ॥ सहस्रियं दम्यं भागमेतं । ऋ० ७।५६।१४ ॥ इत्यपि बह्वृचाः समामनन्ति ।

ऋतोरस्य प्राप्ते ॥ ५६

प्रथमा समर्थविभक्तिः । प्रथमान्तात् ऋतुशब्दादस्य प्राप्त इत्येतस्मिन्नर्थे इयः प्रत्ययो भवति ।

भराय सु भरत भागमृत्वियं । १०।१००।१ ॥ इंद्रस्य भागमृत्वियं । १०।१७८।१ ॥ तमोषधीर्दधिरे गर्भमृत्वियं । ऋ० १०।८१।६ ॥

ईयो वत्सरान्निर्वृत्तादिषु ॥ ५७

वत्सरेण तदन्तविधिरिष्टः । वत्सरान्ताल्लिङ्गादीयः प्रत्ययो-भवति । निर्वृत्तादिष्वर्थेषु ।

निर्वृत्तमधीष्टो भृतो भूतो भावीत्यमी निर्वृत्तादयः । अधीष्टः अध्येषणया व्यापारितः । भृतो भृतिग्रहीतो दासः । भृतिः कर्म्ममूल्यम् । भूतः स्वसत्तया व्याप्तकालः । स एवानागतो-भावी । तत्र निर्वृत्ते तृतीया समर्थविभक्तिः । अधीष्टादिषु तु द्वितीया । इदत्सरीयः । इदावत्सरीयः । अनुवत्-सरीयः । का० ।

संपरिपूर्व्वादीनश्च ॥ ५८

संपूर्व्वात् परिपूर्व्वाच्च वत्सरान्ताल्लिङ्गादीनः प्रत्ययो भवति । निर्वृत्तादिष्वर्थेषु । चकारादीयश्च ।

संवत्सरीणं पय उस्रियायाः । ऋ० १०।८७।१७ ॥ ब्रह्म छणंतः परिवत्सरीणं । ऋ० ७।१०३।८ ॥ ईयः खल्वपि । संवत्सरीयः । परिवत्सरीयः । का० ।

वतिरुपसर्गाद्धात्वर्थे ॥ ५९

धात्वर्थे इत्यनेन प्रकृत्यर्थो विशिष्यते । धातोरर्थोऽर्थो-यस्येति विग्रहः । इष्टत्वात् साधनमन्यपदार्थः । धात्वर्थः क्रिया

साधनं कारकम् । धात्वर्थविशिष्टे साधने वर्त्तमानादुपसर्गात् वतिः प्रत्ययो भवति । स्वार्थे । इये किलोपसर्गाः, केचिदुपात्तायां क्रियायां तया संबध्यन्ते, केचित् पुनरध्यूयमाणायां तस्यां क्रियाविशिष्टं साधनमाचष्टते । तत्रोत्तरादुपसर्गाद्धतेर्विधानम् ।

स उद्वतो निवतो याति वेविषत् । ऋ० ३।२।१० ॥ याति देवः प्रवता यात्युद्वता । ऋ० १।३५।३ ॥ याः प्रवतो निवत-उद्वतः । ऋ० ७।५०।४ ॥ यदुद्वतो निवतो यासि बप्सत् । ऋ० १०।१४२।४ ॥

युष्मदस्मदोर्वन्तुः सादृश्ये ॥ ६०

युष्मदस्मच्छब्दाभ्यां सादृश्येऽर्थे वन्तुः प्रत्ययो भवति ।

त्वावतो हींद्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ । ऋ० ७।२५।५ ॥ न त्वावाँ इंद्र कश्चन न जातो न जनिष्यते । ऋ० १।८२।५ ॥ हवं विप्रस्य मावतः । ऋ० १।१७।२ ॥ यद्दित्समसि स्तुवते मावते वसु । ऋ० ८।८८।३ ॥

बहुलं मन्त्वर्थाः ॥ ६१

मन्त्वर्थाः प्रत्यया बहुलं भवन्ति ।

अग्ने तेजस्विन् । का० । अग्निस्ते ओजस्वी । सि० । ओजस्वंतं विरप्शिनं । ऋ० ८।७६।५ ॥ यो वर्च्चिनः शतमिंद्रः सहस्रं । ऋ० २।१४।६ ॥ स्तोरन्तयोरिति सलोपः । अग्नी रथी सुरूप इत् । ऋ० ८।४।९ ॥ सूर्य्यो वर्च्चस्वान् । का० । सूचामाणं पृथिवीं द्यामनेहसं । वर्म्मंख्वंतो न योधाः शिमीवंतः ऋ० १०।७८।७ ॥ एवमन्येऽपि ।

रेरवनीवा मन्त्वर्थे ॥ ६२

प्रथमा समर्थविभक्तिः । प्रथमान्तात्सिङ्गान्मन्त्वर्थे र इर वन् ई व इत्येते प्रत्यया भवन्ति ।

र । मेधारः । भा० । इर । विभुर्विश्वस्मै भुवनाय मेधिरः । ऋ० १।३१।२ ॥ विदुष्टे तस्य मेधिराः । ऋ० १।११।७ । स्व१: सिषासन्नथिरोगविष्टिषु । ऋ० ८।७६।२ ॥ वन् । यो मर्त्तेष्वमृत ऋतावा । ऋ० १।७७।१ ॥ ऋतावानं यज्ञियं विप्रमुक्थ्य१ं । ऋ० ३।२।१२ ॥ ऋतावाना यदीमहे । ऋ० १।१३६।४ ॥ ई । इषो रथीः सयुजः शूर वाजान् । ऋ० ३।३०।११ ॥ गिरो देवि रथीरिव । ऋ० ५।६१।१७ ॥ सुमङ्गली रियं वधूः । ऋ० १०।८५।३३ ॥ इति चोदाहृतं भाष्ये । व । उद्वा च उद्वती च । भा० । विम्बारं । कुरारवं । इष्टकावं । भा० । ये अप्सवमर्णवं चित्रराधसः । ऋ० १०।६५।३ ॥ अप्सइति रूपनामसु पठ्यते नैघण्टुकैः । द्विधा खल्वप्सशब्दमामनन्ति सान्तमकारान्तं च । सान्तपक्षे स्नोरन्तयोरिति सलोपः । बहुलाधिकारान्मन्त्वादयोऽपि भवन्ति । अश्वो रथी सुरूप इत् । ऋ० ८।४।९ ॥

अप्साद्रस् ॥ ६३

अप्सश्शब्दान्मन्त्वर्थे रस्प्रत्ययो भवति । सान्तस्य सलोपः ।

अप्सरा जारमुपसिस्मियाणां । ऋ० १०।११३।५ ॥ अप्सरस उप सेदुर्वसिष्ठाः । ऋ० ७।३३।९ ॥ अप्सरसां गंधर्वाणां । ऋ० १०।१३६।६ ॥

सूक्तसाम्नोरीयः ॥ ६४

सूक्तसाम्नोरभिधेययोर्मन्त्वर्थे लिङ्गादीयः प्रत्ययो भवति।

ऋच्छावाकशब्दो विद्यतेऽस्मिन्निति ऋ च्छावाकीयं सूक्तम्। बहुपदसम्भवेऽपि केनचिदेव पदेन व्यपदिश्यते। एवं, मित्रावरुणीयम्। तथा। यन्नायन्नीयं साम। एवं, वारवन्तीयम्। अनुकरणादपि प्रत्ययोत्पत्तिरिष्यते। अस्यवामीयम्। कयाशुभीयम्।

स्वार्थे चित् ॥ ६५

लिङ्गादीत्प्रत्ययो भवति स्वार्थे। तकार उच्चारणार्थः।

अग्ने रथीरध्वराणां। ऋ० १।४४।२ ॥ रथीरध्वराणामित्याहैष हि देवरथ इति। रथीरध्वराणामितयाह रथो वा एष भूतो-देवेभ्यो हव्यं वहति। ऋ० भा०। इति च ब्राह्मणं भवति।

सभायाः साधावेयः ॥ ६६

सप्तमी समर्थविभक्तिः। सप्तम्यन्तात् सभाशब्दात् साधार्थे एयः प्रत्ययो भवति।

समेयोऽस्य युवा यजमानस्य वीरो जायतां। का०। सादन्यं विदथ्यं सभेयं। ऋ० १।८१।२०॥ समेयो विप्रो भरते मती धना। ऋ० २।२४।१३॥

धेयोमित्ररत्नाभ्याम् ॥ ६७

साधाविति न स्मर्यते। मित्रशब्दात् रत्नशब्दाच्च धेयः प्रत्ययो भवति। स्वार्थे।

मित्रेणाग्ने मित्रधेये यतस्व । मा० २७।१ ॥ यक्षि देवान् रत्नधेयाय विक्षान् । ऋ० ७।९।५ ॥ उभयत्रैव दधाते-र्यप्रत्ययेन सिद्धेरनतिप्रयोजनोऽयं योग इत्याहुः ।

सर्वदेवाभ्यां तातिः ॥ ६८

सर्वशब्दात् देवशब्दाच्च तातिः प्रत्ययो भवति । स्वार्थे ।

आदित्यभ्यमा सुव सर्वतातिं । ऋ० ३।५४।११ ॥ त आदित्या-आगता सर्वतातये । ऋ० १।१०६।२ ॥ प्रतीची जूर्णिर्देवतातिमेति । ऋ० ७।३९।१ ॥ बृहस्पतिं मनुषो देवतातये । ऋ० ३।२६।२ ॥

शमरिष्टशिवेभ्यः करोतौ ॥ ६९

द्वितीया समर्थविभक्तिः । करोताविति धात्वर्थनिर्देशः । द्वितीयान्तेभ्यः शं अरिष्ट शिवेभ्यः करोत्यर्थे तातिः प्रत्ययो-भवति ।

शं करोतीति शन्तातिः । एवमरिष्टतातिः । शिवतातिः । का० । आ त्वा गमं शंतातिभिरथो अरिष्टतातिभिः । ऋ० १०।१३७।४ ॥

भावे च ॥ ७०

षष्ठी समर्थविभक्तिः । षष्ठ्यन्तेभ्यः शमरिष्टशिवेभ्यो भावेऽर्थे तातिः प्रत्ययो भवति ।

शन्तातिः । अरिष्टतातिः । शिवतातिः । चकारोऽनुक्त-

समुच्चयार्थः । तेन स्वार्थेऽपि । अथो अरिष्टतातये । ऋ० १०।६०।८ ॥ अस्मा अरिष्टतातये । ऋ० १०।८७।७ ॥

ज्येष्ठात् प्रशंसायाम् ॥ ७१

प्रशंसायामित्यनेन प्रकृत्यर्थो विशिष्यते । प्रशंसायां वर्त्तमानात् ज्येष्ठशब्दात् तातिः प्रत्ययो भवति । स्वार्थे ।

ज्येष्ठतातिं बर्हिषदं स्वर्विदम् । ऋ० ५।४४।१ ॥ तमोऽपि स्यादेव । प्र वः सतां ज्येष्ठतमाय सुष्टुतिं । ऋ० २।१६।१ ॥ न च भवति । तदिदास भुवनस्य ज्येष्ठं । ऋ० १०।१२०।१ ॥

वृद्धाच्छिश्च ॥ ७२

प्रशंसायां वर्त्तमानात् वृद्धशब्दात् तिः प्रत्ययो भवति । चकाराच्छातिश्च । स्वार्थे ।

यो नो दुरेवो वृकतिर्दभीतिः । ऋ० ४।४१।४ ॥ यो नो-मरुतो वृकतातिमर्थ्यः । ऋ० २।३४।९ ॥

परिपन्थिपरिपरिणौ पर्य्यवस्थातरि ॥ ७३

पर्य्यवस्थाता प्रतिपक्षः । पर्य्यवस्थातर्य्यभिधेये परिपन्थिन् परिपरिन् इत्येतौ निपात्येते ।

मा विदन् परिपंथिनः । ऋ० १०।८५।२२ ॥ अप तं पथ परिपंथिनं । ऋ० १।४२।३ ॥ मा त्वा परिपरिणो विदन् । का० ।

क्रदय्या अप्सु ॥ ७४

अप्स्वभिधेयासु क्रदय्या इति निपात्यते। क्रदे भवाः क्रदय्याः आपः।

तोरिष्ठेयन्सू लोपश्च तोरतिशायने ॥ ७५

उत्सृष्टानुबन्धनिर्देशस्तृच्तृणोर्ग्रहणार्थः। अतिशायनं क्रियागुणप्रकर्षः। अतिशायने वर्त्तमानात् तृजन्तात् तृनन्ताच्च लिङ्गात् इष्ठ ईयसु इतीतौ प्रत्ययौ भवतः। तृच्तृणोर्लोपश्च भवति।

पुरू सखिभ्य आसुतिं करिष्ठः। ऋ० ७।९७।७॥ दोहीयसी धेनुः। का०। अतिशयेन कर्त्ता अतिशयेन दोग्ध्रीत्यर्थः। न यथासंख्यमिहेति।

प्रत्नपूर्वविश्वे मेमास्थे वार्थे ॥ ७६

यथायोगं समर्थविभक्तिः। प्रत्न पूर्व्व विश्व इम इतीतेभ्यः थाप्रत्ययो भवति। इवार्थे।

स प्रत्नथा सहसा जायमानः। ऋ० १।९६।१॥ तत्तु प्रयः प्रत्नथा ते शुशुक्वनं। ऋ० १।९२।२॥ अक्रन्नुषासो वयुनानि पूर्व्वथा। ऋ० १।९२।२॥ नू इत्था ते पूर्व्वथा च प्रवाच्यं। ऋ० १।१३२।४॥ यत्सीमनु क्रतुना विश्वथा विभुः। ऋ० १।१४१।९॥ योऽवरे इजने विश्वथा विभुः। ऋ० २।२४।११॥ त्वं प्रत्नथा पूर्व्वथा विश्वथेमथा। ऋ० ५।

४४।१ ॥ यथाप्रायम्च । ताः प्रवतवव्यसीर्नूनमस्मे । ऋ० १। १२४।८ ॥ ययातिवत् सदने पूर्ववच्छुचे । ऋ० १।३१।१७ ॥ इतयादि ।

इदमः प्रकारे ॥ ७७

इदम् शब्दात् प्रकारेऽर्थे थाप्रत्ययो भवति ।

अग्न इत्येतरा गिरः । सा० छ० १।१।१।७ ॥ गंधर्व्व इत्था पदमस्य रक्षति । ऋ० ९।८३।४ ॥ इतयादावित्था प्रकृतयन्तरं सतयार्थे ।

हेतौ च किमः ॥ ७८

यथायोगं समर्थविभक्तिः । किम्शब्दात् थाप्रत्ययो-भवति । हेतौ प्रकारे चार्थे ।

कथा ग्रामं न पृच्छसि । ऋ० १०।१४६।१ ॥ कुतो हेतो-रितयर्थः । कथा दाशेमाग्नये बृहद्भाः । ऋ० ४।५।१ ॥ यथा प्रायम्च । देवं मनः कुतो अधि प्रजातं । ऋ० १।१६४।१८ ॥ कथं रसाया अतरः पयांसि । ऋ० १०।१०८।१ ॥

तदिदमोर्हिदा काले ॥ ७९

सप्तमी समर्थविभक्तिः । काले वर्त्तमानाभ्यां तदिदंशब्दाभ्यां र्हि दा इतयतौ प्रत्ययौ भवतः । यथासंख्यम् ।

न मृत्युरासीदमृतं न तर्हि । ऋ० १०।१२९।२ ॥ इदा चिदक्त इदा चिदह्नो: । ऋ० ४।१०।५ ॥ यथाप्रायम्च । नासदा-

सीन्नी सदासीत्तदानीं। ऋ० १०।१२९।१॥ मेदानीं पौतिरश्विना ततान्न। ऋ० ५।७६।२॥ यार्ष्टिदानां सामान्येन बिभक्ति-संश्लेषणे।

द्विस्वरादिकारावयववयोर्मयट्॥ ८०

षष्ठी समर्थविभक्तिः। षष्ठ्यन्तात् द्विस्वरादिलिङ्गात् विकारे अवयवे चार्थे मयट् प्रत्ययो भवति। टकारोनदाद्यर्थः।

यस्य पर्णमयी जुह्वर्भवति न स पापश्लोकं शृणोति। मी० भा०। शरमयं बर्हिर्भवति। दर्भमयं वासो भवति। का०।

द्विस्वरादिति किम्। वैकङ्कतः स्रुवः। पालाशी जुह्वः। का०। तस्येदमित्यण्।

न वर्ध्र्वित्वोकारवल्ल्याः॥ ८१

वर्ध्र्शब्दात् वित्वशब्दादुकारवतः शब्दाच्च विकारावयववयोरर्थयोः मयट् प्रत्ययो न भवति।

वार्ध्रीं रज्जुः। सि०। वार्ध्रीं बालप्रग्रथिता भवति। का०। वैल्वो ब्रह्मवर्चसकामेन कार्यः। का०। वैल्वः पालाशो वा यूपो-भवति। मी० भा०। मौञ्जं शिक्यं। का०। मौञ्जा अदृष्टा-वैरिणाः। ऋ० १।१८१।३॥ सर्वत्र तस्येदमित्यण्। उकारवद्-ग्रहणात् दीर्घवतो न निषेधः। धूममयाश्चाभ्राणि। का०। वल्लु-र्गिहेत्यत्र तद्धितविधिनिरासार्थः। तयाले त्विष्यते बाल्। वैणवी यष्टिरिति।

वादयो बहुलम् ॥ ८२

अद्यादेः सर्वनाम्नोबह्वोश्च विहितास्त्वादयोऽन्येभ्योऽपि बहुलं भवन्ति ।

धिष्व वज्रं हस्त आदक्षिणाभि प्रमंद पुरुदत्र मायाः । ऋ० ६।१८।९ ॥

नान्तादसंख्यादेः संख्यायाः पूरणे थमौ ॥ ८३

असंख्यादेर्नकारान्तात् संख्यावाचिनः शब्दात् संख्यायाः पूरणेऽर्थे थमौ प्रत्ययौ भवतः ।

पञ्चानां पूरणः पञ्चथः पञ्चमः । सप्तानां पूरणः सप्तथः सप्तमः । पर्णमयानि पञ्चथानि भवन्ति। का० । पञ्चममिन्द्रिय-मस्यापाक्रामन् । का० । साकंजानां सप्तथमाहुरेकजं । ऋ० १।१६४।१५ ॥ सरस्वती सप्तथी सिंधुमाता । ऋ० ७।३६।६ ॥

नान्तादिति किम् । अन्यस्मान्मा भूत् । असंख्यादेरिति किम् । एकादशानां पूरण एकादशः । पतिमेकादशं क्रधि । ऋ० १०।८५।४५ ॥ विश्वेदेवास्त्रय एकादशासः । ऋ० ९।९२।४ ॥ पुनः संख्याग्रहणं विषयोपदर्शनार्थम् ।

ऋत्व्यवास्त्व्यवास्त्वमाध्व्याः ॥ ८४

एतानि निपात्यन्ते ।

ऋतौ भवं ऋत्व्यम् । वास्तौ भवं वास्त्व्यम् । भवे यत् । वस्तुनि भवो वास्त्वः । इवमादित्वादण् । उकारश्च वक्तव्यो निपातव्यते । वास्तुशब्दस्यायं निपात इतीके । मधुशब्दाक्रान्तवर्णी-

योऽण्। तस्मिन्नुकारस्य वकारो निपात्यते। स्त्रियामेवायं निपातः। हुवे यद्वां सुते माध्वी वसूयुः। ऋ० ७।६७।४ ॥ माध्वीर्गावो भवन्तु नः। ऋ० १।९०।८ ॥

हिरण्ययहिरण्मयौ ॥ ८५

एतौ निपात्येते। हिरण्यशब्दान्मयटि पूर्वत्र मयटो मलोपः उत्तरत्र हिरण्यशब्दस्य यलोपो निपात्यते।

इंद्रो वज्री हिरण्ययः। ऋ० १।७।२ ॥ हिरण्ययी वां रभिरीषा अक्षी हिरण्ययः। उभा चक्रा हिरण्यया। ऋ० ८। ५।२९ ॥ हिरण्मयेन पात्रेण। मा० ४०।१७ ॥ हिरण्मये परे कोशे। छा० उ०।

पश्चपश्चापश्चाताच्चास्तात्यर्थे ॥ ८६

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्यो दिग्देशकालेष्वस्तातिर्विधीयते। तदर्थे पश्च पश्चा पश्चातादितीयते निपात्यन्ते। प्रथमयोरपरशब्दस्य पश्चादेशः अकाराकारौ च प्रत्ययौ। चरमे पश्चिमशब्दस्यापरशब्दस्य वा पश्चादेश आताच्च प्रत्ययः।

परो व्याघ्रो जायते पश्चसिंहः। का०। पश्च हि सः। सि०। पश्चा मृधो अप भवंतु विश्वाः। ऋ० १०।६७।११ ॥ पश्चा संतं पुरस्कृधि। ऋ० १०।१७१।४ ॥ पाहि पश्चातादुत वा पुरस्तात्। ऋ० ८।४८।१५ ॥ नव पश्चातात् स्थिविमंत आयन्। ऋ० १०।२७।१५ ॥ चकारात् पश्चादित्यपि। मयोन योषामभ्येति पश्चात्। ऋ० १।११५।२ ॥ स्वसारं जारो अभ्येति

पश्चात्। ऋ० १०।३।३ ॥ भाषायामपि। पश्चार्द्धेन प्रविष्टः प्रपतनभयाद्भूयसा पूर्व्वकायम्।

तरांतमामोर्ङ्खोऽन्यतरस्याम् ॥ ८७

तरां तमामित्येतयोर्ङ्खो भवति वा।

द्राघीय आयुः प्रतरं दधानाः। ऋ० १।५३।११ ॥ प्रतरां वस्यः। का०। इन्द्रेमं प्रतरां नय। मा० १७।५७ ॥

बहुलं वो मस्य मन्तोः ॥ ८८

मन्तोर्मकारस्य बहुलं वकारो भवति।

प्रयद्दिवो हरिवः स्थातरुग्र। ऋ० १।३३।५ ॥ इंद्राय शूषं हरिवंतमर्चत। ऋ० १०।९६।२ ॥ हरिवते हर्यश्वाय धानाः। ऋ० ३।५२।७ ॥ तपुर्यथस्तु चरुरग्निवाँ इव। ऋ० ७।१०४।२ ॥ यो अस्मै रेवान्न सुनोति सोमं। ऋ० १०।१६०।४ ॥ आहं सरस्वतीवतोः। ऋ० ८।३८।१० ॥ चिवती याज्यानुवाक्या भवति। अधिपतिवती जुहोति। दधीवांश्चरुः। का०। वाजे नाश्वाः ससवोवंत एवैः। ऋ० १०।६।६ ॥ ससवोवंता सपर्यवः। ऋ० ७।९४।१० ॥ न च भवति। सूर्यंते द्यावापृथिवीमन्तं। सप्तर्षिमन्तं। ऋषिमान्। ऋतीमान्। का०। तदेतद्यथायोगं मन्तुवन्तुभ्यां सिद्धं प्रपञ्चार्थं वचनम्।

मस्येति किम्। सर्व्वादेशो मा भूत्। मन्तोरिति किम्। मयटी मा भूत्।

नुरादिरनः ॥ ८९

अनन्तात् परस्य मन्तोरादिर्नुरागमो भवति ।

अच्छखवतः कर्णवंतः सखायः । ऋ० १०।७१।७॥ पूषण्वते ते चक्रमा करंभं । ऋ० ३।५२।७ ॥ अश्वन्वंतं यदनश्वा बिभर्ति । ऋ० १।१६४।४ ॥ ग्रीर्षण्वती । मूर्द्धन्वती । का० । लिङ्गान्तनकारस्येति नलोपः । पदकारास्तु, अच्छण् पूषण् इतोऽवमाद्यवर्गष्ठन्ति । नकारागमस्य परादित्वे तु अच्छ पूष इतोऽवमाद्यवयङ्ः प्राप्नोति । ततः पूर्वान्तोऽयं नुरागमयितव्यः । लुप्तस्यापि तस्यालुप्तवद्भावात् पुनर्नलोपो न भवति । अनो नकारस्यानन्त्यत्वात् णत्वविधिस्तु प्रवर्त्तते । एवं खल्ववयङ्ः पदकाराणां समर्थितो भवति । भाष्ये तु, न लक्षणेन पदकारा अनुवर्त्तनीयाः । पदकारैरेव तु लक्षणमनुवर्त्तनीयम् । तस्मात् यथालक्षणमवयङ्ष्टीतव्यमितुक्तम् । पदकारैः किलेयिवांसमित्यादौ पदत्वाभावेऽप्यवयङ्ः क्रियते । ईयिवांसमिति । पूर्वैभिरित्यादौ सत्यपि पदत्वे न क्रियते इति । मन्तोरित्येव । पृश्नयः पतरं चितयंतमच्छभिः । ऋ० २।२।४ ॥

नान्तरतमयोः ॥ ९०

नकारात् परयोस्तरलमयोरादिर्नुरागमो भवति ।

सुपथिन्तरः । भा० । एदु मध्वोमदिंतरं । ऋ० ८।२४।१६ ॥ अमिनक्षा द्यवक्षा दस्युहंतमं । ऋ० १०।१७०।२ ॥ अथाग्नि

पदकारैः दस्युहन्ऽतममित्यवगृह्यते। तरतमयोरितेरव। सर्वं राजभ्यः परमा चिदंति। ऋ० २।२७।३॥

भूरिदावत्तुः॥ ९१

भूविदावन् इतेरतस्मात् परयोस्तरतमयोस्तुरागमो भवति।

भूरिदावत्तरो जनः। ऋ० ८।५।३९॥ अस्ववं हि भूरिदावत्तरा वां। ऋ० १।१०९।२॥ पदकारैः पूर्ववदवगृह्यते; भूरिदावत्ऽतर इति। तरतमयोरितेरव। भूरिदावरीं सुमतिं। ऋ० ८।२।२१॥

ईट्रथिनः॥ ९२

तरतमयोः परतो रथिन् इतेरतस्य ईकारोऽन्तादेशो भवति।

नकिष्टद्रथीतरः। ऋ० १।८४।६॥ स रथेन रथीतमः। ऋ० ६।४५।१५॥ या सुरथा रथीतमा। ऋ० १।२२।२॥ रथीतमं वपर्दिनं। ऋ० ६।५५।२॥ संहितायामयमीकारादेशः। रथिऽतरः इत्येवमादि ह्यवगृह्यते। केचिद्रथशब्दाभ्यत्वर्थीयमीकारमाहुः। तथावग्रहे दोषः स्यात्।

रे रयेर्मन्तौ बहुलम्॥ ९३

मन्तौ परतो रथिशब्दस्य स्थाने बहुलं रे इत्ययमादेशो भवति।

स रैकाय्याति प्रथमो रथेन। ऋ० २।२७।१२॥ रैवाँ इव म मरा पुष्टिमच्छ। ऋ० ८।४८।६॥ पतिः सिंधूनामसि रैव-

तीनां । ऋ० १०।१८०।१ ॥ न च भवति । जैत्रं क्रतुं रयि-मद्वीरवद्यशः । ऋ० १०।३६।१० ॥ अर्वंतो वा ये रयिमंतः सातौ । ऋ० १०।७४।१ ॥ वंसद्रयिं रयिवतश्च जनान् । ऋ० ६।६८।५ ॥

मन्ताविति किम् । विश्ववेदसो रयिभिः समोकसः । ऋ० १।६४।१० ॥ संहितायामवग्रहे चादेशोऽयम् ।

कच्यायायाश्शब्दस्य संज्ञायामीर्वन्तौ ॥ ९४

कच्याशब्दस्य यो याशब्दस्तस्य ईकारादेशो भवति । वन्तौ परतः । संज्ञायां गम्यमानायाम् ।

अहं कक्षीवाँ ऋषिरस्मि विप्रः । ऋ० ४।२६।१ ॥ कक्षी-वंतं य औशिजः । ऋ० १।१८।१ ॥ कक्षीवते हचयामिंद्र सुन्वते । ऋ० १।५१।१३ ॥

याशब्दस्येति किम् । अन्तस्य मा भूत् । संज्ञायामिति किम् । असंज्ञायां मा भूत् । कच्यावान् हस्ती । का० । वन्ताविति किम् । परि ष्वजध्वं दश कच्याभिः । ऋ० १०।१०१।१० ॥

सोमादीनां दीर्घः ॥ ९५

वन्तौ परतः सोमादीनां बहुलं दीर्घो भवति ।

अश्वावतीं सोमावतीं । ऋ० १०।९७।७ ॥ अश्वावतीर्गोमती-र्विश्ववाराः । ऋ० १।१२३।१२ ॥ इन्द्रियावान् मदिन्तमः । का० । विश्वकर्मणा विश्वदेव्यावता । ऋ० १०।१७०।४ ॥

वीर्यावन्तमभिमातिषाहं । तै० स० १।२।७ ॥ तौ यदा संग-च्छते अथ वीर्य्यावत्तरो भवति । तै० ब्रा० २।७।३ ॥ न च भवति । इन्द्रवतो हविरिदं जुषतां । तै० ब्रा० २।६।१६ ॥ अवर्द्धयन्त्सोमवत्या वचस्यया । ऋ० १०।११३।८ ॥ वन्तावितीव । सोमेभिरीं पृणता भोजमिंद्रं । ऋ० २।१४।१० ॥ संहितायां दीर्घोऽयं न लवग्रहे । इन्द्रो ह्यवग्रह्यते । सोमादिराकृतिगणः ।

इन्द्रियादीनां विनि ॥ ९६

विनि परत इन्द्रियादीनां दीर्घो भवति ।

इन्द्रस्याहं देवयज्ययेन्द्रियावी भूयासं । तै० स० १।६।२ ॥ यस्मिन् जाते एतामिष्टिं निर्वपति पूतएव स तेजस्वित्वाद इन्द्रि-यावी पशुमान् भवति । मै० भा० । उभोभयाविन्नुप धेह्य दंष्ट्रा । ऋ० १०।८७।३ ॥ मंहिष्ठमुभयाविनं । ऋ० ८।१।२ ॥ त्वं तस्य इयाविनः । ऋ० १।४२।४ ॥ मा ते रसस्य मत्सत इयाविनः । ऋ० ९।८५।१ ॥ हृदयावी । मर्मावी । भा० । क्वचित् संहितायां क्वचिदवग्रहेऽप्ययं दीर्घः । इन्द्रियादि-राकृतिगणः ।

अन्यत्रापि दृश्यते ॥ ९७

अन्यत्रापि दीर्घो दृश्यते ।

अप वक्रा हृदयाविधत्स्वित् । ऋ० १।२४।८ ॥ इन्द्रियरूपं प्रयोगानुसारार्थम् ।

ऋजोर्ऋतोरिष्ठेमेयःसु बहुलम् ॥ ९८

इष्ठ इमन् इयन्सु इतीयेषु परतः ऋजुशब्दस्य ऋकारस्य र-त्ययमादेशो बहुलं भवति।

त्वं रजिष्ठमनु नेषि पंथां। ऋ० १।८१।१ ॥ वेत्यध्वर्युः पथिभी रजिष्ठैः। ऋ० ८।१०१।१० ॥ न च भवति। त्वक्तृजिष्ठः। का०। एवमन्यत्रापि।

ऋत इति किम्। सर्वादेशो मा भूत्। इष्ठेमेयःस्विति किम्। आदित्या ऋजुना पथा। ऋ० १।४१।५ ॥

समासान्ताद्सन्ताद्त् ॥ ९९

समासान्ताद्सन्तशब्दात् परोबहुलमत्प्रत्ययो भवति।

देवच्छन्दसानि। मनुष्यच्छन्दसानि। का०। न च भवति। देवच्छन्दः। का०। सूत्रामाणं पृथिवीं द्यामनेहसं। मा० २१।५ ॥

समासान्तादिति किम्। का त उपेतिर्मनसो वराय। ऋ०. १।७६।१ ॥ असन्तादिति किम्। विश्वदाव्ने तुष्टोति। का०।

बहुव्रीहौ नतुः ॥ १००

बहुव्रीहिसमासान्तानेङ्यशब्दादत् प्रत्ययो भवति।

हरिश्मश्रुतिनेत्राः सोमनेत्राः। का०।

अन्यतोऽपि दृश्यते ॥१०१

अन्यस्मादपि अतप्रत्ययो दृश्यते ।

स हि सत्यस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सख्ये: । ऋ० ५।४४।१० ॥ देवाः स्तवंते मनुषाय सूरयः । ऋ० १०। ६५।४ ॥ दृग्ग्रहणं प्रयोगानुसारार्थम् ।

पदयोर्वृद्धिर्देवताछन्दे सूक्तहविषोः ॥ १०२

हविरादौ सणि इत्यनेन या हविर्विहिता, सा देवताछन्द इयोः पदयोर्भवति । सूक्ते हविषि चार्थे ।

आग्निमारुतं सूक्तम्। आग्निमारुतीमनड्वाहीमालभेत । का० ।

सूक्तहविषोरिति किम्। स्कान्दविशाखौ देवते अस्य स्काान्दविशाखः । एवं, आग्नप्राजापत्यम् । कथं, आग्निमारुतं कर्म । सूक्तहविषोर्योगात् । यथा दण्डयोगाद्दण्डः पुरुष इति ।

न दीर्घादरुणस्य ॥ १०३

दीर्घात् पूर्वपदादरुणस्योत्तरपदस्य हविर्न भवति ।

ऐन्द्रावरुणं मैत्रावरुणं सूक्तं हविर्वा । दीर्घादिति किम् । आग्निवारुणीमनड्वाहीमालभेत । का० । भाषायामपीति मतम् । तत्र क्वचिदधिकारात् सिद्धम् । प्रपञ्चार्थं योगद्वयम् ।

इति चान्द्रव्याकरणे आतन्त्रछन्दःप्रक्रियायां नाम्नि चतुष्टये षष्ठः पादः ।

प्रथमः पादः ।

परेऽपि प्रादयो धातोः ॥ १

प्रादयो निपाता धातोः परेऽपि प्रयुज्यन्ते । अपिशब्दात् पूर्वेऽपि ।

हन्ति नि मुष्टिना । निहन्ति मुष्टिना । का० । आ हाभ्यां हरिभ्यामिंद्र याह्या चतुर्भिरा षड्भिर्हूयमानः । ऋ० २।१८।४ ॥ पुरू चर द्वृवा हनति नि दस्यून् । ऋ० ६।२८। ६ ॥ त्वं करोषि व्यञ्जलिकां त्वं करोषि नि जानुकां । तै० आ० । निकरोषीति संबन्धः । महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति । ऋ० १।३।१२ ॥

व्यवहिताश्च ॥ २

व्यवहिताश्च प्रादयो निपाता धातोः प्रयुज्यन्ते । अपिशेषात् परेऽपि पूर्वेऽपि ।

हरिभ्यां याह्योक आ । ऋ० ७। ३२ । ४ ॥ प्र देवत्रा ब्रह्मणे गातुरेतु । ऋ० १०।३०।१ ॥ आ नो देवानामुप वेतु शंसः । ऋ० १०।३१।१ ॥

आविरादयश्च ॥ २

आविरादयश्च धातोर्व्यवहिताः प्रयुज्यन्ते । चशब्दादव्यवहिताश्च ।

आविस्ते शुष्मो भवतु प्रियो मदः । ऋ० ८ । ७८ । ५ ॥ आविर्भव सुक्रतूया विवस्वते । ऋ० १। ३१।३ ॥

व्यत्ययोबहुलं त्यादीनाम् ॥ ४

त्यादीनां बहुलं व्यत्ययो भवति ।

आ जातो विश्वा सह्मान्यप्राः । ऋ० १०।१।१ ॥ पूरयतीत्यर्थे प्रा पूरणे इत्यस्मात्तौ प्राप्ते सिः । इंद्रस्ते सोम सुतस्य पेयाः । ऋ० ९।१०९।२ ॥ पेयादिति प्राप्ते । द्राघीयांसमनु पश्येत पंथां । ऋ० १०।११७।५ ॥ पश्येदिति प्राप्ते । जजान सूर्यमुषसं सुदंसाः । ऋ० ३।३२।८ ॥ जनेर्व्यत्ययेन परस्मैपदम् ।

परोक्षा भूते ॥ ५

अपरोक्षेऽपि भूते धातोः परोक्षा विभक्तिर्भवति । परोक्षे सिद्धेव ।

अहं द्यावापृथिवी आ ततान । भा० । अहं सूर्यमुभयतोऽदर्शमहं देवानां परमं गुह्या यत् । भा० ८।८ ॥ अहं द्यावापृथिवी आ विवेश । ऋ० १०।१२५।६ ॥

ह्यस्तन्यद्यतनीपरोक्षाः सर्व्वकालेष्वन्यतरस्याम् ॥ ६

सर्व्वेषु कालेषु ह्यस्तन्यद्यतनीपरोक्षाविभक्तयो भवन्ति वा । पक्षे यथास्वं प्रत्ययाः ।

ह्यस्तनी । अग्निमद्य होतारमद्वणीतायं यजमानः । मा० २१।५९ ॥ सूपस्था अद्य देवो वनस्पतिरभवत् । तै० ब्रा० ३।६।१५ ॥ अद्यतनी । इदं तेभ्योऽकरं नमः । ऋ० १०।८५।१७ ॥ अहं तेभ्योऽकरं नमः । मा० १६।८ ॥ देवो देवेभिरागमत् । का० । परोक्षा । अद्या ममार स ह्यः समान । ऋ० १० । ५५ । ५ ॥ धातुसंबन्धे विधिरयम् । उक्तोदाहरणेष धातुसंबन्धः पर्य्यन्वेष्य इत्याहुः ।

विध्यादिषु वर्त्तमाना ॥ ७

विध्यादिष्वर्थेषु वर्त्तमाना विभक्तिर्भवति वा । पक्षे यथास्वं प्रत्ययाः ।

सुपेशसस्करति जोषिषद्धि । ऋ० २।३५।१ ॥ पतति कुंडृणाच्या । ऋ० १।२८।६ ॥ उदधिं च्यावयाति । का० । एवमन्यत्र । हेतुहेतुमद्भावोऽपि विध्यादिष्वुपसंख्येय इति मतम् ।

उपसंवादाशङ्कयोश्च ॥ ८

उपसंवादः पणबन्धः । तद्यथा । यदि मे भवानेतत् कुर्य्यादहमपि भवते एतद्दद्यामिति । कारणतः कार्य्यानु-

सरणमाशङ्का। उपसंवादे आशङ्कायां च गम्यमानायां वर्त्तमाना विभक्तिर्भवति।

उपसंवादे तावत्। अहमेव पशूनामीयै। मदग्रा एव वो ग्रहा गृह्यन्ते। मद्देवत्यान्येव वः पात्राण्युच्यन्ते। का०। त्रिपुरविजये देवैरर्थितस्य भगवतोरुद्रस्योक्तिरियम्। आशङ्कायां खल्वपि। नेज्जिह्मायन्तो नरकं पताम। का०। जिह्माचरणेन नरकपात आशङ्क्यते।

सा लेट् ॥ ९

विध्यादुपसंवादाशङ्कासु येयं वर्त्तमाना विहिता, सा लेट्-संज्ञा भवति। लेट्प्रदेशा आदिरवर्णो लेटो लोपश्चेतो बहुल-मित्येवमादयः।

बहुलं सार्व्वधातुकविकरणौ ॥ १०

सार्व्वधातुकसंज्ञा विकरणसंज्ञा च बहुलं भवति।

वसूनि यानि शृण्विरे। ऋ० १।१५।८ ॥ परोक्षायाः सार्व्व-धातुकत्वात् नुविकरणः आदेशश्च। तथा। ये परावति सुन्विरे। ऋ० ८।५३।३ ॥ उप मामुच्चा युवतिर्बभूयाः। ऋ० १०।१८३।२ ॥ आशिषः सार्व्वधातुकत्वादन् विकरणः। तस्य लोपोद्विर्वचनमभ्यासस्यालोपश्च। त्वां वर्द्धंतु नो गिरः। ऋ० १।५।८ ॥ वर्द्धयन्विति प्राप्ते अनो विकरणसंज्ञाभावात् णाविठलोपः। विकरणत्वाद्गुणः।

आदिरवर्णो लेटो लोपश्चेतो बहुलम् ॥ ११

अवर्ण इत्यकाराकारयोर्ग्रहणम् । लेट आदिभूत अकार-आकारश्च भवति । इकारस्य च बहुलं लोपो भवति ।

अकारस्तावत् । प्रांधं श्रोणं च तारिषद्विवक्षसे । ऋ० १०।२५।११ ॥ सुपेशसस्करति जोषिषद्धि । ऋ० २।३५।१ ॥ वि क्रंदसी उर्वरासु ब्रवैते । ऋ०६।२५।४ ॥ अनकारयोरसन्ध्यक्षर-विधिः । आते इत्यस्याकारस्यैकारः । श्रेष्ठं सवं सविता सा-विषन्नः । ऋ० १।१६४।२६ ॥ आकारः खल्वपि । तिग्मा यदंतरशनिः पतांति । ऋ० ४।१६।१७ ॥ स्वसा यद्दां विश्वगूर्ती भरांति । ऋ० १।१८०।२ ॥ प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे । ऋ० १०।८५।१८ ॥ कियात्या यत् समया भवांति । ऋ० १।११३।१० ॥ सुमंगलश्च शकुने भवासि । ऋ० २।४२ ॥ सूर्य्या मासा मिथ उच्चरातः । ऋ० १०।६८।१० ॥ शतं यथेमं शरदो नयांति । ऋ० १०।१६१।३ ॥ इह पूर्वेषूदा-हरणेष्विकारस्य लोपो न परेषु ।

वस्मसोः सकारस्य ॥ १२

समनन्तरो लोपोऽनुवर्त्तते । लेटो वस्मसोः सकारस्य बहुलं लोपो भवति । करवाव । करवाम । न च भवति । करवावः । करवामः । का० ।

अभ्यस्तानामाकारस्य ॥ १३

लेटि परतोऽभ्यस्तानामाकारस्य बहुलं लोपो भवति ।

सोमो ददद्गंधर्वाय गंधर्वो दददग्नये । ऋ० १०।८५।४१ ॥ यो मे पृणाद्यो ददद्यो निबोधात् । ऋ० २।३०।७ ॥ दधद्रत्ना दाशुषे वार्याणि । ऋ० १।३५।८ ॥ दधद्रत्नानि दाशुषे । ऋ० ४।१५।३ ॥ न च भवति । यदग्निरग्नये ददात् । का० । अभ्यस्तानामिति किम् । सहस्रधारो यात्तना । ऋ०९।५२।२ ॥

ऐराकारस्य ॥ १४

लेट आकारस्य स्थाने बहुलमैकारो भवति । अर्थादात्मने-पदप्रथममध्यमपुरुषद्विवचनयोः ।

करवैते । करवैथे । मन्त्रयैते । मन्त्रयैथे । का० । सुतेभिः सुप्रयसा मादयैते । ऋ० ४।४१।३ ॥ विधानसामर्थ्यात् प्रति-पदोक्तग्रहणाच्चादिविहितस्याकारस्य न स्यात् । न च भवति । यस्मिन्निंद्रो वसुभिर्मादयाते । ऋ० ७।४७।२ ॥

एकारस्यान्यत्व ॥ १५

अन्यत्रेत्यनन्तरो विधिरपेक्ष्यते । यत्र प्रयोगे ऐराकारस्ये-त्यनन्तरो विधिः प्रवर्त्तते, तं प्रयोगं वर्जयित्वा लेट एकारस्य बहुलमैकारो भवति ।

सप्ताङ्गानि मयै । अहमेव पशूनामीशै । मदग्राएव को मह्या गृह्णाते । महेवत्याग्नेव वः पावाग्नुत्याग्ने । का० ।

सोम्य मधौ स्वाहेह मादयाध्वै । ऋ० ७।५८।६ ॥ न च भवति । दक्षं दधस उत्तरं । ऋ० ६।१६।१७ ॥ अध्वर्यवो यन्वरः कामयाध्वे । ऋ० २।१४।८ ॥ यद्वावमे विजने मादयासे । ऋ० १।१०१।८ ॥ अन्यत्रेति किम् । मादयैते । मन्त्रयैते । का० ।

नाम्नःपरेच्छायामपि यिन् ॥ १६

नाम्नः परेच्छायामर्थे यिन् परो भवति । अपि शब्दादात्मेच्छायामपि ।

यो नो अग्ने अररिवाँ अघायुः । ऋ० १।१४७।४ ॥ सुहस्रतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः । ऋ० १०।४२।११ ॥ उरुष्या णो अघायतः समस्मात् । ऋ० ५।२४।३ ॥ सर्वत्रान्योऽन्यस्याघमिच्छतीति यिन् । न हि कश्चिदात्मनोऽघमिच्छति । आत्मेच्छायां खल्वपि । जनीयंतो न्वग्रवः पुत्रीयंतः सुदानवः । ऋ० ७।९६।४ ॥ परेच्छायां विशेषविधिसामर्थ्याच्छब्दस्यात्मेच्छायां मा भूदित्याशङ्कानिरासार्थमपिग्रहणम् ।

दीर्घोऽघ्वाघयोर्यिनि बहुलम् ॥ १७

यिनि परतोऽघ्व अघ इत्येतयोर्बहुलं दीर्घो भवति । अर्थादन्तस्य ।

अघ्वो अघ्वायते भव । ऋ० ६।४५।२६ ॥ अघ्वायंतो वृषणं वाजयंतः । ऋ० ४।१७।१६ । जहि यो नो अघायति । ऋ० १।१३१।७ ॥ रक्ष राजन्नघायतः । ऋ० १।९१।८ ॥ न च भवति ।

अश्वयुर्गव्यूरथयुर्वसूयुः। ऋ० १।५१।१४ ॥ गव्या सीमासो-अश्वया। ऋ० ९।६४।४ ॥

देवसुम्नयोर्यजुषि काठके ॥ १८

यिनि परतः देव सुम्न इत्येतयोरन्तस्य दीर्घो भवति। यजुषि। काठके प्रवचने।

देवायन्तो यजमानाय। सुम्नायन्तो हवामहे। का०। नायं यजुःशब्दः शेषे यजुःशब्द इति परिभाषितयजुःपरः किन्तु यजुर्वेदपरः।

यजुषीति किम्। देवान् जिगाति सुम्नयुः। का०। ऋग्वेदेऽपि खल्वस्ति काठशाखा। काठके इति किम्। यजुर्वेदेऽपि शाखान्तरे मा भूत्। न सुन्वान न देवयो। तै० सं० १।८।२२ ॥ अञ्जन्ति त्वामध्वरे देवयन्तः। तै० ब्रा० ३।६।१ ॥ देवान् जिगाति सुम्नयुः। तै० ब्रा० ३।५।२ ॥ इति तैत्तिरीयके प्रवचने।

कथं, सुम्नायवः सुषमिधा समीधिरे। तै० ब्रा० १।२।१ ॥ इति तैत्तिरीयाः समामनन्ति। छान्दसोऽयं व्यत्ययः। यच्च ऋग्वेदादौ पठ्यते, तच्चेत् यजुषि काठके दृष्टं तदाप्ययं विधिरिति मतम्। अन्यत्र तु नैतस्यप्रवृत्तिः। तथाच। नरो यत्र देवयवो मदंति। ऋ० १।१५४।५ ॥ इति बह्वृचाः। अय आ देवयुं जनं। सा० छ० १।१।३।३ ॥ इति छन्दोगाः। यज्ञपतिं देवयुवं। मा० १।१२ ॥ इति वाजसनेयिनः।

अन्यत्रापि दृश्यते ॥ १९

यिनि परतोऽन्यत्रापि दीर्घो दृश्यते । मित्रायुवो न पूर्पतिं सुशिष्टौ । ऋ० १।१७३।१० ॥ भाष्ये त्वध्याययोरेव छन्दसि दीर्घो नान्यस्येत्युक्तम् ।

नेत्वमपुत्रादेः ॥ २०

यिनि परतः पुत्रादिवर्जितस्येत्वं न भवति । पुत्रादेस्तु भवत्येव । मरुत्व सुम्नयुर्गिरः । ऋ० १।७८।१० ॥ सर्गो न यो देवयता-मसर्जि । ऋ० १।१९०।२ ॥ अपुत्रादेरिति किम् । जनीयंतो-ग्नवः पुत्रीयंतः सुदानवः । ऋ० ७।९।४६ ॥ पुत्रादिराकृति-गणः । यिन्यवर्णस्येत्यस्य बाधकोऽयम् ।

लोपः कव्यध्वरपृतनानामन्तस्यर्चि बहुलम् ॥ २१

यिनि परतः कवि अध्वर पृतना इत्येतेषामन्तस्य बहुलं लोपो भवति । ऋग्विषये प्रयोगे ।

स पूर्व्यया निविदा कव्यतायोः । ऋ० १।९६।२ ॥ अध्व-र्यवश्चकवांसो मधूनि । ऋ० ५।४३।२ ॥ वज्रेण शत्रुमवधीः पृतन्युं । ऋ० १।३३।१२ ॥ न च भवति । अपो ह्यणानः कवते कवीयन् । ऋ० ९।९४।१ ॥ उपब्रुवे यजस्यध्वरीयसि । ऋ० १०।९१।११ ॥ पुत्रादित्वादित्वम् । त्वमग्ने पृतनायूँरभि ष्याः । ऋ० १०।६९।६ ॥ कथं, सपत्नो यः पृतन्यति । तै० ब्रा० ३।३।११ ॥ इति तैत्तिरीयाणां लोपः । त्वादेव ।

दुष्टद्रविणद्वषरिष्टानां दुरोद्रविणोद्वषग्रिष्रणः ॥ २२

दुष्ट द्रविण द्वष रिष्ट इत्येतेषां स्थाने दुरस् द्रविणस् द्वषण् रिषण इत्येते आदेशा यथासंख्यं भवन्ति । यिनि परे ।

अवियोना दुरसुः । का० । द्रविणसुर्विपन्यया । सा० ऋ० १।१।१।४ ॥ पवमानो द्वषण्यति । ऋ० १०।५।६ ॥ सखायो-मा रिषण्यत । ऋ० ८।२।१ ॥ कथं, अत्यो न यूथे द्वषयुः कनिक्रदत् । ऋ० ९।७७।५ ॥ बहुलाधिकारादियमिष्टसिद्धिरिति । दुवस् परिचरणे कण्ड्यादौ पठ्यते । तस्मात् यिनि, स तु शुधि शुत्या यो दुवोयुः । ऋ० ६।२६।५ ॥ इत्येवमादयः प्रयोगाः ।

इति चान्द्रकान्तायां कातन्त्रवृत्तिपञ्जिकायामाख्याते प्रथमः पादः ।

कातन्त्रच्छन्दःप्रक्रियायामाख्याते

द्वितीयः पादः ।

न चवर्गः क्षषश्चेक्रीयिते ॥ १

चेक्रीयिते परतः क्षषेरभ्यासस्य चवर्गो न भवति । अभ्यास-स्यैव हि प्रसक्तिः ।

करीक्षते यज्ञकुणपः । का० । चेक्रीयिते इति किम् । चक्षषे भूमिं प्रतिमानमोजसः । ऋ० १।५२।१२ ॥

रोऽन्तश्चरादेरभ्यासस्य ॥ २

चेक्रीयिते परतश्चरादेरभ्यासस्य रेफागमो भवति ।

अनुष्टुभमनु चर्चूर्य्यमाणं । ऋ० १०।१२४।९ ॥ अनुस्वारा-गमो बाध्यते नोत्वम् । कविर्बुध्नं परि मर्मृज्यते धीः । ऋ० १। ९५।८ ॥ मर्मृज्यमान आयुभिः । ऋ० ९।६२।१३ ॥ वायुर्न पर्फरत् क्षयद्रयीणां । १०।१०६।७ ॥ अन्तग्रहणमागमार्थम् । चरादिराकृतिगणः ।

बहुलं लुक् चेक्रीयितस्य चर्करीतञ्च धातुः ॥ ३

चेक्रीयितस्य बहुलं लुग्भवति । तस्मिंश्च सति धातुश्चर्क-रीतसंज्ञो भवति । चर्करीतप्रदेशाः चेक्रीयितवच्चर्करीतवेदितव्य-मादयः । चेक्रीयितलुकोऽपि चर्करीतसंज्ञा प्राचाम् ।

चेक्रीयितवच्चर्करीतस्य ॥ ४ ॥

चर्करीतस्य धातोश्चेक्रीयिते इव कार्यं भवति ।

रूपं रूपं मघवा बोभवीति । ऋ० ३।५३।८ ॥ कार्यातिदेशोऽयम् ।

कर्त्तरि परस्मैपदम् ॥ ५

चर्करीताद्धातोः कर्त्तर्यभिधेये परस्मैपदं भवति ।

बोभवीति । चेक्रीयितवदित्यतिदेशबाधनार्थमिदम् । गणकारवचनप्रमाणार्थं च । कथं, गुहा वा चर्कृषे गिरा । ऋ० १०।२२।१ ॥ कर्म्मणीतदात्मनेपदं न कर्त्तरि । वचनव्यत्ययो यणभावश्च छान्दसः ।

ईड्वचनादिरन्यतरस्याम् ॥ ६

चर्करीताद्धातोर्वचनादिरीड् भवति वा ।

रूपं रूपं मघवा बोभवीति । निधा बज्रो वृषभो रोरवीति । ऋ० ४।५८।३ ॥ महश्चर्कर्म्यर्वतः क्रतुप्रा । ऋ० ४।३८।२ ॥

अन्यस्मादपि दृश्यते ॥ ७

अन्यस्मादपि वचनादिरीड् विभाषा दृश्यते ।

उक्तवीति उक्तौति । उपरवीति । उपरौति । उपस्तवीति । उपस्तौति । शमीध्वम् । शाम्यध्वम् । अभ्यमीति । अभ्यमति । तु इत्यगणपरिपठितो धातुः । शमीध्वमभ्यमीति

इत्यनयोर्व्विकरणलोपः । तङि च्छन्दस्येव प्रयुज्यन्ते इत्यापि-ग्रलोपाः । भाषायामपीति पाणिनीयाः ।

चवर्गः क्षषेरभ्यासस्य ॥ ८ ॥

अन्यतरस्यामिति न स्मर्य्यते । चर्कंरीतन्वनुवर्त्तते । चर्कंरीतस्य क्षषेरभ्यासस्य चवर्गो भवति ।

गोभिर्यवं न चर्कृषत् । ऋ० १।२३।१५ ॥ गाय गाङ्व चर्कृषत् । ऋ० ८।२०।१९ ॥ चेक्रीयितवदित्यतिदेशेन चवर्ग-निषेधे प्राप्ते वचनम् ।

ऋमतोरिरौ च ॥ ९

ऋमतोर्धातोश्चर्कंरीताभ्यासस्य रिरौ च भवतः । चकाराद्री च । चरिकर्त्ति । चर्कर्त्ति । चरीकर्त्ति । चरिकरीति । चर्कंरीति । चरीकरीति । वरिवर्त्ति । वर्वर्त्ति । वरीवर्त्ति । वरिवरीति । वर्वरीति । वरीवरीति । एवमन्येऽपि । वर्वर्त्ति चक्रं परि द्यामृतस्य । ऋ० १।१६४।११ ॥ आ वरीवर्त्ति भुवनेष्वंतः । ऋ० १।१६४।३१ ॥ आ ये वयो न वर्वृततिं । ऋ० ६।४६।१४ ॥ प्रवातेजा इरिणे वर्वृतानाः । ऋ० १०।३४।१ ॥ तं मर्मृजानं महिषं न सानौ । ऋ० ९।९५।४ ॥ पञ्चेव चर्चरं जारं मरायु च्छन्ने वार्धेषु तर्तरीथ उग्रा । ऋ० १०।१०६।७ ॥ कथं, दिव-स्पृथिव्या उत चर्किराम । ऋ० ४।३९।१ ॥ किरतेरुपम् । लेटोमस् । ऋकारस्योपलक्षणत्वात् । व्यत्ययाद्वा ।

बोभूतु तेतिक्ते ॥ १०

एतौ निपात्येते। भवतेश्चर्करीतस्याभ्यस्तस्य गुणाभाव-स्तिजेरात्मनेपदञ्च निपात्यते।

बोभूतु। तेतिक्ते। तेतिक्ते तिग्मा तुजसे अनीका। ऋ० ४।२३।७ ॥ भवतेर्निपातनं ज्ञापयति भाषायां गुणोऽस्तीत्याहुः। कथं, दाधर्त्ति। धृञो धारयतेर्वा चेक्रीयितलुकि रेफागमं बाधित्वा तुजादित्वादभ्यासस्य दीर्घः। तथा। दर्ढर्त्ति-दर्धर्षि। क्षमया दर्धर्षीजसा। ऋ० ५।८४।३। वाजं दर्दर्षि स किलासि सत्यः। ऋ० २।१०।१५ ॥ इत्यादयोऽप्यनुसर्त्तव्याः।

नामिनोगुणोबहुलमुपधान्तस्य ॥ ११

उपधाभूतस्यान्तभूतस्य च नामिनो बहुलं गुणो भवति।

जुजोषदिंद्रो दस्मवर्चा। ऋ० १।१७३।४ ॥ जरसा मरते पतिः। ऋ० १०।८६।११ ॥ अभ्यासस्यापि। प्र ते महीं सुमतिं वेविदाम। ऋ० ७।२४।६ ॥ आ ये वयो न वर्वृततिं। ऋ० ६।४६।१४ ॥

नामिन इति किम्। गोभिः संनद्धा पतति प्रसूता। ऋ० ६।७५।११ ॥ याति देवः प्रवता यात्युद्वता। ऋ० १।३५।२ ॥ उपधान्तस्येति किम्। वि रोहवज्जठरे विश्वमुक्षते। ऋ० १०।८२।५ ॥ कथं, गाः पस्पशानस्तविषीरधत्त। ऋ० १०।१०२।८ ॥ अनश्नन्नन्यो अभिचाकशीति। ऋ० १।१६४।२० ॥

ऋतस्य हि धेनवो वावशानाः । ऋ० १।७३।६ ॥ स्यश्चिकश्चि-वश्चिभिः सिजम् ।

सिच् सार्वधातुके कर्त्तरि ॥ १२

कर्त्तरि विहिते सार्व्वधातुके परतो धातोर्बहुलं सिज् भवति । सिचोऽस्य विकरणसंज्ञेष्यते ।

स नो नेषन्नेषतमैरमूरः । ऋ० १।१४१।१२ ॥ न च भवति । अग्निर्नयन्नववास्त्वं बृहद्रथं । ऋ० १।३६।१८ ॥

गुणः सिचि विकरणे ॥ १३

विकरणसंज्ञके सिचि परतो धातोर्बहुलं गुणो भवति ।

सो अस्माँ अभयतमेन नेषत् । ऋ० १०।१७।५ ॥ तथा । नयिष्ठा उ नो नेषणि । ऋ० १०।१२६।३ ॥ अद्यतन्याः ह्यस्तन्यावा सार्व्वधातुकत्वात् विकरणः सिच् गुणोऽड़भावश्च । अविकरणे तु सिचि, सिचि परस्मै स्वरान्तानामिति वृद्धिः । नातारीदस्य समृतिं वधानां । ऋ० १।३२।६ ॥ न च भवति । पर्यग्निमहृषत । ऋ० १०।१५५।५ ॥ प्रपञ्चार्थमिदम् ।

इट् चादिः ॥ १४

विकरणसंज्ञकस्य सिच आदिर्बहुलमिड़ागमो भवति ।

नयिष्ठा उ नो नेषणि । न च भवति । पुनर्नेषदघशंसाय मन्म । ऋ० १०।१८२।१ ॥

क्रयादेर्व्यञ्जनान्तादायः ॥ १५

क्रयादेर्गणाद्व्यञ्जनान्ताद्बहुलमायो विकरणो भवति । कर्त्तरि विहिते सार्व्वधातुके परे ।

राजन् त्सोमो प्रति हव्या गृभाय । ऋ० १।८१।४ ॥ स संस्थिरो विष्टिरः सं गृभायति । ऋ० १।१४०।७ ॥ गृभायत रक्षसः सं पिनष्टन । ऋ० ७।१०४।१८ ॥ न च भवति । गृह्णांगान्यप्वे परेहि । ऋ० १०।१०३।१२ ॥ गृभ्णाति रिप्रमविरस्य तान्वा । ऋ० ८।७८।१ ॥ शुक्रा गृभीत मंथिना । ऋ० ८।४६।४ ॥

क्रयादेरिति किम् । गच्छामित्वान् प्र पद्यस्व । ऋ० ६।७५।१६ ॥ व्यञ्जनान्तस्येति किम् । प्रीणीते अग्निरोक्तितो न होता । ऋ० ७।७।३ ॥

लोपव्यत्ययौ विकरणस्य ॥ १६

विकरणस्य लोपो व्यत्ययश्च बहुलं भवति । लोपस्तावत् क्वचित् प्राप्तोऽपि न प्रवर्त्तते क्वचिदप्राप्तोऽपि प्रवर्त्तते ।

अहिः शयत उपपृक् पृथिव्याः । ऋ० १।३२।५ ॥ पृथिव्याः आपृगमुया शयंते । ऋ० १०।८८।१४ ॥ पुरू च हत्वा हनति नि दस्यून् । ऋ० ६।२८।६ ॥ एष्वादेर्लुग्विकरणस्येति प्राप्तो-लोपो न प्रवर्त्तते । शेते शेरते हन्तीति भाषायाम् । आध्वं नो देवा निजुरो हकस्य । ऋ० २।२८।६ ॥ मरुत्वती धृषती जेषि

शतून् । ऋ० २।३०।८ ॥ सखायं क्रध्वं शिवो नो अस्तु । ऋ० ७।३४।१५ ॥ एष्वप्राप्रः प्रवर्त्तते । त्रायध्वं जयसि कुरुध्वमिति भाषायाम् ।

व्यत्ययः खल्वपि । अन्यस्य विषयेऽन्यस्य प्रवृत्तिरेकचानेकेषां प्रवृत्तिश्च । आंडा शुष्णस्य भेदति । ऋ० ८।४०।११ ॥ भिनत्तीति प्राप्ते नशब्दविषये अन् । अनु व्रतान्यदितिर्ऋधंतः । ऋ० ७।८७।७ ॥ ऋधुवन्त इति प्राप्ते नुविषये अन् । स्वध्वरा करति जातवेदाः । ऋ० ६।१०।१ ॥ करोतीति ताप्ते उविषये अन् । तथा, जेरुष आह चमसा द्वा करेति कनीयान् त्रीन् कृणवामेत्याह । ऋ० ४।३३।५ ॥ उविषये अन् नुश्च विकरणः । विद्वान् पथः पुरएत ऋजु नेषति । ऋ० ५।४६।१ ॥ नयतीति प्राप्ते सिजनौ विकरणौ । इंद्रेण युजा तरुषेम वृत्रं । ऋ० ७।४८।२ ॥ तरेमेति प्राप्ते उसिजनस्त्वयोविकरणाः । एवमन्येऽपि ।

इरन्तो मसः ॥ १७

मस् इतीतस्माद्धलमिकारोऽन्तो भवति ।

इंदो सख्यत्वमुश्मसि । ऋ० ८।३१।६ ॥ उश्म इति प्राप्ते । क्षितीनेव जयामसि । ऋ० ४।५७।१ ॥ जयाम इति प्राप्ते । नमो भरन्त एमसि । मा० ३।२२ ॥ आङ्पूर्व्वादितिर्मस् । एम इति प्राप्ते । त्वं राजन् पारयामसि । मा० १२।८६ ॥ पारयाम इति प्राप्ते । अनाधृष्टा इव स्मसि । ऋ० १।२६।१ ॥

अस्तेर्मंस्। स्म इति प्राप्ते । अच्छा च त्वेमा नमसा वदा-
मसि । ऋ० ८।२१।६ ॥ वदाम इति प्राप्ते । अव धन्वानि
तन्मसि । मा० १६।५४ ॥ तन्म इति प्राप्ते ।

न च भवति । स्मो वयं संति नो धियः । ऋ० ८।२१।६ ॥
मंत्रैरग्निं कविमच्छा वदामः । ऋ० १०।८८।१४ ॥ कुर्मस्त-
मायुरजरं यदग्ने । ऋ० १०।५१।७ ॥ न चैतद्विद्मो वयं
ब्राह्मणा वा स्मो अब्राह्मणा वा । मै० भा० । ते यं द्विष्मो यश्च
नो द्वेष्टि तमेषां जम्भे दधः । मा० १६।६४ ॥ अन्तग्रहण-
मागमार्थम् ।

रिधातोः ॥ १८

रकार उच्चारणार्थः । अन्तग्रहणमनुवर्त्तते । धातोः परो-
बहुलं रेफागमो भवति ।

विश्वा इत्ते धेनवो दुक्ष आशिरं घृतं दुक्षत आशिरं । ऋ०
१।१३४।६ ॥ दुहन्तीति प्राप्ते तलोपे दुक्षे तलोपाभावे दुक्षते ।
प्रति यदापो अदृश्रमायतीः । ऋ० १०।३०।१३ ॥ अपश्यमिति
प्राप्ते । एत उ त्ये प्रत्यदृश्रन् । ऋ० १।१९१।५ ॥ अपश्यन्निति
प्राप्ते । अदृश्रन् हेत्रयीतये । ऋ० ९।४६।१ ॥ अदृजन्निति
प्राप्ते । धीर्णिः क्षीरं दुक्षते गावो अस्य । ऋ० १।१६४।७ ॥
न च भवति । शिरो अपश्यं पथिभिः सुगेभिः । ऋ० १।१६२
।६ ॥ सं वर्च्चे णादृजदृश्रमिंद्रः । ऋ० १।३२।१२ ॥

लोपस्तस्यात्मने ॥ १९ ॥

ते अकार उच्चारणार्थः । आत्मने पदे यस्तकारस्य बहुलं लोपो भवति ।

गन्धर्वो अप्सरसो अदुह्र । अदुहतेति प्राप्ते । दुह्रामश्विभ्यां पयो अघ्न्येयं । ऋ० १।१६४।२७ ॥ सा नः पयस्वती दुह्रां । ऋ० ४।५७।७ ॥ दुग्धामिति प्राप्ते । अये वज्रिञ्चरति जिह्मयादन् । ऋ० १०।४।४ ॥ शेते इति प्राप्ते । न च भवति । मा मामिमे पतत्रिणी वि दुग्धां । ऋ० १।१५८।४ ॥ समुद्रे अंतः शयते । ऋ० ८।१००।९ ॥ याः शुक्रं दुहते पयः । ऋ० ९।१९।५ ॥

तस्येति किम् । सबर्घुं धेनुमस्वं दुहध्यै । ऋ० १०।६१।१७ ॥ आत्मने इति किम् । उत्सं दुहंति स्तनयंतमक्षितं । ऋ० १।६४।६ ॥

आदेरमोऽद्यतन्याः ॥ २०

अद्यतन्या अम आदेर्बहुलं लोपो भवति ।

वधीं हतं मरुत इंद्रियेण । ऋ० १।१६५।८ ॥ हन्तेरद्यतन्या अम् । अड्भावः । अम आदिलोपः । सिच्प्रत्ययस्यो-रिट् । सिचो लोपः । अवधिषमिति प्राप्ते । आ नो-मूर्धानमक्रमीं । ऋ० १०।१६६।५ ॥ अक्रमिषमिति प्राप्ते ।